A.C. Joshi Library
P.U. Chandigarh

MSS No. 316 Subject PHILOSOPHY

Name of MSS गीत गोविन्द टीका

Author जयदेव

Period ______ Folios 41

Script SANSKRIT Source Prithi Pal Singh

Missing Folios N.A.


गीत गोविन्द सारदीपिकाटीका

जयदेव

१९ १११

गीत गोविन्द टीका; जयदेवकृत
जगद्धर अनु०
४१ पत्रकाः ॥ ला० अ० १६ पं० प्र० पृ०

ह० ला०


316

८।

No 1

316

[illegible]



1

श्रीगणेशाय नमः॥ ॥करकलितभुजंगो मस्तकन्यस्तगंगो विहितनटनरंगो दत्तदैतेयभंगः॥ चिरविगलदनंगस्त्यक्तसंगोगनांगो भ
वतु मम विभूत्यै शंभुरुन्मत्तगंगः॥१॥ नानानाटीकाः समालोक्य विचिंत्य सुचिरं मुदा॥ गीतगोविंदटीकेयं क्रियते श्रीजगद्गुरैः॥२॥ इह क
विर्निर्विघ्नं प्रारिप्सितसमाप्तिमुद्दिश्य स्वेष्टदेवताकेलिकीर्तनरूपमंगलं विधित्सुर्महाकाव्यलक्षणप्राप्तं वस्तुनिर्देशमपि कर्तुं
सूचयति॥ मेघैरित्यादि॥ राधामाधवयोः रहःकेलयो जयंति। गोपीविशेषकृष्णयोरेकांतक्रीडितानि उत्कर्षेण वर्तंतामित्यर्थः। रा
धा च माधवश्च राधामाधवौ चार्थे द्वंद्वः। राधा काचिद्गोपी। तथा च विश्वः॥ राधा वैशाखमासे स्याद्राधा गोप्यां च विद्युति। मा लक्ष्मीस्त
स्याः धवः स्वामी माधवः। यद्वा। मधोरपत्यं माधवस्तस्यापत्यमित्यण्। वृद्धिः ओर्गुण इति गुणः। अवादेशः। जयंतीत्याशंसायां लो
ट्। उत्वाभावः स्वानभिधानाद्देव। क्रीडादेशमाह। कुत्र यमुनाकूले। कालिंदीतट इत्यर्थः। कीदृशयोः। इत्थमनेन प्रकारेण नंदनिदे
शतो नंदाज्ञावशाच्चलितयोर्गच्छतोः॥ कमभिमुखीकृत्य। प्रत्यध्वकुंजद्रुमं। अध्वनि मार्गे कुंजद्रुमः अध्वकुंजद्रुमस्तं प्रति। लक्षणे
त्थंभूताख्यानेति कर्मप्रवचनीयसंज्ञा। लक्षणेनाभिप्रती आभिमुख्य इति समासः। कर्मप्रवचनीययुक्ते द्वितीया। अथ वा वी
प्सायामव्ययीभावः। तथा हि। अध्वनि अध्वनि कुंजे कुंजे द्रुमे द्रुमे। रहःकेलयो जयंतीति व्याख्यानं। यद्वा। अध्वा च कुंजश्च द्रुमश्च
तं प्रति लक्ष्यीकृत्य चलितयोरित्यर्थः। सर्वो द्वंद्वो विभाषैकवद्भवतीत्येकवद्भावः। यद्वा। अध्वनि कुंजे नलतादिपिहितो दरगृहेण
२ द्रुमो लक्षितोऽध्वकुंजद्रुमस्तं प्रतीत्यर्थः। इत्थमित्यस्य स्वरूपमाह। मेघैरिति। मेघैर्जलधरैरंबरं गगनतलं मेदुरं सांद्रं व्याप्तमि १
ति यावत्। तथा वनभुवो विपिनभूमयस्तमालद्रुमैस्तापिंजतरुभिः श्यामाः कृष्णाः। तेनाध्वनो निबिडांधकारत्वं ध्वनितं। तथा
नक्तं रात्रिसमयः। एतेन गगनं प्रति विषमत्वं सूचितं। तथापि किमित्ययं न जानाति न किमपि भविष्यतीत्याह। भीरुरयं। अयं क

देवता चेति वाणीरूपा सरस्वती। यद्वा वाचां देवता वाग्देवता तस्याश्चरितेन वचनरचनाविशेषेण विचित्रं मंडितं। चित्तसद्म मनोगृहं यस्य
स तथा। एतेनास्य चेतसः सरस्वतीवासत्वेन निजपांडित्यं सत्कवित्वं भगवत्यां विनीतत्वं च कविनोक्तं। पुनः कीदृशः। पद्मा लक्ष्मीः सावि
द्यते स्येति पद्मावान् हरिस्तस्य पत्नी पद्मावती लक्ष्मीः पुंयोगादाख्यायामिति ङीप्। तस्याश्चरणौ तयोश्चारणं संवाहनं तेन चक्रव
र्ती नृपवर इव। यद्वा। पद्मावतीचरणे चारणचक्रः सेवकसमूहः तत्र वर्त्तितुं शीलं यस्य स तथा। ताच्छीलिको णिनिः। यद्वा चारयंती
ति दिग्गते सुयशः प्रापयंतीति चारणा मागधाः नटा वा तेषां चक्रस्तत्र वर्त्तनशीलः। यद्वा पद्मावती तस्येव वधूस्तस्याश्चरणेन पदभ्राम
णेन नर्त्तनरूपकुशलतया नृपवर इव। भगवदग्रे निजवधूं पद्मावतीनाम्नीं अग्रे स्वयमेव नर्त्तयतीति वार्त्ता। यद्वा निजवधूचर
णसंवाहनेन नृपवर इव। तदनेन कमलापदसंवाहनेन धनवत्त्वं सूचितं। निजवधूवशतया चान्यस्त्रीवैमुख्यं शृंगारित्वं च दर्शितं
निजशृंगारित्वस्य च अस्य काव्यस्य शृंगाररसशालित्वं दर्शितं। युक्तं चैतत्। शृंगारी चेत्कविः काव्ये जातं रसमयं जगदिति वचनात्। चारणा यं ८
श्च कुशीलवा इत्यमरः। चक्रः कोकोव्रजे पुंसि क्लीबं सैन्यरथांगयोरिति विश्वः॥ ॥अथ कविरेतस्य निजग्रंथस्य प्रयोजनमाह। य
दीत्यादि तदा जयदेववाणीं शृणु। आकलय इति श्रोतृजनान् प्रति वचनं। कीदृशीं। मधुरा सरला कांता मनोहरा पदाव
ली पदपंक्तिर्यत्र सा तथा। मधुरं रसवद्वाचि वस्तुन्यपि मधुस्थितिः। येन माद्यंति धीमंतो मधुनेव मधुव्रताः इति दंडी। कोमलता सु
कुमारता वा। सुप्रयोगैर्महच्छब्दैर्युक्तमस्पष्टसंधिभिः। सुकुमाराक्षरसंयुक्तं सुकुमारं तदुच्यते इति नीलारविंदे। यन्मनःश्रोत्रविषयप्रह्लादज
नकं भवेत्। ताराद्युग्गंधानुयोगेन तत्कांतमिति कीर्त्तितमिति च। शृंगारादिरसप्राचुर्यान्मधुरा। झटिति बोध्यत्वात्कोमला। गेयत्वात्कांते
त्यपि बोद्धव्यं। हरिस्मरणे हल्लवितं नेयादि मनः सानुरागं। विलासकलासु रतिचतुःषष्टिरूपासु कलासु विश्रमाधारेषु वा यदि कुतूहलं २
कौतुकमस्ति तदा। शृणु इत्यर्थः। तत्र प्रियसमीपगमस्थानांतरविलोकनेषु। विकारः कस्मात्क्रोधः स्मितं च संकोचश्च विहलनं चयत्राव

नं:
3 स्वामी भीरुः भययुक्तः। अतिबालत्वात्। केचित्तु अयं कृष्णो नक्तं भीरुः रात्रौ भीरुरिति व्याख्यायते दिवैवायं निदेशः इत्यभिधाय दिनस्यैव मेघा
वृतगगनत्वादिना रात्रित्वमुपचरितमित्यूचिरे। तन्न मेघावृतगगनत्वे सत्यपि दिने गगनाप्रावीण्यस्याप्रतीतत्वात्। ततो रात्रावेवायं नि
देश इति नोक्तदोषः। तस्मादिमं कृष्णं हे राधे गृहं प्रापय त्वमेव। एवकारेण नंदस्यान्यस्मिन् विश्वासाभावः सूचितः। सांद्रे स्निग्धे च मेदुरइति
धरणिः। निकुंज कुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरः। एकांतार्थे रहोव्ययमिति च। मा लक्ष्मीर्निगद्यत इत्येकाक्षरकोषः। आज्ञा निदे
श आदेश इति शाश्वतः। इममित्यत्रान्वादेशेपि एनमिति न भवति। तद्विधेरनित्यत्वात्। क्वचिद नर्चितस्यापि पूर्वनिपात इति। राधायाः
पूर्वनिपातः। यथा लक्ष्मीनारायणौ। पार्वतीपरमेश्वरौ इति। यद्वा राध्यते साध्यते आकांक्षितमनयेति व्युत्पत्त्या राधा लक्ष्मीः सा चात्र
कविनोपचरितामात्रत्वेन ततो मातुर्गौरवं पितुरधिकमिति तस्याः एवाभ्यर्हिततया पूर्वनिपातः। तदुक्तं। सहस्रेण पितुर्माता गौरवेणाति
रिच्यते। तदिह राधामाधवनिर्देशो नवस्तुनिर्देशरूपं काव्यलक्षणं भवति। तच्च महाकाव्योपक्रमे कर्तव्यमेव। तदुक्तं। सर्गबंधो महाकाव्य
मुच्यते तस्य लक्षणं॥ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति॥ इदानीं कविरात्मनः कवित्वश्रृंगारित्वे स्फुटीकुर्वाणः स
रस्वतीलक्ष्म्योः कीर्तनपुरःसरं कृष्णस्य सुरतक्रीडावर्णनं कर्तुमाह। वाग्देवतेत्यादि   जयदेवकविरेतं प्रबंधं करोति करिष्यतीत्यर्थः
वर्तसामीप्ये वर्तमानवद्वेति भविष्यति लट्। जयत्यसुरानिति जयो हरिः। अच्प्रत्यये साधुः। जयो देवो यस्येति स तथा। जयनं जयः
एतच्च दिवु क्रीडादौ देवनं देवः भावे घञ्। इंद्रियाणां जये देवः क्रीडा यस्य स चासौ कविश्चेति कर्मधारयः। कविः काव्यकर्ता पंडितो वा।
कविः काव्यकरे सूराविति विश्वः। यद्वा। जयदेव नामा कविः। शाकपार्थिवादित्वान्मध्यमपदलोपी समासः। प्रबंधं गीतगोविंदनामकं
महाकाव्यमिति यावत्। कीदृशं। श्रीर्लक्ष्मी राधारूपा वासुदेवः कृष्णः तयोः रतिकेलिकथा सम्मेतं सुरतक्रीडाकथनेन युक्तं। यद्वा श्रीः
कांतिर्लक्ष्मीर्वा तत्पायुक्तस्य वासुदेवस्येत्यर्थः। यद्वा श्रीशब्दः प्रकर्षार्थः पूज्ये प्रयुज्यत इति तस्य प्रयोगः। कीदृशः कविः। वाक्सो

क्लीबत्वादिकं। तदुक्तं। द्वितीयांतत्वकर्मत्वे क्लीबत्वं च तथैकता। क्रियाविशेषणस्यैवं मतं सूरिभिरादरादिति॥ महाप्रलयकाले भवान् वेदं स्वीकृत्य सृ
ष्टिकाले ब्रह्माणमुत्पाद्य तस्मै तं समर्पयति। तथा च श्रुतिः। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति। यद्वा कीदृशं वेदं विहितं।
वहित्रस्य पोतस्य चरित्रमिव येन। वहित्रं संसारसागरतारकं वेदोऽपि नित्यनैमित्तिककाम्यकर्मप्रतिपादकतया संसारसागरतारक इति साम्य
मिति भावः। क्षितिरित्यादि धृतकच्छपशरीर जय। तव पृष्ठे मेदिनी वसति। कीदृशे अतिमहति। एतेन धारणयोग्यता दर्शिता। पुनः की
दृशे। धरणिवहनेन यः किणो मृतशोणितग्रंथिः स एव चक्रं चक्राकारत्वात् तेन गरिष्ठे गरीयसि। संततोद्वहनेन मृतरक्तपिंडः किण इत्युच्यते। तदु
क्तं। किणः स्यान्मृतशोणितमिति। वसतीत्यादि धृतवराहरूप जय। दशनशिखरे दंताग्रे तव धरणी संबद्धा वसति। कीदृशी। चंद्रे अंतर्ग
ता कलंककलेव। अग्रं शिखरमित्या द्युरद्रिशृंगे च तन्मतमिति धरणिः। दशनोऽपि मतो दंत इत्यपि। तवेत्यादि। धृतनरसिंहरूप जय। ह
रिः सिंहः। तथा चामरः। यमानिलेंद्रचंद्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु। तव हस्तपद्मे श्रेष्ठे नखमस्ति। कीदृ
शं। अद्भुतशृंगं अद्भुतमाश्चर्यजनकं शृंगमग्रभागो यस्य तत् तथा। शृंगं त्वस्त्रीमा अत्राभ्यां नखस्य पद्मपत्राय साम्यं। क्वचित्कमलदलमिति
पाठः। स तु मनोहरः। शृंगं प्रभुत्वे शिखरे चिह्ने क्रीडांबुयंत्रके। विषाणोत्कर्षयोश्चाग्रे शृंगः स्यात्कूर्चशीर्षके इति विश्वः। आश्चर्यहेतुमाह।
[illegible]। दलिता विदारिता हिरण्यकशिपोर्दैत्यराजस्य तनुर्भृंग इव येन नखेन तत्तथा। अन्यत्र भ्रमरेण कमलदलानि दल्यंते इह तु स
एव तेन दलित इति वैपरीत्ये नाश्चर्यं। यद्वान्यत्र पद्मपत्राग्रमतिकोमलं इदं पुनस्तादृशमहासुरवक्षस्तटकपाटपाटनपटुतरमिति
चित्रं। नखोऽस्त्री नखरं त्रिष्वित्यमरः। स्त्रियां मूर्तिस्तनुस्तनूरिति च। छलयसीत्यादि धृतवामनरूप जय। हे आश्चर्यहेतुवामन विक्र
मेऽवस्थायाः। बलिनामानं असुरराजानं छलयसि प्रवंचयसि। कीदृशः। पदनखनीरेण। पादनखं तत्संबंधिनीरेण जनितं कृतं जना
नां लोकानां पावनं पवित्रं येन बलिछलनार्थं द्विपंचाशदंगुलिमात्रपरिमाणधारिणो हरेर्ब्रह्मांडपर्यंतगतं तावच्चरणं कमंडलुजलेन ३
पितामहेन प्रक्षालितं अतएव पदनखनीरं गंगा तत्र स्नानाज्जनानां पावित्र्यं युज्यत एवेति पुराणवार्ता। अद्भुतं पूर्वं वामनीभूय पश्चा

पा३

4 ध्यते स विलासः। तदुक्तं। चलति बहुलं पादन्यासे विलोकितमन्यतः स्थिरमपि तदाकर्णाभोगे भ्रमाति विहृन्ननं। स्मितमपि सुधाव्यर्थः को भोह्रथैव च
मत्कृतिर्दयितसविधं यांत्याः स्त्र्या विलासरसोऽयमिति। कला चंद्रकलायां च कलास्यात्काऽऽकुनादिकमिति विश्वः। गीर्वाग्वाणी सरस्वतीत्यमरः
॥ कविरधुना महाकविप्रशंसावसरे लक्ष्मणसेनदेवेनाहं निरूपित इति मदीयकवित्वे गुणादिकमस्तीति द्योतयन्निजग्रंथमाहात्म्यमाह वाचइ
त्यादि उमापतिधरनामा कश्चित्कविर्वचनानि पल्लवयति विस्तारयति न तु गुणादिकं वेत्तीत्यर्थः। पल्लवनं पल्लवः तं करोतीति तत्करोतीति तदाचष्ट इति णिचु
गिरां वाचां संदर्भशुद्धिं ग्रंथनशुद्धिं जयदेव एव परं जानाति नान्य इत्यर्थः। संदर्भशुद्धिश्चार्थेन च भवतीति तथा च तदुभयं जानातीति भावः। शरणना
मा कविः दुरूहद्रुते विषमार्थस्य सत्वरोद्धारणे श्लाघ्यः प्रशंस्यो दुःखेनोह्यत इति दुरूहं तच्च द्रुतिः शीघ्रता दुरूहमपि पदजातं शीघ्रं व्यक्तीकरोतीत्यर्थः तिभावः
शृंगाररसोत्तरः प्रधानं येषां तानि तथा। संति उत्कृष्टानि च तानि प्रमेयानि स चेति सत्प्रमेयानि। शृंगाररसप्रधानानि च तानि चेति कर्मधारयः॥
तेराचार्यगोवर्धनस्पर्द्धी शीलः कोऽपि न विख्यातः। आकर्णितो वा। आचार्यगोवर्धनः शृंगारप्रधानमेव काव्यं करोति नान्यरसं जानातीति भावः। धोयी
नामा कविर्नृपतिः श्रुतिधरः श्रुत्या श्रवणमात्रेणैव ग्रंथग्रहीता न पुनरर्थादिग्रहणे प्रवीण इत्यभिप्रायः। एतेनान्ये केचनापि महाकवयो जयदेवसा
म्यं न विधातुमीशा इति मदीयकवित्वे महत्काव्यमस्तीति ध्वनितं। ननु विशिष्टौ शब्दार्थौ काव्यं। विशिष्टत्वं विषयनिर्दोषत्वगुणवत्त्वालंकारयोगित्वस
हितरसवत्त्वं। तदुक्तं सरस्वतीकंठाभरणे। निर्दोषं गुणवत्काव्यमलंकारैरलंकृतं। रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विंदति ॥ कविरधुना हरेः सं
सारस्थितो निदानत्वमुद्भावयन् विघ्नाभावपूर्वकप्रारिप्सितसमाप्तिकारणं दशविधावतारकथनरूपं मंगलमाह। प्रलयेत्यादि यद्यपि मंग
लमादौ निबद्धमेवेतीह तन्निबंधनमफलं तथापि बहुविघ्नशंकया बहुमंगलाचरणं युक्तमेवेति नोक्तदोषः। गीतस्यास्य मालवरागः रूपक
तालः। रागलक्षणं तु। नितंबिनीचुंबितवक्त्रपद्मः शुकद्युतिः कुंडलवान्प्रमत्तः। संकेतशालां प्रविशन्प्रदोषे मालाधरो मालवरागराज इति। हे केश
व के पानीये शेते इति। यद्वा प्रशस्ताः केशाः यस्येति स तथाविध हे जगदीश जगत्प्रभो धृतमीनशरीर गृहीतमत्स्यदेह हरे जय सर्वोत्कर्षेण वर्धस्व।
केशव केशवेति गीतत्वाद्द्विरुक्तिः। प्रलयपयोधिजले कल्पांतसागरपानीये वेदं धृतवानसि वहसि। अखेदं परिश्रमे यथा स्यादेवं कथं धृतवा
नत आह। विहितं वहित्रचरित्रं सागरतरणहेतुनौचेष्टितं यत्र धारणक्रियायां तत्तथा इदमपि क्रियाविशेषणं उभयत्र क्रियाविशेषणत्वेन

गमे पवि क्लेशप्रकर्षयोरिति विश्वः॥ अद्भुते वा। तत्र यज्ञे त्वमेव यज्ञविधाने पशुघातमुपदिशसि सूर्य्यांतरेण तं निंदयसीति चित्रमेवा म्लेच्छे
त्यादि कल्किशरीरसंहारिरूपजय। म्लेच्छ अव्यक्ते शब्दे धातुः॥ अव्यक्तं वदतीति म्लेच्छः शब्दोत्यजेषु प्रसिद्धः। म्लेच्छनिवहनिधने अं
त्यजसमूहमारणनिमित्तं करवालं खड्गं धारयसि। कलिधारणार्थोपि। कलि वल्लीकामधेनुरिति वैयाकरणाः। कमिव धूमकेतुमिवे
औत्पातिकं धूमयुक्ततारकमिव। अथवा धूमः केतुश्चिह्नं यस्य स धूमकेतुरग्निस्तमिव। खड्गस्य नीलत्वात्। मुख्यादेः सुवर्णमयत्वात्
द्धमाग्निसाम्यं। कीदृशं। किमप्यनिर्वचनीयं करालं भयानकं। करालो दंतुरे तुंगे करालो भीषणेप्यवदिति शाश्वतः॥ अग्न्युत्पातौ धूं
मकेतू ऊीमूतोमेघपर्वतावितिधरणिः। निधन इति। निमित्तात्कर्मयोगे सप्तमी विषयसप्तमी वा। करवालो मतः खड्गे करवालो भया
नक इति धरणिः। श्रीजयदेवेत्यादि। धृतदशविधरूप धृतदशप्रकारशरीरजय। इदं श्रीजयदेवकवेरुदितं भाषितं गीतं शृणु। आ
कर्णय। हे लोके इष्यध्याहार्यं कीदृशं उदारं महत्त्वयुक्तं वास्पष्टार्थं वा। पुनः कीदृशं। सुखदं। शुभवत्ताश्रुतिमनसोः सुखदायकं। शु
भदं कल्याणदायकं हरिचिंतनात्। अत एव भवसारं संसारे धनरूपं न्याय्यं श्रेष्ठं वा। सारो बले मज्जनि च स्थिरत्वे न्याय्ये च नीरे
च धने च सारं। श्रेष्ठे च्यवत्सा स्मुदाहरंतीति विश्वः॥ एतच्च कृष्णचरितमाहात्म्यात्। सुखं ददातीति सुखदं। आतो नुपसर्गे कः॥ विधा चात्र
प्रकारः। तदुक्तं। गतिविधप्रकारास्तुल्यार्था इति भर्तृहरिः॥ मत्स्यः कूर्मो वराहश्च नारसिंहोथ वामनः। रामो रामश्च कृष्णश्च बुद्धः कल्की
च ते दशेति दशावताराः॥ कविरिदानीमतिवेल्लवतया हरिकीर्तने स्पृहावगीतसमांतेपवितमप्यर्थं श्लोके नाह वेदानित्यादि
कृष्णाय तुभ्यं नमोस्तु। कीदृशाय वेदानुद्धरते मीनरूपेण श्रुतीरुद्धरते। जगंति भुवनानि वहते धारयते कूर्मरूपेण॥ भूगोलं त्रिको ४
णाकृति तया गोलकमिव भूमिमूर्ध्वं धारयते वहते वराहरूपेण। दैत्यं हिरण्यकशिपुं दारयते विदारयते नृसिंहरूपेण। पौलस्त्ये
रावणं जयते विजयमानाय रामरूपेण। हलं सीरं कलयते धारयते बलभद्ररूपेण। कारुण्यं करुणामातन्वते विस्तारयते बुद्धरूपेण

5 द्वामनइति। तदुक्तं हरिवंशे। पादेनैव पतिते तोये केशवोऽभ्रद्वामन इति। यद्वा। वामनस्य तृतीयचरणो नब्रह्मलोकं कलंघनमित्यद्भुतेऽजनकम्
अंभोऽर्णस्तोयपानीयनीरक्षीरांबुशंबरमित्यमरः॥ क्षत्रियेत्यादि हे तपरशुरामरूपजय। क्षत्रियरुधिरमये क्षत्रियशोणितविकारे पा
नीये कुरुक्षेत्रादितीर्थे जगत्स्नपयसि स्नानं कारयसि। स्नानफलमाह। अपगतपापं। उपशांतकलुषमित्यर्थः। अत एव भवस्य संसा शमिते
रस्य तापो येन तत्तथा। आधिदैवतमाधिभौतिकमाध्यात्मिकमिति तापत्रयं। अन्यदपि स्नानं बापं हरति तापं च स्त्र्यादिकृतं नाश
यतीति ध्वनिः। रुधिरमय इति विकारार्थे तत्प्रकृतवचने मयट् वितरसीत्यादि हे तद्दाशरथिरूपजय। रणे संग्रामे दशमुख
मौलिबलिं रावणकिरीटोपहारं दिक्षु दिशामुद्ददासि। बलिश्चामरदंडे स्याद्बलिः प्रत्योपहारयोरिति शाश्वतः॥ मौलिः किरीटे धम्मि
ल्ले कंकेल्लिद्रुमरत्नयोरिति विश्वः॥ कीदृशं। दिक्पतिकमनीयं। दिक्पतीनामिंद्रादीनां काम्यं इच्छाविषयमिति यावत्। एतेन तेभ्यस्त्वब
लिं ददासीति भावः। पुनः कीदृशं। रमणीयं मनोहरं। दशानामेव दशशब्दान्दृशमुखानियस्येति दशमुखो रावणः वहसीत्यादि हे त
बलभद्ररूपजय। विशदे शुभ्रे चिनिवपुषि शरीरे वस्त्रं धारयसि। कीदृशं। जलदाभं जलस्येव आभा यस्य तत्तथा। कृष्णमेघसदृशमित्यर्थः। पुनः
कीदृशं। हलहतिभीत्या लांगलाघातभयेन मिलिता या उपस्थिताया यमुनाया इव भा दीप्तिर्यस्य तत्तथा। व्रजनिजबंधुवर्गनिभालनाय वृंदावन
गतस्य बलभद्रस्य गोपसमूहैः सह मधुपानमभवत्। उन्मत्तेन च तेन स्नानाय आहूता यमुना सा च मत्तो ऽयमिति नायाता। ततश्च तेन बलेन यमुनाया आ
कर्षणं कृतमिति पुराणवार्ता। यमुनाया जलं नीलमिति श्यामवाससाम्यं। हतिर्हननं। हन हिंसागत्योः स्त्रियां क्तिन्। कित्वाद्नुनासिकलोपः।
निंदसीत्यादि। हे तबुद्धशरीरजय यज्ञविधेः क्रतुविधानस्य वेदजातं निंदसि इष्यसि। निंदाहेतुमाह। दर्शितपशुघातमिति। दर्शितः प्रतिपादि
तः पशूनां श्वेतछागादीनां बधो घातो यत्र। सदयहृदय दयाशालिचित्त। अत एव निंदा। अहिंसापरमो धर्म इति सिद्धांतो दयायुक्तः। हय
स्यतवदैत्यं पशुमालभेत्यादि श्रुतौ बोधितः तत्पशुघात तायां प्रकर्षेण निंदा भवतीति युज्यत एव। अहह हर्षादेः प्रकर्षे। अहह स्यात्परि
वे

लंक्रियत इति वार्ता। कमलाश्रीहरिप्रियेत्यमरः। तवेत्यादि। एवंभूत हे हरे तव चरणे वयं प्रणताः अतीव नम्राः इति भावयजानीहि। प्रणते
षु माहृशेषु कुशलं कल्याणं कुरु। कुशलं क्षेममस्त्रियामित्यमरः। श्रीजयदेवकवेरित्यादि श्रीजयदेवकवेरिदं मंगलं गीतविशेषो मुदं
हर्षं कुरुते विस्तारयति। अर्थात् गायतां शृण्वतां। उज्ज्वला तालानुगमेन रम्या गीतिर्गानं यस्य तत्तथा। श्रितकमलेत्यादौ निष्ठेति सूत्रेण
क्तांतस्य पूर्वनिपातः। कलितलसितेत्यादौ बहुव्रीहौ कृतनियमः इति पूर्वनिपातः। मधुमुरेति पदे मुविनाशनासनेन शङ्कयोः स्तालव्यादेत्यस
कारयोरनुप्रासो भवतीति चिंत्यं। अधुना वसंतवर्णनव्याजेन कृष्णक्रीडां वक्तुकामः साधुकविराशिषयति। पद्येत्यादि। मधुसूदन
स्य उरो वक्षः स्थलं कर्तृ वो युष्माकं प्रियमभीष्टं अनु पूरयतु संपूर्णं करोतु। कीदृशं मुरः। पद्मापयोधरतटी लक्ष्मीस्तनपरिसरस्य परिरंभणेना
लिंगनेन लग्नं यत्काश्मीरं कुंकुमं तेन मुद्रितं चिह्नितं। ममैवेदं मुरारेरनुरोरंत्वस्य इति कृत्वा लक्ष्म्या मुद्रितमिति भावः। काश्मीरं कुं
कुमं प्रोक्तं रक्तं कुंकुमकेसरमूलयोरिति विश्वः। कीदृशं व्यक्तानुरागमिव। अंतरानुरागो बहिर्विदित इव। यत्रानुरागस्य कविसंप्रदाये लोहितत्वा
म्नानात्। खेलन्नुरखेगतिं कुर्वन् यो नंगः तत्स्वेदेन सुरतायासेन घर्मजलप्रवाहो यत्र तत्तथा। पूरो जलप्रवाहे स्यात् आणसे शुद्धिरत्नवोरिति वि
श्वः॥॥ कृष्णविरहोत्कंठितायाः राधायास्तमेवानुसरंत्याः काचित्सखी कृष्णवार्तां कथयितुमाह। वसंत इत्यादि। काचित्सखी सहचरी सखी
राधामपि वक्ष्यमाणमूचे वदति स्म। उक्तवती ब्रूञ्धातुर्द्विकर्मक इति द्विकर्मकत्वं। सरसे सविलासं स्यादेवं। वसंते मधुकाले। कीदृशी। वासंतीमा
धवीलता तस्याः कुसुमानि तद्वत्कोमलैरंगैर्लक्षिता। इत्थंभूतलक्षणे इति तृतीया। पुनः कीदृशी। कांतारे दुर्गमपथि भ्रमंती गच्छंती। बहुविहितं
वारंवारं कृतं हरेर्व्याहारेण कृष्णानुसंधेयया। अमंदमुत्कंठयथा भवति कामवातौघ्रो दितीमनस्तापो द्युस्तया ता। बलेलाउहं छेलीबाधापीडा
यस्याः सा। चलद्राधामित्यपि पाठः। तत्र चलंती राधा शरीरव्यापिनी पीडा यस्या इत्यर्थः। वासंती माधवीलतेत्यमरः। कांतारो वर्त्म दुर्गमभि 	५
ति च। सहयोगेन चरती ति चरेष्टः। टिड्ढाणञित्यादिना ङीप्। पूर्वोक्तमर्थं गीतेनाह। ललितेत्यादि गीतस्यास्य वसंतरागो रूपकतालः
रागलक्षणं तु। शिखंडिबर्होच्चयबद्धचूडः पुष्णन्पिकं चूतलतांकुरेण। भ्रमन्मुदा वासमनंगमूर्तिर्मतो मतंगस्य वसंतरागः। हे सखि सरस

धृतकुंडलयेन धृतकुंडल ए इति गीतस्यानुप्रासः ।

6

म्लेच्छानां यत्समूहं मूर्छयते विनाशयते कल्किरूपेण । अत एव दशाकृतिकृते दशविधरूपधारिणे श्रीपदे शतं तं चतुर्थं तत् कविरिदानीं म
गलगीत्यास फलं विघ्नोपशान्त्यर्थं हरिं स्तौति । श्रितेत्यादि गीतस्यास्य गुर्जरीरागः प्रतिमाठतालः रागलक्षणं च । श्यामा सुकेशी मलय
द्रुमाणां मृदुस्वरूपसत्पल्लववतल्पजाता । श्रुतेः स्वराणां दधती विभागं तन्त्रीमुखाद्दक्षिणगूर्जरीयमिति देवहे हरेजयजय । स शरणपतितजनोद्धारेण
सर्वोत्कृष्टो वर्धस्वेत्यर्थः ॥ आदरात् द्विरुक्तिः । यथा मम मोन मा शिवायेत्यादि । यद्वा संभ्रमरूपेण गीतत्वात् द्विरुक्तिः ॥ श्रितकमलाकुचमंडल । श्रित
माश्रितं कमलायाः लक्ष्म्याः कुचमंडलं येन । कलिता धृता ललिता मनोज्ञा वनमाला पुष्पदाम येन । आपादप्रवणां मालां वनमालेति
तां विदुरिति शाश्वतः । दिनमणीत्यादि । पुनः कीदृश । आदित्यमंडलालंकारकारक । नद्यादित्वात् ल्युः ॥ दिनमणिः रश्मिः दिनप्रणी
रिति हारावली । भवस्य संसारस्य विच्छेदक । मुनिजनानां मनुप्रभृतीनां मानसानि चित्तानि सरांसि च तेषु हंस इव । यद्वा मुनिजनानां मान
सेषु हृदयेषु हंसः परमात्मरूपपरब्रह्मस्वरूपेत्यर्थः ॥ हंसो विहंगभेदे स्यात्परमात्मनि योगिनीति विश्वः । कालियेत्यादि कालियनाम्नः
सर्पस्य गंजक हिंसक । जनानां रंजन आह्लादक । यदुकुलं यदूनां वंशो नलिनं कमलमिव तत्र दिनेशः सूर्य । प्रकाशकत्वात् । वा पुंसि पद्मं नलि
नमरविंदं महोत्पलमित्यमरः । मधुमुरेति । मधुश्च मुरश्च नरकश्च तेषां दैत्यानां विनाशन घातक । गरुडासन । गरुडश्च पक्षिराजः स एवा
सनमुपवेशनं यस्य सः । सुरकुलानां देववंशानां केलेः क्रीडायाः निदानमादिकारणं । निदानं त्वादिकारणमित्यमरः । अमलेत्यादि
अमलकमलदलवन्निर्मले पद्मपत्रमिव लोचनं चक्षुर्यस्य । भयस्य जन्मनः मोचन खंडक । त्रीणि च तानि भुवनानि चेति त्रिभुवनं तद्भव
नमिव गृहमिव तत्र निधान निधिरिव । आनंदजनकत्वाद् अनिर्वचनीयत्वाद्वेत्यर्थः । पत्रं पलाशं छदनं दलं पर्णं छदः पुमानित्यमरः ॥ निधा
नं त्वालये निधाविति विश्वः । जनकेत्यादि जनकसुतायाः सीतायाः तया वा कृतभूषण विहितालंकार । जितो दूषणो नाम राक्षसो येन
यद्वा जितं दूषणं पापं येन निःपाप इत्यर्थः । समरे संग्रामे शमितो मारितो दशकंठो रावणो येन । अभिनवेति अभिनव जलधर वत् नी
लमेघवत् सुंदर मनोज्ञ । धृतो मंदरो गिरिविशेषो येन । श्रियो लक्ष्म्या मुखं चंद्र इव तत्र चकोर पक्षिविशेष । चकोरेण हि हिमकरमंडलम

गा ६

मदनमहीपतेः कामनृपस्य कनकदंडस्य सुवर्णघटितदंडस्य कुत्रस्य रुचिरि वरुचिः शोभा यस्य केसरकुसुमस्य सं तथा। तस्य विकासप्राचुर्यं यत्र ता
दृशा केसरकुसुमं विकाशयतीति कर्मण्यण् प्रत्ययः। कनकं हेम हाटकमित्यमरः। केसरो बकुलो नागकेसरं स्कंधवालकमिति धरणिः। पुनः। मिलि
ताः संगताः शिखीमुखाः भ्रमरा ये पुतेः पाटलपटलैः पाटला पुष्पसमूहैः कृतो विहितः स्मरतूणविलासः कामतूणीरचेष्टितं यत्रात्तूण[illegible]पक्षे
ते शिलीमुखाः। तथा चामरः। अलिबाणौ शिलीमुखाविति। पुनः। विगलिता चासौ लज्जा चेति कर्मधारयः सा विद्यते यस्य तदस्य संजातं ता
रकादिभ्य इतच् (बाणः) इतीतच् प्रत्ययः। यद्वा। लज्जितं लज्जा भावे क्तः। विगलितलज्जितं यस्य जगतो वलोकनेन तरुणकरुणेषु वकरुणाहृद्यैः पुष्पविका
सव्याजेन कृतो हासो यत्र। हासस्य श्वेतत्वात् तरुणकरुणपुष्पसाम्यं। श्यामस्तु शृंगारः श्वेतो हास्यः प्रकीर्तित इति भरतः। यद्वा। तादृशावलोकनेन त
रुणकरुणा नि नवीन करुणाकुसुमान्येव कृतो हासो येन वसंतेन यस्मिन्वा। यद्वा। तादृशावलोकनेन तरुणैः कारुण्येन कृतो हासो यत्र। करुणाभाव
प्रधानो निर्देशः। गतलज्जस्य कलजनावलोकने हि तरुणायुज्यंत एव साधूनां हासश्च तारुण्यादेवेति। करुणः सुवसे वृक्षे कृपायां करुणामतेति वि
श्वः। पुनः। विरहिणां वियोगिनां निकृंतनाय छेदनाय कुंतमुखाः कुंतिनिस्त्रिंशोपसदृशैः केतकैः केतकीपुष्पैः दंतुरिता व्याप्ता दिशो यत्र। यद्वा।
निकृंतयतीति निकृंतनः। नंद्यादित्वाल्ल्युः। वि[illegible]रहिनिकृंतनश्चासौ कुंतमुखाकृतिश्चेति कर्मधारयः। तादृशकेतकदलेन दंतुरिता आशा यत्र।
निकृंतनमित्यत्र नुमागमाभावश्चिंत्यः। केतकशब्दो कारांतोपि। केतकाधानहेतोरिति मेघसंदेशे। पांतु त्वामकठोरकेतकशिखासंदिग्धमुग्धेंद
व इति मालतीमाधवे दृष्टांतत्वात्। केतकि दंतुरिताशे इति क्वचित्पाठः। तत्केतकीशब्दे घि चेति स्त्रे त्रे मलुरअशाद्भवत् ह्रस्वत्वे। दंतुरमितो दंतुरितः
अन्यस्मिन्नपि मुखे दंतुरित्वमुन्नतदंतयोगित्वं भवतीति धानिः। निम्नोन्नतेतथा व्याप्ते दंतुरं कथ्यते बुधैरिति धरणिः। अत्रापि हासाशाशब्दयोः ६ राम:
दंतुरताव्यश्चाकारयोः अनुप्रासश्चिंत्यः। पुनः की। माधविकायाः वासंत्याः परिमलेन गंधेन वलितेमनोहरे। वासंती माधवीलतेत्यमरः। अस्योपिमा
धवीनाम नायिका तस्याः परिमलेन विमर्दनजगंधेन ललितो मनोज्ञो विलसितो वा भवतीति ध्वनिः। परिमलो गंधमात्रेपि विमर्दोत्थेपि सौरभ
इति धरणिः। ललित इति लल विलासे क्त प्रत्ययः। पुनः की दृशेन वमालिका नेवारीति प्रसिद्धा जातिः स्वनाम्नैव प्रसिद्धा ताभ्यां सुगंधौ शोभनगं

वसंते मनोहरमधुसमये हरिः कृष्णो विहरति क्रीडति। युवतिजने न समं सह नृत्यति च। कीदृशे वसंते। विरहिजनस्य वियुक्तलोकस्य दुरंते दारुणे
निरवधौ वाचकारो त्राध्याहर्तव्यः। सकलपुष्पादिरसेन सह वर्त्तत इति सरसः इति वा। युवतिजने नेति ज्ञात्यन्नि आयमेवैकवचनं। दुःखेनांतो यस्य
तद्दुरंतः। कीदृशे वसंते। ललितायामनोहरायाः लवंगलतायाः लवंगशाखायाः परिशीलनेन संबंधेन कोमलो मनोहरो मलयसमीरो मलयानिलो य
त्र। एतेन वातस्य सुगंधित्वशीतलत्वाल्पत्वानि दर्शितानि। लवंगलतां परिशीलयति चालयति। इति नंद्यादित्वाल्ल्युः। लताभ्योतिष्मती इक्का
शाखा वल्ली प्रियंगुर्धितिविश्वः। कोमलो मृदुसुंदरा विति चार्थनिरुक्तः लवंगलताकांतामलयसमीरो नायकस्तयोराश्लेषस्तनौत्कर्षश्चोद्दीय
ते। पुनः कीदृशे। मधुकरनिकरेण भ्रमरवृंदेन करंबिते मिश्रिते कोकिलैः कूजितं कुंजा एव कुटीरो अल्पा कुटी यत्र। यद्वा। कुंजनं कुंजः नमितः प्राप्तस्ए
वंभूतः कुंजकुटीरो यत्र। ह्रस्वे कुटीशमीशुंडाभ्यो रइति रप्रत्ययः। अल्पा कुटी कुटीरः स्यादिति शाश्वतः। मिश्रिते पिकरंबितमिति च। पुनः कीदृशे। उन्म
देत्यादि। उन्मदः उन्मदनो हर्षकामो यत्र। एवंभूतो मनोरथो यस्य पथिकवधूजनस्य तेन जनितउत्पादितो विलापः परिदेवनं यत्र। अथवा उन्मदद्व म:
नेन हेतुना रुद्धत्वा यो मनोरथः कांतसमागमवांछा तेन युक्तानां पथिकवधूजनानां जनितो विलापो येन। यद्वा उन्मादमदनस्य मनोरथेन वांछया
पथिकवधूजनजनितो विलापो यत्र। विलापः परिदेवनमित्यमरः। पुनः कीदृशे। अलिकुलैर्भ्रमरसंघैः संकुलो व्याप्तः कुसुमसमूहो यस्तेनानि
राकुलो व्यक्तो बकुलानां कलापः समूहो यत्र। यद्वा। तादृशो बकुलः कपोलो भूषणं यस्याः। तथा चामरः। कलापो भूषणे बर्हे तूणीरे संहतेपि
च। बकुलः भ्रमरालयइति मृगमदेत्यादि मृगमदः कस्तूरी तस्य सौरभरभसवशंवदसुरनितामोदस्यायत्तताभ्यादिनो नवानूतनानां दलमालापत्रश्रे
णीयेषां ईदृशास्तमालास्तापिच्छतरवो यत्र। नूतनपत्रस्तमालो मृगमदगंधमनुकरोतीति। मृगनाभिर्मृगमदो गंधशेखरमवीति हारावली। वशंवदइ
ति। प्रियवशे वदः खजिति खजुप्रत्ययः। वित्यन्त नत्ययस्येति मुमागमः। पुनः कीदृशे। युवानश्च ते जनाश्चेति तेषां हृदयं तद्विदारयतीति नंद्या
दित्वाल्ल्युः। एतादृशो यो मनसिजः कामस्तस्य नखस्येव रुचिर्यस्यैवंभूतानां किंशुकानां पलाशकुसुमानां जालः समूहो यत्र। यद्वा। युवजनानां
वियुक्ततरुणानां हृदयविदारणाय मनसिजस्य नखानां रुचिर्यस्यैवंभूतः पलाशजालो यत्र। पलाशकुसुमानां वक्रत्वात्। यद्वा। तादृशः किंशुक
जालं किंशुककलिका यत्र। जालं तु कोरके संघे जालगवाक्षेनाये इत्यपीति विश्वः। क्षारकेजालकं क्लीबे कलिका कोरकः पुमानित्यमरः। पुनः कीदृशे।

र्णप्रसारकतया धूर्त्तवंचकलोकरीतिः। केतकी रूपनायिकासंभोगविघ्नं धारनु मंदानिलो मल्लिकामनुसर्पन्नु तथा चूर्णमुष्टिर्निर्हतः काननेषु परिभ्रम
न्निजावमानेन संततं कं वा न संतापयतीति क्षुद्रकार्यसमारोपरूपा समासोक्तिरलंकारः॥ पथिकैर्निरंतरविदेशसंचारितया परंतत्रैरमीभिः कल
जनविविधावस्थापादकतया अतिप्रसिद्धा वासरा निजगृहवसतिदानहेतुतया श्लाघनीयादिवसा नीयंते एकैकं क्षणं युगप्रायं मन्यमानाः नैकम
पि दिवसं नीतवंतस्ते ला दृशा मनेकानू कथं नु नेष्यंति किंतु अतिवाहनाध्यवसायमात्रमाचरंतीति भावः कथमेवं वासरा दुरतिवाहते त्यत आह
[illegible] मधुगीति उद्गच्छन्माध्वीकसौरभे। लुब्धैः सतृष्णैः मधुपैः भ्रमरैः व्याधूतेषु कंपितेषु चूतांकुरेषु क्रीडतां कोकिलानां कलकलैः सूक्ष्माव्य
क्तमधुरकोलाहलैः कूजनकत्वेन उद्दीर्णः प्रकाशितः कर्णज्वरः श्रवणोपतापो येषु दिनेषु ते कथं नीयंत इत्यत आह। ध्यानेत्यादि। ध्यानेन चिंत
नेनानुध्यानमेकचित्ततातया लवणप्राप्तया अल्पकालमनुभूतायाः प्राणसमायाः जीवितसदृशकांतायाः समागमरसेन संबंधस्वरूपरसेनोल्लासेर्हर्ष
हेतुभिः। यद्वा। पथिकविशेषणमेव हेतुविशेषणमिदं। मधु पिबतीति मधुपः। आतोनुपसर्गे कः। व्याधूत इति धूञ् कंपने क्तः। आम्रश्चूतो रसालो स्त्री
त्यमरः। अंकुरो भिनवोद्भिदित्यपि। कलकलस्तु कलैः स्यात् ध्वनौ तु मधुरास्फुटे [illegible] इत्यमरः। उद्दीर्ण इति गॄ निगरणे क्तः तरद्धातोरिती त्वं रपरत्वे चारदा
भ्यां निष्ठातो नः पूर्वस्य चदः इति निष्ठातकारस्य नत्वं। पांथः पथिक इत्यपीत्यमरः। वा तु क्लीबे दिवसवासराविति च॥ भावनाबलजन्यज्ञानेन विरहिणां
कांताविषयीकृत्य बोध्यं तत इति प्रसिद्धमिति॥ ।विरहविधुरायैः राधायै माधवं सखी दर्शयति। अनेकेत्यादि असौ सखी पुनरिदं गीतेवस्यमाणं
राधिकामाह उक्तवती। कीदृशी। आराद् दूरे समक्षं यथा स्यात्तथा मुरमुपदर्शयंती ज्ञानविषयं कारयंती। कीदृशं हरिं। अनेकनारीणां परिरंभसंभ्रमे
णालिंगनादरेण स्फुरन्नितस्ततो गच्छन्नुद्दीप्यमानः स चासौ मनोहारिलीलाविलासलालसा वांछा यस्य तं। संभ्रमं त्वरायामिच्छंति भयमुद्वेगमादरमितिशा
श्वतः। मुरो दैत्यविशेषस्तस्यारिः शत्रुः। आराद्दूरसमीपयोरित्यमरः। अमुमेव श्लोकार्थं गीतेनाह। चंदनेत्यादि। गीतस्यास्य रामकरी
रागो रूपकतालः। रागलक्षणं तु। स्वर्णप्रभाभास्वरैर्भूषणैश्च नीलं निचोलं सुतनो वहंती। कांतपदोयांतमधिश्रितेपि मानोन्नता रामकरी प्रदिष्टेति। ७
हे विलासिनि शृंगारभावजनितविकारशतिराधे इह मुग्धवधूनिकरे मनोहरतरुणीवृंदे हरिर्विलसति केलिः क्रीडां करोतीत्यर्थः। कीदृशः। केलिपरे

एकि २ दिहदि५

घघुकोगंधस्येदुत्पत्तिसुरभिमध्ये समासांतः। बेनेमाल्लिकाशब्दाकारस्य कालो ह्रस्व इति ह्रस्वत्वं। यद्वा नवमालिकाकुसुममधु ल्पते। यद्वा नवमालि
8 कायाः जातिर्नमतयाः। मनोगं वो यत्र जातिरिति जातीस्त्राढु भेदेस्त्रियां किन्। आजनो दुति आदेशः। केचित्तु यकारमेतस्य पठन्ति तत्पक्षे नवमालि
कया हेतुना तया सुगंधकुलमित्यर्थः। सुगंध एव। पुनः की॰ मुनिमनसामपि कृषिचित्तानामपि मोहनकारिणि मदनके। अन्यजनचित्तानि स्वभावतये
व मोहयति तत्वज्ञानवतामपि मनांसि यो वसन्तो मोहयतीति माहात्म्यं दर्शितं मपिशब्देन तरुणानां मूनां अकारणबंधौ सहजबंधौ। कृष्णविहरती
ति स्याने माह॥ ॥स्फुरदित्यादि। हे सखि वनविपिने वृंदावनाभिधवने हरिर्विहरतीत्यन्वयः। स्फुरंत्याः शोभमानायाश्चल्ल्या वा अतिमुक्तलताया वा
संतो। लतायाः परिरंभणेन आलिंगनेन मुकुलितः पुष्पितः पुलकितो हृष्टश्चूतो यत्र। यद्वा मुकुलमेव मुकुलितं भावे क्तः। तत्पुलकितरोमांचितं विधते
यस्य। संजातं तारकादित्वादितच्। एवं भूत चूतो यत्र एतेनातिमुक्तलताया माधविकायाः चूतस्य नायकत्वं आलिंगनरोमांचाभ्यां च कामविकारः सूचितः।
तथाहि। कंपः स्वेदो हि रोमांचः अथ भावं गतस्य चे। आविर्भवति नारीणां मनुरागवशात्मना अभितिमरंतः। विपिने कानने वने मित्यमरः। की॰ दृशे वने। परि
गतेन सरे पर्यंतभुवि पदिसबनो भावे न यमुनाजलेन हृते पावित्रे एतेनस्यानस्य क्रीडायोग्यता दर्शिता॥ ॥श्रीजयदेवेति। श्रीजयदेवकवेरिदं भणितिं कर्तृ उदय
तिउत्स्त्री नवति। की॰ दृशं हरिचरणस्य स्मृतिरनुचिंतनं सारो यत्र। सारो बलेन्याय्ये वा। पुनः की॰ दृशं। सरसं रससहितं वसंतसमयवर्णनं यत्र। पुनः की॰ दृ
शं। अनुगतः संलग्नो मदनविकारः कामविकारो यत्र। यद्वा सरसश्चासौ वसंतश्चेति योज्यं। अथ वियोगिनां सदुःखं स्थायुक कथितवर्णयन्नाह॥ ॥दरविग
लितेति। इह वसंते गंधवहो वायुः अरितो द्रहति अर्थाद्विरहिणो। किं कुर्वन् कामनाभिवनानि वासयन् सुरभीकुर्वन्। दरविदलितया ईषद्विकसितया मल्लि
मालिकायाः वल्लिलतायाः चंचद्भिरुच्छलद्भिः परागैः पुष्परेणुभिः प्रकटितपटवासैः स्फुटीकृतपटवासः इत्यैरनेकपटवासचालनेनाल्पत्वं दर्शितं। पुनः
की॰ दृशः केतकीगंधबंधुः केतकीपुष्पसौरभसहचरः तेन सौरभत्वं कथितं। पुनः की॰ दृशः प्रसरतः प्रकटीभवतो स्मरबाणस्य कामस्य प्राणवत् प्राण
इव। अथवा प्रसरता कामवाणेन प्राणवत् श्वासो गंधवाहस्येति कर्मधारयः। वसंत वायोश्च स्वभावादेव शीतलत्वं। अतएव शीतलेनापि दक्षिणानिले
न दाहकत्वमिति चित्रं। रवदर्थे दरोव्ययमिति विश्वः। परागः कौसुमे रेणौ स्नानीयादौ रजस्य पीत्यमरः। हिर्हेतावधारणे इति च। इहैव चेतो दहतीत्यर्थः। पंच
बाणत्वादेवास्मरबाणत्वं। उन्मादनं तरतेन हर्षणश्च प्रसह्य नो मोहनो मूर्छनस्तथा। विरूपणश्च कामस्य शराः पंच प्रकीर्तिताः। प्राणनामपि वा श्रमनत्वेनगी
नवहत्वं युज्यत इव। वसंतदिवसानामनंगोद्दीपकतया विरहिणां दुःसहत्वं वर्णयन्नाह॥ ॥उन्मीलन्मधुगंधेति। अमी वसंतसंबंधिनो दिवसाः पांथि
कैः पांथैः कथं कथमपि अनिर्वचनीयप्रकारेण कष्टसाध्या वा नीयन्ते प्रेर्यंते। इत्वंघ्यताहेतुमाह। की॰ दृशाः उन्मीलन्मधुगंध - - - - - - -

ति २

विनोपलक्षिततीरे। यद्वा। यमुनायाः जलं यमुनाजलं तस्य तीरे। मंजुलो मनोहरो वंजुलो बकुलो वेतसो वा यत्र कुंजे। तत्र गतं मिलितं। कुतुकेपि कुतूहलमपि ... त्यनया। चकारः पूर्वापेक्षया समुच्चयार्थः। मनोज्ञं मंजुमंजुलमित्यमरः। वंजुलो बकुलेरण्यातो वंजुलो वेतसे मत इति धरणिः। दुकूलं पट्टवाससी। तिचा वनं काननतोययोरिति च। केचित्तु दुकूले इति कर्मपदं तेन दुकूलेन हीत्वा हरिमाश्लिष्टवती। इहोपविशेंकृत्वा हरिमात्मसमीपं निनायेत्याद्युः॥ तत्र गृहीत्वेत्यध्याहार्यस्य गौरवपरास्ततया न रुचिरत्वं जायते। काचित्तरुणी कूलेन प्रशशंसे। प्रशंसिता। कीदृशी। रासरसे गोपक्रीडानुरागे सह नृत्यपरा। कृष्णसहकालं नृत्यंती। ... कीदृशी रासरसे। करतलयोर्हस्तयोस्तालेन चपेटध्वनिना तरलया चंचलया वलयावल्या कटकश्रेण्या कलितः संयुक्तः कलस्वनवंशो यत्र मधुरशब्दसहित वेणुर्यत्र। तलश्चपेटेतालश्च स्वरूपानूर्द्ध्वयोस्तलमिति शाश्वतः। रासः कोलाहलध्वाने क्रीडायामपि गोदुहामिति विश्वः। कटकं वलयमानावित्यमरः। प्रशंसा तु साधिदं नृत्यतीत्येवंरूपा। एकएव कृष्णो नेकासां प्रीणको जात इत्याह। श्लिष्यतीत्यादि। कामपि गोपीं श्लिष्यति आलिंगति। कामपि रामां चुंबति। कामपि रमयति क्रीडयति। सस्मित चारुहासमनोहरं स्यादेवं परां श्रेष्ठां पश्यति। अपरामन्यां रामां तरुणीं सुदृक्षिणीवा अनुगच्छति पश्चाद्यातीत्यर्थः। रामा योषिन्नितंबिनीत्यमरशेषः। सुदक्षिणो मतो रामो रामा योषित्प्रकीर्तिते तिधरणिः। श्रीजयदेवकवेरिदं श्रुयाराहित्येन युगपत्सर्वासां केलिनाप्रीणनादाश्चर्यकरं। पुनः कीदृशं। विपिनविनोदकलया वनविहारकौशलेन वलितं संभकं। कचित्तु वृंदावनविपिने वलितमिति पाठः। तत्र वृंदावननाम्नि वने वलितेना नारसाक्तमित्यर्थः। पुनः कीदृशं। यशस्यं यशसे हितं साधु वा तत्र हितमिति यत्॥ चलित्वाक्षी गुर्वे ८

अधुना राधायै कृष्णकेलिप्राचुर्यं पुनः कथयितुमाह॥ विश्वेषामित्यादि। हेसखि राधे। मधौ वसंते मुग्धो मनोहरो हरिः क्रीडति। क इव। मूर्तिमान् शरीरी शृंगाररस इव। किं कुर्वन्। अनुरंजनेनानुरागेण विश्वेषां वधूजनानां संसारिणां वा आनंदं हर्षं जनयन्नुत्पादयन्। पुनः किं कुर्वन्। इंदीवरश्रेणी नीलनलिनमाला तद्वच्छ्यामलकोमलैः कृष्णमनोहरैरंगैरवयवैरनंगोत्सवे काम हर्षमुपनयन् उपस्थापयन्। कीदृशः। स्वच्छंदं ब्रजसुंदरीभिः स्वतंत्रगोपीभिः अभितः सर्वतोभावेन प्रत्यंगं प्रत्यवयवे आलिंगितः। गोपीभिरेकदालिंगनेन यथायदंगं प्राप्तं तया तदेवालिंगितमिति प्रत्यंगमालिंगितो भवति। कश्चित्तु स्वच्छंदमिति आलिंगनक्रियाविशेषणं भिन्नमेव पदमित्याह। शृंगारोपी दृश एव भवतीति तत्रापि सर्वं योज्यं॥ ८

१ क्रीडापरायणो। किं॰ हरिः। चंदनेनमलयजेन चर्चितमनुलिप्तं नीलंश्यामंकलेवरंयस्य। पीतंपीत वर्णंवसनंवस्त्रंयस्य। वनमालायस्यास्तीति। ततः प्रत्येकंक
र्मधारयः। यद्वा। चंदन चर्चितंनीलकलेवरंचवनमालाचएता निविद्यंतेयस्यसतथा। अतइनिगनावितितपरकरणदाकारांतादपीनिप्रत्ययः॥
कीदृशः। केलिनाचलतीमणियुक्तेकुंडलेताभ्यांमंडितंगंडयुगलंयस्य। स्मितशालीईषद्धासवान्। अत्रापि कर्मधारयः। कलेवरंशरीरेपिवाद्य
भांडेकलेवरमितिधरणिः। वसनंवस्त्रमित्यपि। स्मितमिति। स्मिङ्ईषद्धसनेक्तप्रत्ययः। केचित्तुस्मितमीषद्धासंविद्यतेअस्येत्यर्थेशालिनिनिप्रत्य
यस्तद्धिताधिकारीयइतिवदंति। मुग्धोववरस्नुषावितिविश्वः। वधूर्जायास्नुषास्त्रीचेत्यनेकार्थवर्गेअमरपाठात्। सामान्यस्त्रीवाचकोवधूशब्दः। यद्वा। के
लिपरः परमपुरुषार्थोयस्यतस्मिन्सः। अन्योन्यनिर्भरविलासेयुगोपीनांचेष्टितमाह। ।पीनेत्यादि। काचिद्गोपवधूःपीनमौपयोधरभारभरेणविपु
लकुचगौरवातिशयेनसरागंसानुरागंयथास्यात्तथाहरिंपरिरभ्यरूलमालिंग्यउद्दंचितपंचमरागंउत्तेजउर्द्धकृतपंचमाख्यरागस्यपश्चाद्गायतिगानं
करोति। कुलेचशागुद्यरितःपंचमरागःतदनंतरंतयागीतमितिभावः। श्रृंगारेपंचमस्वरवाहुल्यमितिशास्त्रकथितं। तथाचभरतः। मध्यंपंचमभूयिष्ठ
हास्यश्रृंगारयोर्भवेदिति। पंचमोरागभेदेस्यात्पंचानामपिपूरणे। पंचमश्चतुरेहृद्येपंचमीपांडवस्त्रियामितिविश्वः। काऽपिव्यवहितामुग्धवधूर्मनो
हरयुवतिःअधिकमतिशयितंयथास्यात्तथादेवंमधुसूदनवदनसरोजंकमलमुखकमलंध्यायतिचिंतयति। ध्यैचिंतायांधातुः। कीदृशं। विलासविलो
लयोः कलास्वतिलक्षयोः विलोचनयोश्चक्षुषोः खेलनेनसंचरणेनजनितउत्पादितःमनोजःकामोयेनसतथातं। खेलनमिँखेलसंचारेल्युट् तिद्
शंबरारिर्मनसिजइत्यमरः। वक्रास्येवदनंतुंडमाननंलपनंमुखमितिच। सरसिजातेसरोजं। जनेर्डःइतिडः। काऽपिनितंबवती स्त्रीदयितंप्रीतं
कूलंकपोलतलेगंडदेशेचारुमनोज्ञंयथास्यात्तथाचुचुंब। चुंबितवती। किमपिकार्यंलपितुंवक्तुंश्रुति मूलेकर्णमूलेमिलितासंलग्ना। निःकंपकांतचुंब
नंहिसखीजनहासस्यकरमितिव्याजेनतदारब्धमिति। कपोलतलेकीदृशे। पुलकैरोमोद्गमैरनुकूले। कांतप्रेमकथके। एतेनकस्याऽपितदीयसं
गमात्सात्विकभावोजातइत्युक्तं। स्वरूपानूर्द्धयोस्तलमित्यमरः। श्रुतिःश्रवणवेदयोरितिधरणिः। काऽपिचगोपीहस्तेनामुंचंतंदुकूलेपट्टवस्त्रेय
चकरतआकृष्टवती। केनहेतुना। केलिकलाकुतुकेनअत्यन्ततयाश्रृंगारार्थधार्ष्ट्येनवास्वयमेवाकृष्टवतीतिभावः। यमुनाजलकूले। कालिंद्यावि
स्वेदस्तंभोथरोमांचःस्वरभंगोथवेपथुः। वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकाःस्मृताः॥२३

लोहृ॥ ॥इति श्रीमज्जगद्धरविरचितायां गीतगोविंदटीकायां सारदीपिकायामाद्यः सर्गः॥ ॥अधुना राधा हरौ भावातिशयं परिहातुमसमर्था सखी माह॥ विहरतीत्यादि॥ राधा सखीं रहो गोप्यं गीते वक्ष्यमाणमुवाच॥ उक्तवती। वचधातुर्द्विकर्मकः। का हृशी। वृंदावने हरौ क्रीडति सति ईर्ष्यावशेनासहिष्णुतात यात्र च चलिता। कीदृशे हरौ साधारणप्रणये अन्यगोपीतुल्यप्रेम्णि। कुत ईर्ष्या इत्यत आह। विगलितनिजोत्कर्षात्। अहमेवातिप्रणयिनीति बहुमानाभावात्। का हृशी। क्वचिदपि लताकुंजे लीना। कुत्रापि लतापिहितो दूरस्थदेतिरोहिता। यद्यपि कुंजश हे न लतापिहितगृहमुच्यते लताशब्द इहेत्यर्थः। तथापि तृणादिरहित निरासार्थं लतापदोपादाने। अत एव निकुंजमकुंजौ वा क्लीबे लतादिपिहितोदर इत्यत्रापि अदिशब्देन तृणादिपरिग्रहः कोषे। का हृशी। कुंजे गुंजतो कलं ध्वनतो मधुव्रतानां भ्रमराणां मंडलीभिः संघैः मुखरो वाचालः शिखरस्य अग्रभागो यस्य। कीदृशी नापि सोत्कर्षप्रणयवती। मांतिरस्कृत्यान्यगोपीषु तुल्यप्रणयो हरिरिति दुःखिता भित्यर्थः। यद्यपि दीनात त्परिहासादिनावशीकृत हृदयात कुलीकार्तया तस्मिन्निति भावः। प्रणयः प्रेम्णि विश्वासे याच्ञा प्रणययोरिति विश्वः। अन्यतरति। अर्थादिभ्यस्तस्यु पसंख्यानं सप्तम्यां तसिः। मधुकरो मधुव्रतः षट्पदस्त्र भ्रमरालय इत्यमरः। स्यान्मीडले द्वादशराजकेच देशे च बिंबे च कदंबके चेति विश्वः। मंडलं त्रिष्वित्यमरात्त्रिलिंगता॥ श्लोकोक्रमेवार्थं गीते नस्फोरयति संचरदित्यादिना गीतस्यास्य गुर्जरीरागः रूपकतालः मम मनः कर्तृ हरिं स्मरति ध्यायति। कीदृशं। इह रासे गोपकेलौ यो विहितविलासं तक्रीडं। पुनः कीं। कृतपरिहासं विहितविभ्रमं। पुंरीं। संचरतां उद्धतां अधरसुधा मधुरेण धरामृतमनोहरेण वध्वनिना नादेन मुखरितः शब्दितः मोहननामा वंशो येन। मोहयतीति मोहनः। नंद्यादित्वात्ल्युः। यद्वा। संचरदधरसुधा मधुरध्वनिर्यथास्यात्तथा मुखरितो मोहकारी वंशो येन तं। पुंशं। चलितं मौलिनां दृगं चलमपांगो यस्य। चंचलश्चपलो मौलिः शेखरो यस्य। कपोले गंडे विलोलश्चंचलो वतंसः कर्णपूरं यस्य। कर्म्यात्ययेकर्मधारयः। अवतंसो वतंसः। वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः। टापं चापि हलंतानां दिशा वाचा सुधा गिरा। इत्यकारलोपः। पीयूषममृतं सुधेत्यमरः। अपांगो प्यथां चलमिति धरणिः। मौलिः किरीटे धम्मिल्ले इति विश्वः। चंद्रकेन विचित्रवर्णचिह्नेन चारूणां शोभमानानां मयूरशिखंडकानां मयूरपिच्छानां मंडलेन समूहेन वलयितो वलयाकारेण वेष्टिताः केशा यस्य तं। गोपबालकानां शोभार्थं मयूरबर्हैः केशा बध्यंते अत एव प्रचुरेण विस्तीर्णेन पुरंदरधनुषा शक्रचापेनानुरंजितः विचित्रो मेदुरः सांद्रः स्निग्धो यो मुदिरो मेघस्तस्येव पीतं वसनं वस्त्रं यस्य तं॥ अनुगता आश्रिता मुनयो मनुजा लोकाः सुपदेवा असुरा राक्षसा अथ एते वराः श्रेष्ठाः परिवाराः परिजना यस्य। यद्वा। अनुगमेषु मुनिमनुज

सिंदको निंद्रकारी यश्चंदनतिलकं दृशो ललाटो यस्येति। पुनः कथं भूतं हरिं पीनो घनो कठिनो स्तनौ कुंचौ तयोः परिसरो विस्तारस्तत्र मर्द्दने पीडने तेनाभिद्वयं दमारहितं हृदयकपाटं यस्येति॥ ॥मणिमयेति॥ पुनः कथं भूतं हरिं। मणिमयस्य सुवर्णस्य यो सौ मकरो मत्स्यविशेषस्तेन मनोहरौ मनोज्ञौ कुंडलौ ताभ्यां मंडितं अजंकृतं गंडयुगं यस्येति पुनः कथंभूतं हरिं। × २=

10

श्रृंगारः स्वरभेदे स्यात् रसे च गजमंडने इति विश्वः। पुंसः स्त्रियां स्त्रियाः पुंसि संभोगं प्रति या स्पृहा। श्रृंगार इति स ख्यातो रतिक्रीडादिकारणमिति वा। श्यामो भ
वति श्रृंगारः सितो हासः प्रकीर्त्तित इति भरतः। विश्वशब्दः सर्वपर्यायः। संसारवाची वा। इंदीवरं तु नीलेस्मिन्नित्यमरः। कालः श्यामलमेचकाविति च। ब
लं गोयः समूहः योरितिविश्वः। मूर्त्तिः काठिन्यकाययोरिति च। मधुश्चैत्रो मधुर्दैत्यो मधुकोपि मधुर्मत इति शाश्वतः। प्रत्यंगमिति वीप्सायामित्यव्ययी
भावः मलयानिलस्य दुःसहत्वे हेतुमाह॥ अद्येत्यादि। अद्य इदानीं वसंतसमये श्रीखंडशैलानिलो मलयाचलपवनः। उत्संगे क्रोडे वसंतो व
तिष्ठमाना ये भुजंगाः सर्पास्तेषां कवलक्लेशाद्भासोपतापादिव ईशाचलं हिमगिरिं प्रालेयप्लवनेच्छया तुषारमज्जनेच्छया अनुसरत्यनुगच्छति। इव श
ब्द उत्प्रेक्षाभिव्यंजकः। तदुक्तं। मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृश इति। उत्प्रेक्षालंकारोयं। य
था। अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा। अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्बुधा इति। न केवलमिदमेवेदमिति तावदपरमुक्तमित्यत लो॰
आह किं चेत्यादि। किं च पक्षांतरे। पिकानां कोकिलानां गिरो वाण्य उन्मीलंति उद्गच्छंति। कीदृश्यः। कुहूः कुहूरिति कलोत्तालाः कुहूकुहूरित्या
कारेणाव्यक्तमधुररवेण उत्तालाः विस्तृताः प्रकटा वा। उद्भवे तालवो त्ताला इत्यमरः। केचित्तु कुहूकुहूरिति गिर उन्मीलंति कलोत्तालाः क
लमधुराः उत्तालाश्च उद्गता धनं यद्रृतिवदंति। कस्मात् स्निग्धरसालमौलिमुकुलानि कोमलचूतस्तबककुड्मलानि आलोक्य दृष्ट्वा हर्षोदयाद्दानं
दोद्गमात्। केचिद्रधुस्वं गोतिपावः। अद्रिपदस्यैव यथार्थात्। ईशाचलमिति। ईशश्चासावचलश्चेति व्युत्पत्तिः। प्रालेयं मिहिका चेत्यमरः। श्री
खंडोपलक्षितः शैलः श्रीखंडशैलः। आम्रश्चूतो रसालोसावित्यमरः। इदानीं कथाप्रक्रममंत्यश्लोकमवलोकयन्नाह॥ रासोल्लासेत्यादि हरिः शिषयन्नाय
श्लोको वो युष्मान् पातु रक्षतु। कीदृशः। रासोल्लासभरेण गोपक्रीडायां हर्षातिशयेन विभ्रमभृतां लालित्यवतीनां श्रृंगारभारधारिणीनां यत्र आ
भीरवामभ्रुवां गोपांगनानामभ्यर्णे समीपे निर्भरं गाढं यथा स्यात्तथा देवं उरोवलेः छलं परिरभ्यालिंग्य राधया उद्गतं चुंबितः प्रकटेन चुंबितः। कीदृश्या
राधया। अनुरागातिशयेन लज्जाहीनयैव कथं चुंबितमित्यत आह। गीतेति। गीतस्तुतिव्याजात्। गानप्रशंसाछलेन। किं कृत्वा। त्वद्वदनं त्वन्मुखं सुधा
मयममृतमयं साधु शोभनमिति व्याहृत्य उक्त्वा। कीदृशो हरिः। स्मितमनोहारी। तस्याश्चुंबनकौशलमाकर्ण्य स्मितेन मनो हर्त्तुं शीलं यस्य स तथा
ता स्त्रीलिङ्गे कोणिनिः। गोधुगाभीरवल्लवा इत्यमरः। वामे मनोहरे भ्रुवौ यासां तास्तथा। अभ्यर्णमिति कटेपि चेति धरणिः। पात्विति। पा रक्षणे। आशंसायां

गीतस्यास्य मालवरागः। एकतालीतालः। हे सखि मया सह केशिमथनं कृष्णं क्रीडय। कीदृशं। उदारं महांतं। कीदृश्या मया। मदनमनोरथभावितया।
मदनस्य कामस्य मनोरथ इच्छा तस्या भावोऽभिप्रायस्तमितया प्राप्तया। कीदृशं तं। सविकारं। विकारः कामजो भावः। यद्वा। सविकारं कुचोदरादि प्रक
टनं तत्सहितं यथा भवत्येवं मदनमनोरथभावितया। कुचोदरादिप्रकटनं। तदुक्तं रसिकसर्वस्वे। नाभीमूलकुचोदरप्रकटनं व्याजेन यद्योषितां
सा कांतस्य मुहुरीक्षणं स्खलितानीवीबंधस्य वा केशावंशनसंयमो वक्रमितुर्भ्रात्रादिसंदर्शनैः सौभाग्यादिगुणप्रशस्तिकथनैस्तत्सानुरागेंगित
मिति॥ पुनः कीदृश्या। निभृतनिकुंजगृहं अस्यकलतागृहं गतायाः प्राप्तया। एतेनाभिसारमुक्तं। तदुक्तं भरते॥ विवाहतीर्थयात्रादौ बंधनोत्सवके
तथा॥ नटनृत्ये तथा केलौ विवादोद्यानसंगतौ॥ असतीसंकुले देशे [illegible] स्युपतापाद्युपप्लवे॥ चोरिकयाभिसारः स्यात्स्वदारानिहरक्षयेदिति। पुनः कीदृ
शं कृष्णं। निशि रात्रौ रहसि गोप्यस्थाने निलीय तिरोहितीभूय वसंतं तिष्ठंतं। एवंभूतं मां न कश्चित्पश्यत्विति संकुचितमात्मानं कृत्वा वसिष्ठं तमिति भावः॥
मया कीदृश्या। चकितेन चमत्कृत्या विलोकिता निरीक्षिताः सकला दिशो यया। कुत्र कृष्णो निलीय तिष्ठतीति कृत्वा वास्य पमे राध्यर्थं कांतमनुसर
तीति लज्जया सखीषु संगोपनार्थं वेति भावः। कीदृशं कृष्णं। रतिरभसरसेन रतौ सुरते रभसो वेग उत्साहो वा तस्य वशो नाय तत्तया रसेनानुरागेणवाह
संतं। निभृतं रहः एकांतमिति धरणिः॥ निलीयेति लीङ् श्लेषणे निपूर्वात् क्त्वाप्रत्यये ल्यप्। रभसो वेग उत्साह इत्यमरः। केशिनं राक्षसविशेषं
मथ्नातीति तं। ग्रहादित्वात् ल्युः। अस्यां सकलगाथायां पूर्वार्धं राधाविशेषणमुत्तरार्धं कृष्णस्येति बोद्धव्यं। कीदृश्या मया। प्रथमसमागमलज्जितया॥
अनेककालपातेन भूतेऽसान्निध्येन व्रीडितया। कीदृशं। पटुचाटुशतैरनुकूलं वेलक्ष्यापनोदचतुरं॥ सांत्वशतैरनुनयकारकं। एतदुक्तं भवति॥
प्रथमममि हहि देवं प्राणपुष्पादिभिः स्यान्मृदुमधुरवचोभियो नियेत्सं निधाने। करतलमथगात्रे भ्रामयेच्छश्वदस्या लुरितमुदरपृष्ठे मंदमाश्लिष्य दद्या
दिति। प्रथमे समागमे कामिन्योल्लज्जंति मानमावहंति च। श्लिष्टः कंठे किमिति न मया मूढया प्राणनाथश्चुंबत्यस्मिन्न दनविकृतिः किं कृता किं न दृष्टः
नोक्तः कस्मादिति नववधूश्चेष्टितं चिंतयंती पश्चात्तापं वहति तरुणी प्रेमनिघ्नांतरेऽस्मज्ञा इति भरतः॥ कीदृश्या। मृदुनीस्त्रत्वे अल्पे वा मधुरे मनोहरे स्मि
तभाषिते ईषद्धसितजल्पिते यस्यास्तया। कृष्णं कीदृशं। शिथिलीकृते दृढबंधनं श्लथीकृतं दुकूलं जघनस्थितपट्टवस्त्रं येन। कांते नैव हस्तेनाहृतं वसनं
कांतसंगमात्स्वयमेव शिथिलीं। तदुक्तं भरते। कांते तल्पमुपागते विगलिता नीवी स्वयं बंधनाद्वासो विश्लथमेखलागुणधृतं किंचिन्नितंबे स्थितं। एता

सुरासुराणां परिवारो मुख्यमेलको यस्य। मकरो मत्स्यभेदः। उदारो दातरि श्रेष्ठ इति विश्वः। मनुजामानवा नराइत्यमरः। परिवारः कैपरिकरे परिक्लेश
प्रवर्षयोरिति विश्वः। पु॰शी। विशदकदंबतले विमलकदंबस्याधः। मिलितमुपस्थिते (पु॰श्री) कलिकलुषात् कलिकालजातपापात् भयं भीतिं शमयं
तौ। हाहुपातादिनामभासाराहूरस्क्षमपि किमप्यनिर्वचनीयं यथास्यादेवं तरंगन्नुत हृच्छन्नु यस्यां ताहृश्या हृश्यद्ध्या मनसा हृदयेन नरमयंतं मन अनंगो २
साकरणभूतेन। यद्वा। मनसा मां रमयति अहं चरमे हृदये न संपयो गं [illegible]। विहाय रममाणां कृ खोमयि तरले नयनं पातयन् ममापि रमयतीस्मेति भा
वः। रमयंतमिति तत्कालक्रियाया वर्त्तमानत्वाद्वर्त्तमाननिर्देशः। यद्वा। मनसा निर्देशः। यद्वा। मनसा कीहृशेन तरंगादनंगमेव पश्यतीति किंपि। त
रंगादनंगहृशा कामेनेत्यर्थः। कुरंगहृशेति पाठिला कचित्सहृतेति पाठः। तत्र कुरंगहृशा हरिणसमचक्षुषा सहसा सत्वरं यथा स्यादेवं रमयंतमित्यर्थः
शीघ्रत्वे सहसामयमिति धरणिः॥ कलुषं वृजिनैनो घमंहो दुरितदुष्कृतमित्यमरः श्रीजयदेवभणितमिदं गीतमिदं कर्त्तृ एताहृशं भवतीत्यन्वयः। काहृशी
अतिसुंदरं। मोहनं मोहजनकं मधुरिपोः कृष्णस्य स्वरूपं यत्र। संप्रति कलियुगे हरिचरणस्मरणं प्रतिपुण्यवतां धार्मिकाणामनुरूपं योग्यं। कलियुगमाहात्म्याद्य
ज्ञरादिभ्रन्यमनुष्याणां विष्णुस्मरणमेव महाश्रेयस्करमिति यदर्थिनामिदं गीतं शुभदमिति भावः॥ मोहयतीति मोहनं इति नंद्यादित्वात् ल्युः। अनुरू
पं स्वभावे शोभने पि [illegible]। रिपुर्मधुसूदनयोरिति [illegible]ः। पद्मनाभो मधुरिपुर्वासुदेव इत्यमरः अधुनोत्कंठिता राधा कुंजे वल्लभतरश्लेतसो नायन्नतामाह।। गणप
तीत्यादि। मम मनश्चित्तं कर्त्तृ पुनरपि इदानीमेव कुंजे कामममाभिलाषं करोति किमुपायां तरं करोमि। मम आनायनमिति भावः। काहृशे कुंजे युवतिषु तरुणीषु
अन्यासु वल्लवीषु कृष्णेजातानि लाषे (पुनः॰शो। मां विना मां त्यक्त्वा विहारिणि क्रीडनशीले। मनः काहृशं। वामं विरुद्धं अनायत्तमित्यर्थः। वामत्वे हेतुमाह। यस्मा
दिदं मम मनः कृष्णस्य सापराधस्यापि रूपादि रतिकलाकौशल्यादिकं वा गुणस्तेषां ग्रामं समूहं गणयति संख्यायुक्तं करोति। भ्रमादपि भ्रांतेरपि। भ्रामं भ्रा
मं विस्मरणं न हते न चेष्टते। सर्वदैवन कृतंमनइति भावः। मामामितिक्लिष्टपाठः। तत्पद्भ्रमं क्रोधं नेहते न वांछति। भामक्रोधेभावे घञ्। परितोषमह
तीं प्रीतिं वहति धारयति। दोषं मदीयावधारणादिकं दूरतो विमुंचति परित्यजति। नारागो विरजनेसानुरागं हृदयमिति। अत एव वामं गुणो प्रधानेरूपादेः
मौर्व्यामूर्दे दृकोदरे गुणः सत्वादिसंध्यादिविघादि हरितादिविषिति विश्वः। ग्रामः संवसथे वोक्तः समूहे पि निगद्यत इति धरणिः। भ्रम एव भ्रामः प्रज्ञादिभ्यो
णीति स्वार्थेण प्रत्ययः। [illegible] अकामानुमतौ काममित्यमरः। उत्कंठिता नाम नायिकेयं। लक्षणं चास्याः। उद्दाममन्मथमहाज्वरवेपमानं रोमांचकंटकितमं
गकमावहंती। संवेदवेपथुघनोत्कलिकाकुलांगी उत्कंठितां वदति तां भरतः कवींद्रः॥ अथ कामपीडामसहमाना राधा सखीमाह॥ निभृतेत्यादि

सिद्धोतोयेन। सकलकामशास्त्रपंडितइत्यर्थः। कीदृश्या। स्नथकुसुमाविलुलितपुष्पाश्च ते आकुलाः अस्तव्यस्ता भ्रमेति एवंभूताः कुंतलाः केशपाशा यस्याः ए
तदुक्तं प्राक्। ग्रहणमथविरुद्धा हस्तकेशास्तमादेरिति। कीदृशं तं। नखेन लिखितांकितोघनो निविडस्तनभारो येन। एतेन बाह्यरतमुक्तं। एतदुक्तं
भरते। आश्लेषचुंबननखदंततताडनानि संमर्दनं प्रसरणं खलु शिक्षितानि। जिह्वाप्रवेशरसनाग्रहणानि नाभी स्रोभं रतं वदति बाह्यतरं
नितंबः। कूल इति कूलस्रस्य केशस्रे केइत्। तत्र प्राधान्यशास्त्रयोरिति विश्वः। मया कीदृश्या। चरणयोः पादयो रणितौ शब्दितौ मणिनूपुरौ
मणियुक्तनूपुरौ यस्याः। कामशास्त्र बंधसूचना योक्तं। तदुक्तं रसिकसर्वस्वे उत्तानितायाः सुरतेयदोरू आसीनकांतोरुगतो भवेतां। यास्यं तदा
स्यात्कटितोयदास्या बहिर्भवेतां किल नागरस्त्री। तं कीदृशं। परिहृतः सर्वतः संश्लेषीकृतः सुरतविता नो विशिष्टरतिविस्तारो येन। कीदृश्या।
मुखरा वाचाला विशृंखला उन्मुक्ता मेखला कांचीयस्याः। यद्वा। मुखरा सस्वरा या विशृंखला क्रमेणनिबद्धा मेखलायस्याः। शृंखला कुसु
दकार्यां वस्त्रे चक्रमबंधन इति विश्वः। निबिडसुरताघातशैथिल्यात् स्ख्यतिक्रमवती कांची बभूवेत्यर्थः। एतेन विपरीतसुरतं सूचितं। तदुक्तं कौ
के। स्वेच्छया आमिलिवल्लभे यथवा योषिदाचरतिपुरुषायितं। आदितो धरितयं त्रमेखला तुं निपात्य नखवह्निरे शतो चक्रवक्रमतिकुंचितांघ्रिका श्राम
रं नृणघने समुक्तके। सर्वतः कटितटंभ्रमो यादृग्रेखपूर्वमिदमुक्तमूलितं। क्वचित्तु मुखरशृंखलमेखयेति पाठः। तत्पक्षे मुखरा श्रवणताद्भुता
शृंखला बंधनं यस्याः। वष्टिभागुरिरिल्लोपमवाप्योरुपसर्गयोः। टापं चापि हलंतानां यथा वाचा निशा दिशा इत्यकारलोपः। एषो दरादि
ह्नोलोपः। तं कीदृशं। कचग्रहणेन केशपाशधारणेन सहचुंबनदानं यस्या। इदमपि विपरीतरतारंभसूचनं। रणत्कृतश्च ह्यंकानेकप्रत्ययेन र
णितं सिध्यति। वितानं त्वस्त्री वसरे संघे यज्ञकर्मणि लोचने इति विश्वः। मया कीदृश्या। रतिसुखसमये सुरतप्रीतिकाले रसेन शृंगारेण वा अ
लसया मंथरया। एतेन च्युतिसुखसांनिध्यं सूचितं। उक्तं रसिकसर्वस्वे। मुहुः स्वेदं नघनाश्लेषः सीत्कारो वीतलज्जया। शृंगारध्वनितं नार्याः ११
श्च्युतिसांनिध्यसूचकमिति। तं कीदृशं। दरमुकुलितमीषन्मुकुलितं नयनसरोजं चक्षुःकमलं यस्य येन वा। एतच्च च्युतिकालसूचकं। उक्तं च भ
रते। मूर्छना मिलनं चाक्ष्णोश्च्युतिकालस्य सूचकं। सर्वमेतत्परिज्ञाय साधयेत्सुस्वयं ततः। कीदृश्या। निःसहा असमर्था निपतिता तनुलता य
स्याः। एतेन च्युतिकालावस्थोत्तरकालः सूचितः। तदुक्तं भरते। अंगे स्वेदः श्लथत्वं च केशवस्त्रादिसंहृतिः। जाते च्युतिसुखे नार्या विरागेच्छा च गम्यते।।
- पक्षविस्तारो ध्रोवे पुंक्रतुकर्मणि। इत्यमरः। वसरयोर्वितानं तु समंदयोरिति ५ चं २

वत्सं रविवेष्टिसांप्रतमहं कतस्यां गतसंगेपुनः कोसौकास्मिरतं चकीदृशमितिस्व-ल्यापि मेनस्मृतिरिति। कीदृश्या। किसलयशयनेन वपल्लवकृतश
य्यायां निवेशितया। एतदुक्तं भवति। संकेततल्पेभिमुखोपविष्टांगादंपतिः श्लिष्यति सापि कांतं। अन्योन्यगात्रे विशतीव रागादृढं तदाश्लेषजलो
भिधानमिति। कीदृशं। ममेवोरसि वक्षःस्थलेशयानं सुप्तं। एतच्चालिंगनाभेदापेक्षमुक्तं। तथा च कोकः। असकृदतनुगाढाश्लेषलीलोचितत्वज्जनित
जघनबाहू व्यत्ययं स्पर्धयेव। मिथुनमथमिथो गेल्सीयते निस्तरंगं निगदतितिलपूर्वं तंडुलं तन्मुनीन्द्रः। पुनः कीदृश्या। कृतेपरिरंभ[illegible] चुंबनेयया।
एतदप्यालिंगनापेक्षयोक्तं। एतदुक्तं भवति। जघनकलितकांतश्रोणिरस्योपरिष्टाद्व्रजति यदिह नारी स्रस्तकेशोत्तराया। करजरदनकृत्यं चुंबनं
वाविधित्सुः कलयति जघनोपश्लेषमेनं मुनीन्द्रः। तं कीदृशं। परिरभ्यालिंग्य कृतमधरपानं येन तं। अत्रायं भावः। अधरदशनजिह्वापानमार
भ्य कुर्यान्नयनवदनगुह्ये श्वेति जिह्वाप्रचारं। ग्रहणमथविदध्याद्धस्तकेशस्तनादेः कुचयुगभगदेशे मर्दनं चोरुयुग्मे इति भरतः। पल्लवः किसल
यो स्त्रियां। पुनः कीदृश्या। अलसमंथरं च तन्निमीलितं चेति तादृशं लोचनं यस्याः। यद्वा। अलसेन विलंबेन निमीलितं पिहितं लोचनं यया। एते नांगि
कः कामविकारः सूचितः। तथा च नायिकालक्षणे। यत्र मूर्धानमारभ्य पादपर्यंतिकाः क्रियाः। अंगेन विहिता यस्मात्तस्मादांगिकमुच्यते। श्रमरेणापुलके
निर्वर्तिते वेगसत्वाभ्यां द्विविधांगिकसात्विके। पुनः कीदृशं। पुलकावल्या रोमांचपंक्त्या ललितौ मनोहरौ कपोलौ यस्य तं। अनेन सात्विकविकाराविष्कारः सू
चितः। एतदुक्तं भरते। स्मरणे संगमे चैव प्रियस्यालोकने तथा। हेतुत्रयं समासाद्य सात्विकः संप्रपद्यते। अन्यच्च। नीवीविमोचनबंधो मुहुर्मुहुः केशपाश
विश्लेषः। स्वाधरदशनग्रहणं बालकपरिचुंबनं तदात्सुकतेति। स्वेदः स्तंभोथ रोमांचः स्वरभेदोथ वेपथुः। वैवर्ण्यमश्रुप्रलयइत्यष्टौ सात्विकाः स्मृताः।
कीदृश्या। सुरतगमैथ्या सज्जनितवारिणा सिक्तैः सकलं संपूर्णं कलेवरं यथा शरीरं यस्यास्तया। इदमपि सात्विकभावस्य सूचनं। कीदृशं तं। कुसुमदनमदाकु
लमांगदर्शनात् हर्षोद्वा अतिलोलमत्यर्थेन चंचलं सतृष्णमिति यावत्। अनेनापि चंचलांगत्वेपि सात्विकभाव एव दर्शितः। सकलं त्वचेखंडेवरा चि ४
गवस्त्कानि कल्कले इति विश्वः। यद्वा। श्रमजलैः सकलकलेवरे समस्तकायेयस्यास्तया। कायेचतिकलेवरमिति विश्वः। कोकिलानां कलरववद्यत्कं ध्वनि
वत्कूजितं शब्दितं यस्याः। एतदपि सुरताधिकारोक्तं। तदुक्तं रसिकसर्वस्वे। दात्यूहलोचकमयूरकपोतहंसपारावतादिवकलध्वनितं रताख्यौ। तन्मित्र १२
निश्वसितसीत्कृतहानिनादैः संयोजयेद्वदनचुंबनमैथुनादौ॥ तं कीदृशं। जितामनसिजतं[illegible]त्रस्यवात्स्यायनादिकृतकामशास्त्रस्य विचारः

क

कीदृशं मधुसूदनं मधुं दैत्यं सूदितवान् मधुसूदनस्तम्। यद्वा मधुना वसंतेन कामवांछयापीडनं यस्य तम्। मधुपुष्पं सूदयति पिबतीति मधुसू
दनः। धातोरनेकार्थतया सूद् धातुः पानार्थः। कीदृशम्। उदितमनोजं जातकामं। उदित इति उत्पूर्वादिणो धातोः क्तप्रत्ययः। ईषदर्थे दरोऽव्ययमस्मित्ये
मत। अस्य गीतिनामालंकारः इदं श्रीजयदेवभणितं कर्तृ सुखं वितनोतु विस्तारयतु गायतां शृण्वतां च। कीदृशमतिशयितं। केशवस्य निधु
वनशीले सुरतचरित्रं यत्र। पुनः कीदृशं। उत्कंठिताया गोपवध्वा राधिकायाः कथितं यत्र। पुनः कीदृशं। लीलाशृंगारभावजाक्रियातत्सहितं
१ योजन निधुवनं मा दुरर्थं विदइति हारावली। स्वभावेशील नेशीलइति धरणिः अधुना कामावसन्ना राधा आह हस्तस्रस्तेत्यादि गोविंदं कलिं
अलीकगोपतया दर्शनायोग्यं पश्यामि तद्दर्शनेन हसामि च। कीदृशं गोविंदं कानने वृंदावने व्रजसुंदरीगणैर्वृतं गोपीसमूहवेष्टितं। पुनः
कीदृशम्। मामुद्वीक्ष्य मां दृष्ट्वा हस्तात्स्रस्तो गलितो विलासवंशः क्रीडानिमित्तवेणुर्यस्य। अनेन राधायां प्रेमसंभ्रमसाध्वसानि दर्शितानि
पुनः कीदृशं। अनृजुभ्रूवल्लिमतीनां कुटिलभ्रूलतावतीं युक्तानां वल्लवीनां गोपीनां वृंदे समूहे मुक्तास्थि ऊर्ध्वतिर्यग्गामि दृगंतवीक्षितं कटाक्षो
लक्षणं यस्य। एतेन हृष्टिसंमुखता राधायामन्यसुंदरीषु शिथिलादरत्वं दर्शितं। पुनः कीदृशं। अतिस्वेदेनातिघर्मेणातिस्तिमितो गंडस्थले
यस्य। एतदवलोक्याहं राधया विलोकित इति भीत्या राधासमागमोत्कंठतया सात्विकभावाच्च स्वेदातिशयत्वं। पुनः कीदृशम्। विलक्षितेन लज्ज
यास्मितं हासस्तदेव सुधासृतं तेन मुग्धाननं। वसनं वासः भावे घञ्। कपिकादित्वाद्रेफस्य लत्वं। विविधोल्लासो विलासः। प्रेयो नामालंका
रः। तदुक्तं दंडिना। प्रीतिप्रकाशनं यत्तत्प्रेय इत्यभिधीयते अधुनाऽतिशयितकामोद्रेकं दर्शयति। दुरालोकेत्यादि। हे सखि दुरालोको वि
योगिनामुद्वेजकत्वात्। दुःखेनालोक्यते दुरालोकः। स्तोकोऽल्पः स्तबको गुच्छो यस्यास्तस्या नवकाशोकलतिकाया नूतनाशोकवल्ल्याः ऽविकाश उ
द्योतो मां व्यथयति पीडयति। स्तोकस्तबकनवकाशोकलतिकाया विकाश उद्गमो मम दुरालोकः पीडाजनकत्वात्। कासारोपवनपवनः सरः
समीपस्थवातोऽपि व्यथयति। अपिः पूर्वापेक्षया समुच्चये। कासारोपवनत्वेन मां व्यथयतीति चित्रमिति भावः। कीदृशो वातः। दुरालोकस्तोक
स्तबकनवकाशोकलतिकां विकाशयतीति कर्मण्यण्। एतेन मंदत्वसुरभित्वशीतलत्वानि वायोरुक्तानि। न केवलमेतदेव। चूतानामाम्राणामपि

यडा३

12 मुकुलप्रसूतिः कलिकोद्भवः। शिखरिणिपर्वते नसुखयति नसुखवतीं करोति। कीदृशी। भ्राम्यंतानां मोरभल्लोभादुपर्युपरि पार्श्वेषु चलंतीनां भृंगीणां भ्रमर
स्त्रीणां रणितैः शब्दितैः रमणीयामनोज्ञापीत्यर्थः। ज्ञानिनामनन्वयस्यापि आकांक्षावशात्पुनरितरपदार्थः। सममनन्वयस्यायोग्यत्वात्। दुरालोक दु
तिदुःखेन आलोक्यते अत्रार्थे ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् इतिखल्प्रत्ययः। छंदोछंदः शिखरिणी नाम॥ अधुनासर्गांते कविर्लोकानाशिष
यति साकूतस्मितमित्यादि नवस्तरूणः केशवः कृष्णो वेयुष्माकं सामाजिकानां क्लेशं कष्टं हरतु। गोपीनां निभृतं गोप्यभावं निरीक्ष्य कां चिद्दृयि
तां बहुभामेतश्चेतासिललितंमनोहरं यथास्यादेवं चिंतयन् मुग्धमनोहरः मोहयुक्तसुंदरः। साकूतं साभिप्रायं स्मितमीषद्धसितंयत्र। आकुलोकु
लोत्यंतास्तव्यस्तोगलन् उन्मुक्तीभवन् धम्मिल्लः केशपाशोयत्र। पुनः कीदृशी। उल्लसिता उन्नोलिता भ्रूवल्ली भ्रूलतायत्र। पुनः कीदृशी। अलीके
नमिथ्यारूपेण छलेन वा दर्शिता भुजामूलार्धे स्तनस्तनायत्र। एतेनमोहायितभावो दर्शितः। भुजामूलार्धश्च हस्तश्च स्तनौ चेति द्वंद्वसमासः। प्राण्यं
गत्वादेकवद्भावः। अर्धशब्दो हस्तस्तनयोरपिसंबध्यते। द्वंद्वात्परः पूर्वोवायः श्रूयते लभतेसावन्यतरव्यपदेशमितिन्यायात्। धम्मिल्लः संयते केशेसु
दरेसंहतेपि चेतिधरणिः। अलीकं छलमिथ्ययोरितिच। दोर्दोषाचभुजाभुजइत्यमरशेषः। अक्लेशोदुःखरहितः केशवोयत्र इतिश्रीज्ञा
हरविरचितायांगीतगोविंदटीकायां सारदीपिकायांद्वितीयःसर्गः॥ इदानीं कविः कृष्णस्यविरहमाह॥ कंसारिरित्यादि कंसारिरपिवि
ह्लापिराधां हृदये आधाय आरोप्य व्रजसुंदरीर्गोपकामिनीस्त्याजत्यक्तवान्। सहक्रीडंतीनामतिसुंदरीणां अपितासांत्यागाद्राधायां
अनुरागस्सूचितः। कीदृशीं राधां। संसारवासनायाः संसारेच्छायाः बंधे शृंखलामिव निगडरूपामिव अतिशयित मोहहेतुमितिभावः। पूर्वानु
भूतार्थोपस्थापकः संस्कारोवासना इदानीमपिविधुरविरहतामेवाह॥ इतस्ततइत्यादि समाधवः कालिंदीतटांतकुंजे यमुनातीरलतापि
हितोदरगृहे विषसादविषादं चकार। किंकृत्वा। तांराधिकांकोपेनगतांमानिनीमितस्ततोनेकस्थाने अनुसृत्यान्विष्य। कीदृशः। अनंगबाणव्रणे
न कामशरक्षतेन खिन्नं दीनंमानसंयस्य। पुनः कीदृशः। कृतानुतापः अन्विष्यराधामदृष्ट्वा कृतपश्चात्तापइत्यर्थः। पश्चात्तापोनुतापश्च विप्र
तीसार इत्यपीत्यमरः। केचित्त्वनयोः श्लोकयोः एकार्थत्वमन्वानाः पूर्वश्लोकमहस्तयंति। तन्न। अर्थयोर्विशेषात्। तथाहि श्लोकेन व्रजसुंदरी २२
पूर्वं

त्यागमात्रमुक्तं। द्वितीयश्लोके नच राधान्वेषणात्पूर्वं कंदर्पमुनात्मविषादमाह। इत्यनयोरर्थयोर्भेदे केनु नरुक्तिः। नपौनरुक्त्यं विशेषस्येत्यभिधानात्॥
इदानीं श्लोकोक्तमर्थं गातेनस्फोटयति मामियमित्यादि। गीतस्यास्य गूर्जरीरागः प्रतिमठ तालः हरिहरीति खेदे। हतादरतया न इष्ट बहुमा
नत्वेन। सा राधा कुपितेव क्रुद्धेव गता। इयं राधिका मां वधूनिवहेन स्त्रीसमूहेन वृतं वेष्टितं विलोक्य दृष्ट्वा चलिता गता। स्थानांतरमिति भावः। चलिरत्र
गत्यर्थः। कीदृशी मयापि सापराधतया कृतव्यलीकत्वेन हेतुना अतिभयेन न वारिता। गमनान्न निषिद्धेत्यर्थः। यद्वा। अतिशयितं भयं यस्येति म
येत्यस्य विशेषणं। कांचिद्धृतमिति भावः। तत्रैतद्गृहीतमित्यर्थः। सा राधा चिरं विरहेण बहुकालवियोगेन किं करिष्यति किं वा वदिष्यति। मम म
नधनाद्भिमेतिकिं। तां विना सकलमेव वस्तु निःफलमिति भावः। तस्या आनने मुखं चिंतयामि। कीदृशं। रोषभरेण कोपातिशयेन कुटिले वक्रे कुटि
ले वा भ्रुवौ यत्र। किमिव। परिभ्रमता च लता भ्रमरेण आकुलं व्याप्तं शोणपद्ममिव रक्तकमलमिव। कोपेन रक्तमुखत्वं रक्तपद्मतुल्यं। भ्रुवौ च भ्रमरतु
ल्ये। इति वाक्यार्थोपमालंकारः। तथा च त्वदाननमधीरा लसमाविद्दर्शनदीधिति। भ्रमद्भृंगमिवालक्ष्य केसरं भाति पंकजमिति। शोणः कोकनदं छविरि
त्यमरः। तां राधां हृदि संगतीं मनोविषयीकृतां अनिशं वारं वारं भृशमतिशयेनाहं रमयामि क्रीडयामि। इह वने तां राधां किमनुसरामि हथा व्यर्थं किं वि
लपामि। विरहिणो हि कामिनो ध्यायंति विलपंतीति भावः। हे तन्वि कृशांगि तव हृदयमसूयया असहिष्णुतया खिन्नं दीनमित्याकलयामि। अधुनाकु
तः कस्मिन् गतासि तन्न वेद्मि न जानामि। तेन हेतुना ते तुभ्यं नानुनयामि। न प्रसादयामि। परिशीलनेन न करिष्यामीत्यर्थः। क्रियाग्रहणं कर्तव्यमिति
चतुर्थी। ते इति षष्ठी संबंधे वा। तत्र ते तव कृते नानुनयामीत्यर्थः। यद्वा। न ते न प्रणत्या नुनयामीत्यर्थः। कुत इति सप्तम्यर्थे तसिः। हे राधे मम पुरतः अ
त एव गतागतं यातायातं विदधासि करोषि। इति दृश्यते पुरेव पूर्ववत् ससंभ्रमं सादरं सत्वरं वा। परिरंभणमालिंगनं केन हेतुना न ददासि। संभ्रमस्त्वा
दरे भीतौ त्वरायामपि दृश्यत इति विश्वः। हे सुंदरि पूर्वं कृतमपराधं क्षम्यतां क्षमस्व। अपरमीदृशं तव अपराधं कदापि न करोमि। अतो मम कृते संदर्शनं
देहि। मन्मथेन कामेन दुनोमि उपतप्तो भवामि। दुनोमीति टुदुदु परितापे लिटिश्नु प्रत्यये [illegible]पि साधुः। करोमीति तत्क्रियावर्तमानत्वेनात्र लटः प्रयोगः
यद्वा। वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानप्रयोगः करिष्यामीत्यर्थः। इदं गीतं लयदेवकविना वर्णितं कृतं। कीदृशेन हरेः कृष्णस्य चरणेन पुनः कीदृ
शेन किंदुबिल्व[illegible]नामाशासनं कुलं वा अतिमहत्वात् समुद्र इव तत्संभवो रोहिणीरमणश्चंद्र इव यः। यथा सा [illegible]रसेभवश्चंद्रः तद्वृद्धिकारी तथा जय

13 देवोपि किंतु बिल्वसंभवात् समृद्धिकारीत्यभिप्रायः। दे॰ यदेवक इति प्रशंसायां कन्। स्वार्थे वा कप्रत्ययः। श्रवणोत्कमनिम्नो यथा आयाते च च तुष्य थ
इत्यमरशेषः। श्लो॰ इंदुरेणतिलको हरिरोहिणीशावितिहारावली। हृदिस्थैव राधा कथमनंगास्त्रं व्यपीडयतीति तत्र केयन्नाह। भ्रूपल्लवमिति।
तस्यां राधायां स्मरेण कामेन इत्यनेन कारणेन अस्त्राणि किमर्पितानि आरोपितानि। कीदृश्यां। अनंगस्य कामस्य जयैत्रैलोक्यविजयविशेषे
जंगमरूपायां देवतायामिव। कीदृशान्यस्त्राणि। निश्चयेन जितानि जगंति यैः कान्यस्त्राणि केनरूपेणार्पितानीत्याह। भ्रूपल्लवमिति। भ्रुवोः पल्लु
व इव दीर्घत्वात्। सोपि धनुरिव आकृत्यादिसाम्यात्। रूपकनामालंकारः। यथा। मुखपंकजरंगेस्मिन् भ्रूलतानर्तकी तव। लीलानृत्यं करोतीति रूप्य
रूपकरूपकमिति। उपमेव तिरोभूतभेदा रूपकमिष्यत इति रूपकलक्षणम्। नेदमासमाने उपमा अभेदोपचारे सति रूपकमित्यनयोर्भेदः। अपांगतरं
गितानि कटाक्षेक्षणानि बाणाः हृदयभेदकत्वात्। श्रवणपालिः कर्णप्रदेशः। गुणः धनुःप्रत्यंचिका इत्येवं रूपाण्यस्त्राणि किमर्पितानीत्यर्थः। तरं
गश्चलनं तरंगं करोतीत्यर्थः। तत्करोति तदाचष्ट इति णिच्। तं तरंगयति भावे क्तः। तेन तरंगितमिति सिध्यति। पालिः पंक्तिप्रदेशयोरिति विश्वः। अधुना
कामशरानलपीडितः कृष्णः अनपराधतामाह। हृदीत्यादि। हे काम नैं अनंग हरभ्रांत्या त्रिलोचनभ्रमेण मयि माधवे मद्विषये न प्रहर प्रहारं मा कुरु। क्रुधा कोपे
न किमु धावसि वि॰ तर्के किमु शब्दः। वितर्के किं किमुत च इत्यमरः। यद्वा उशब्दः संबोधने उ हे काम कोपेन किं धावसीत्यन्वयः। यच्चापि हरचिह्नं तद
पि प्रकारांतरेणाह। हृदि बिसलतासिअयं बिसलताहारः न तु भुजंगमनायको वासुकिः। मृणालस्थलतात्वेन रूपितस्य पुनर्हारत्वेन रूपणाद्द्विरूप
कनामालंकारो भवति। दीर्घत्वाद्दलः श्वोनादाई मृणाले वासुकिभ्रमः। कंठे ग्रीवायां कुवलयदलश्रेणी नीलोत्पलपत्रपंक्तिः। न तु सा गरलद्युतिः
कालकूटकांतिः। इदं मलयजरजश्चंदनलेपः एव कामतापाद्दिश्रुक्ततामुपगतः न तु भस्म। विरहतापशांतये मृणालादीनि दीयंते। एतल्लतया न
तु तानि शेत्यादिना वासुकिप्रभृतीनीति भावः। कीदृशो मयि प्रियारहिते कांतास्त्यक्तो। सा यदि प्राणरक्षिका स्यात् तत् तदा मां कः प्रहर्तुं शक्नोति। त १३
तः स्वयमेवाहमतिसंतप्तः त्वं तु किमर्थमावसादयसीति भावः। नायकोनेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः। अथ विरहेणातिपीडितो
परपीडासहमानः काकुं करुते। हे क्रीडानिर्जितविश्व लीलाविजितभुवन मूर्च्छितजनाघातेन पीडितजनपीडया किं पौरुषं कावा नडुमा
म॰

नः॥ अपि तु न किमपीत्यर्थः॥ अमुं चूतसायकम् आम्रपुष्पशरं पाणौ हस्ते मा कुरु। तत्र चापं धनुर्मा रोपय मा संघट्टय। मूर्छितत्वे हेतुमाह। तस्या इ
त्यादि। तस्या एव राधाया एव मृगीदृशो हरिणनयनायाः मनसिजेन कामेन प्रेरितं चलितां कटाक्षाणां नलिनानां वक्रीणां श्रेण्या पंक्त्या जर्जरि
तं खंडखंडीभूतं मम मनश्चित्तं मे नागपि स्वल्पमपि नाद्यापि संधुक्षते अद्यपर्यंतमपि न स्वस्थं भवति इत्यर्थः। यद्वा। न संधुक्षते न जीवतीत्यर्थः॥
धुक्ष संदीपन क्लेशनजीवनेषु इति धात्वनुसारात्। क्वचित्तु कटाक्षाशुगमपाव॥ तत्र कटाक्षाशुगो बाणाः॥ युक्तं चैतत्॥ हरिणनयनाकेदाक्षवा
ण व्यथामेवासहिष्णोः पुनर्बाणप्रहरणमनुचितमेवेति तत्कर्तुः कामस्य स्मरस्य कृते दैन्यवचनमिति। क्वचित्तु कटाक्षच्छटेति पाठः। तत्र कटाक्षच्छटाः
कटाक्षलेप इत्यर्थः। आभ्रुयष्टी गच्छतीत्याशुगो बाणः॥ इदानीं ध्यानलब्धां राधां प्रति स्वकीयं दुःखमाह। भ्रूचापे इत्यादि हे तन्वि कृशांग
ि भ्रूरेव चाप इव तत्र निहितोऽर्पितः कटाक्ष एव विशिखो अपांगदर्शनबाणो मर्मव्यथां निमीतु। मर्मस्थानपीडाङ्गनकत्वा। द्विशिखत्वेन स्वरूपकं। क ब
री भारोपि केशपाशे चयोपि श्यामात्मा कुटिलवर्त्मा कुटिलो वक्रश्च मारोद्यमं कामोन्नतिं करोतु। अन्येनापि श्यामात्मना मलिनचरितेन कुटिलेन वक्रे
ण च मारोद्यमः मारणं मारः। भावे घञ्। तस्योद्यमः क्रियत एवेति युज्यत एवेति ध्वनिः। अयं च रागवान् लोहितवर्णो बिंबाधरोपि बिंबफलव
द् अधरोपि मोहं वैचित्र्यं तनुतां विस्तारयतु तावत्। यतो रागिणो विषये भावतो मोहो मम त्वं युज्यत एव॥ मोहस्य रागजनकत्वात् स्वच्छवृत्तः साधुवृत्तः
स्तनमंडलः कुचबिंबः मम प्राणैः कथं क्रीडति वितापहो भवतीति तच्चित्रं। ये हि सद्वृत्ता उत्तमा चरित्राद्यालवः ते परप्राणप्रघातका न भवं
ति स्तनमंडलोपि तादृशोपि प्राणहृत्यं तच्चित्रं। विरोधनामालंकारः॥ श्यामो नीलवदितकुटिलयोरिति धरणिः। कबरी केशवेशः स्यादिति हारावली।
मारो मारणे कामयोरिति विश्वः। बिंबो बिंबफले देहे छायायां बिंबिका फले इति धरणिः॥ रागोनुरक्तौ मात्सर्ये रंजने विनिगद्यत इति विश्वः। चरिते
वर्तुले वृत्तमिति शाश्वतः॥ इदानीं विरहस्यानिवार्यत्वेनामतं ब्रवीति॥ तानीत्यादि। यदपि प्रियापुरासंगमे तु भूतानि तान्येव स्पर्श
सुखानि तरलाश्च चलाः स्निग्धाः कोमला वा दृशो अथ दृषो विभ्रमा विलासाश्च तद्वक्त्रांबुजसौरभं वदनकमलस्य सुरभित्वं तदेव सुधास्यंदी अ
मृतस्रावी गिरां वाचां वक्रिमा अनृजुत्वमेव। अत्र च कार एवार्थः। सा बिंबाधरमाधुरी बिंबाधरस्य माधुर्यं तदेवं इत्येवं क्रमेण विषयासंगेपि न
स्यात् रूपरसादीनां पंचानां सांनिध्येपि मम मानसं यदिलग्नसमाधिः तस्यां विषये यद्विध्यानं तदा विरहव्याधिः कथं वर्धते वर्तते च। हंत कष्ट

14

६२ ५४

हंत हर्षेनुकंपायां वाक्यारंभविषादयोरित्यमरः॥ स्पंदनं स्पंदः। सोस्यास्तीत्यर्थे अतइनिवनावितीनिः। वक्रस्य भावो वक्रिमा पृथ्वादिभ्य इमनिप्रत्ययः। मधुरस्य भावो माधुरी। स्वार्थिकोण्‌ अत्ययोर्हि ठाले इत्यादिना ङीप्‌। गंधरूपरसस्पर्शशब्दाश्च विषया अमीत्यमरः। सर्गांते कविर्जनानाह।

शिषयोगि

तिर्यगित्यादि मधुसूदनस्य कंसस्य कटाक्षो मेयोनेत्रांतदर्शनतरंगः। वोयुष्माकं क्षेमं कल्याणं ददतु प्रयच्छंतु। कीदृशाः। राधायाः मुखेम्रदुस्पंदनं किंचिच्चलनं। संमुग्धमव्यक्तं यथा स्यात्तथा कंदलिताः पल्लविताः। पुनः कीदृशाः। वंचरोगश्च रसने वेणुरन्ध्रु। इति स्थाने भुगानयदेषु कृतावधानेदं तमनोभिर्लललनालक्षैः स्त्रीवर्गैर्नसंलक्षिताः नदृष्टाः। कीदृशस्य मधुसूदनस्य तिर्यक्‌ वक्रः कंधरा यस्य विलोलश्चंचलो मौलिः किरीटो यस्य। तरलश्चं चलउत्तंसः कर्णपूरो यस्य। पश्चात्‌ कर्मधारयः। उत्तंसः कर्णपूरेपि सुंदरे नायकेपि वेति धरणिः। गीतिर्गानं भावे क्तिन्‌। गीतस्थानमितिपाठः। क्षलं तु नितंबिनीत्यमरः। मुग्धाविरही मधुसूदनोयत्र। इतिश्रीजगद्धरविरचितायां गीतगोविंदटीकायां सारदीपिकायां तृतीयः सर्गः॥ ॥ अधुना काचिद्राधासखी माधवमाह। यमुनेत्यादि। राधिकासखी काचिद्दूत्यमाचरंती माधवं कर्णाटे गीते वक्ष्यमाणमर्थमाह॥ उक्तवती। यमुनातीरवानीरकुंजे कालिंदतीरे वेतसोपलक्षितगृहे मंदस्वैरं यथा स्यात्तथा आस्थितमासीनं पुनः कीदृशं। प्रेमभरेण राधायां प्रेमातिशयेन उद्भ्रांतमुद्विग्नचित्तं। प्रेमभयोद्भ्रांतमितिक्वचित्पाठः। अत्र प्रेम्णा स्नेहेन पूर्वं विहतास्त्वया न खलु प्रणयप्रेम यास्यतीति भयेन च उद्भ्रांतं चंचलचित्तमित्यर्थः। वेतसेपि च वानीर इति विश्वः॥ मंदे स्वैरं विलंबे च मधुरेनलसेपि चेति च॥ ।सखीवचनमाह ।निंदतीत्यादि अस्य गीतस्य कर्णाटरागः। एकतालीतालः। रागलक्षणं च। कृपाणपाणिर्गजदंतपत्रमेकं वहश्च दक्षिणकर्णपूरे। संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिकंठनीलइति अत्र गीते विरहोत्कंठिता वर्णनीया॥ नायिकालक्षणे युक्ता गीतकाव्येषु दर्शिता। एकैव नायिका चापि हरमूर्त्तिरिवाष्टधा। वासकसज्जा समुत्कंठा स्वाधीनभर्तृका तथा। कलहांतरिता चापि विप्रलब्धाभिसारिका। खंडिता प्रोषिता चैव नायिका चाष्टधा मता॥ तत्र समुत्कंठालक्षणं भरते। यस्याः समुचितो यद्भिः प्रवासी नेति वल्लभः। सास्मरानलसंतप्ता विरहोत्कंठिता मतेति। गीतार्थस्तु। हे माधव वल्लभ सा राधा तव विरहे सति दुःखिता सती त्वयि त्वाद्विषये लीनाम नसिजविशिखः कामबाणस्तस्मात्‌ भयादिव त्वयि लीनेव। एतेन त्वयि लीनायाराधायाः कामशराघातभाजनत्वं भविष्यतीति ध्वनितं। कयालीने २४

त्याह। भावनया संस्कारेणानुचिंतनेनेति यावत्। कामबाणो मां हिनस्तीति कृत्वा प्रविश्य सुखं तिष्ठामीति भावनात्तयेत्यर्थः। इति वा। हे सखि सा राधा
किं करोतीत्याह चंदनं मलयजं निंदति कुत्सति। इंदुकिरणं चंद्रदीप्तिमनुलक्षीकृत्य खेदं कष्टं विंदति लभते॥ कीदृशं खेदं। अधीरमनल्पं।
अधीरमिति निंदतिक्रियाविशेषणं वा। व्यालनिलयमिलनेन व्यालाः सर्पास्तेषां निलयो ~~निलयो~~ निवासश्चंदनद्रुमस्तत्संसर्गेण व्यालेषु निली
नतया संसर्गेण वा हेतुना मलयसमीरं दक्षिणवातं गरलमिव कलयति विषमिव मन्यते। इंदुकिरणमित्यत्र लक्षणेत्थंभूताख्यानभागवीप्सासु
प्रतिपर्यनवः इति कर्मप्रवचनीयसंज्ञायां सत्यां कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीया॥ विंदतीति विद्लृ लाभे धातुः। धीरस्तु कुंकुमे स्वल्पे बुधे धै
र्यवति त्रिष्विति विश्वः। व्यालो दुष्टभुजंगयोरिति विश्वः। स्वहृदयमर्मणि वर्म संनाहं जलसहितपद्मिनीपत्रसमूहं करोति। कीदृशं। विशाल
मतिमहत्। किमर्थमविरलमनिशं निपतितं निपातो यस्य स च मदनशरश्चेति। तस्माद्भवतो वनायरक्षणायेवा निपतित इति वर्त्तमाने वा क्तः
एतेन तोट्टी॥ वत्स्यापि राधा भवदीयरक्षामेवतनुतरति त्वय्येवानुरक्तेति ध्वनितं अवतान्नित्यपरक्षणे ल्युट्। नलिनीदलस्पर्शी तल
त्वेपि जलत्वे नापि शीतलत्वमुक्तं। यद्यायदि राधा हृदये एव प्रियो वसति तदा कथं विरह इत्याशंक्य अवनायरक्षणाय राधा रक्षणाय मवदिति
व्याख्याने। सा कुसुमशयनीयं पुष्पशय्यां करोति। कीदृशं अनल्पविलासकलाभिः बहुतरकोऽशिल्पैः कमनीयं मनोहरं। स्वभावात्पुष्पशय्या मनो
हरा॥ इयमपि शय्याविरचनकुशला शय्यायां अलाभे पुष्पशय्यामेव तादृशीं रचयतीति भावः॥ किमिव। कुसुमविशिखस्य पुष्पशरस्य शराः
तल्पंयत्र पुष्पाणि तैः तादृशं व्रतमिव शरशय्याशयनरूपं व्रतमिति भावः॥ किमर्थं व्रतमित्याह। तव परिरंभसुखाय तव दालिंगनसुखार्थं त्वदाश्लेष
मवाप्तुकामा कामपीडितापि शरशय्याशयनरूपं व्रतमाचरतीति भावः। शीतलतया कृतं पुष्पशयनं शरतल्पमुत्प्रेक्षितमित्युत्प्रेक्षालंकारः।
तल्पं शय्याट्टदारेषु त्रिष्वमरः। अवश्यपालनीयं कर्म व्रतमुच्यते। सुखायेति तादर्थ्ये चतुर्थी। राधा आननकमलं पद्ममिव मुखं वहति धारयति। कीदृ
शं उदारं श्रेष्ठं महद्वा। पूर्वोपि संश्यासमुच्चये चकारः। कीदृशं वलितं संभृतं यद्विलोचनजलं अश्रुरूपं तद्धारयतीति जलधरस्तद्वा। वलितेउच्छ्वसि
तत्वात् समधिके विलोचने एव क्षुणीए व जलधरो वर्षुकमेघो यत्र। पुनः कीदृशं। विधुमिव चंद्रसदृशं। कीदृशं विधुं। विकटेनातिमहता विशृंख
लेन वा विधुंतुदस्य राहोर्दंतेन दलनात् खंडनात् च्युता गलिता अमृतधारा पीयूषप्रवाहो यत्र तेन। श्रुतं रुदती छविमुखं धत्त इति भावः। जलं

वीडाकरेकामेस्वरक्षार्थमर्थमप्रणामयोरपियुरुत्वमेव ३ करे २ कूर्तं २ कामस्याधधरेकामोपमभिति
15 धरतीतिजलधरः पचाद्यच्।विकटः सुंदरे प्रोक्तो विशालविकारलयोरिति विश्वः।४।रहस्येकांते कुरंगमदेन कस्तूरिकया असमशरभूतं कामस्वरूपं मवंतं लिखति अधो नूद्धप्रदेशे मकरं काम वाहनं विनिधाय हस्ते च नवं नूतनं शरं विनिधाय प्रणमति च।अत्र नूतपुष्पधारणे नचक्रकोपयुक्तानंतरं प्रणामउचितएवं।एतदुक्तं भरते।देवतापूजनं कुर्या दृद्या द्दलि भुजे बलिं।लिखेत्कांत प्रतिकृतिं पार्श्वे चुकस्तूरिकां।गणये च्चावधिदिने गातंगायेत्तदंकितं।एवंविधानि नो देनन येत्कालं वियोगिनीति।कुरंगमदो मृगमदः।मृगनाभिर्मृगमदो गंधशेखरमितिहारावली।भूते दुदेरपिशाचादो मात्यनाचोपमासु चेतिधरणिः ५ प्रतिपदं प्रत्यक्षरं मदंपदं प्रतीतिवीप्सायामव्ययी भावो वा।प्रतिस्थानमिदमपि निगदति।हे माधव कुत्रनत व चरणेहं पतिता।किमर्थमत आह।त्वयि विमुखे अदक्षिणे सति सपदि तत्क्षणादेव सुधानिधिरपि।पीयूषकिरणोपि मयि तनुदाहं शरीरदाहं तनुते विस्तारयति।अन्येन चंदनादिना दह्यतां नाम।अमृतालयोथ द्दाहयति नदति चित्रमिति।तत्र त्वमेव कारणमिति त्वयि न तास्मीति भावः।अत्र वदुरापं दूतीप्रेषणस्वयमनुनयनादिना दुर्लभं भवं तं ध्यानलयेन चिंतासंश्लेषेण पुरोग्रे परिकल्प्य कृत्वा विषवंदेति विलापं करोति।अधुनापि मयि दाक्षिण्यं न करोतीति विलपति परिदेवते परिदेवं
वदा ६ नेकरोति।तदेव कृत्वाभंकारदर्शनानंदेन हसति हासं विधत्ते।तदेव कृत्वा विषीदति।प्रत्यक्षगोचरोपि भवान्नाश्लेषचुंबनादिकं नेकु रुतइतिक्षानदोषो यदि स्यात्तदास्यानां तरंगच्छामीति कृत्वा सन्मुखं गच्छति।त्यर्थः।तदेव कृत्वा तापं मुंचति।मया विरमतीवास्यो विरह दुःखम
ता ४ नुभावितिलज्जितः सांप्रतं संभाषणादिकं न करोति।कालांतरे तु गतलज्जः सन्कलमेव ममाभिलाषं करिष्यतीति कृत्वा विलसतापं त्यजतीति भावः।लयद्रुतिलि इश्लेषणे।लयनं लयः पचाद्यच्।लयस्तानादिसाम्ये च संलयः संश्लेषयोरपीति धरणिः।दुःखेनाप्यतइति दुरापः।ईषद्दुः सुषु कृच्छ्रकृच्छ्रार्थेषु खल्।
१५
श्रीजयदेवभणितमिदं वाक्यं मनसा चित्तेनाधिकमतिशयितं यथास्यात्तथा यदि नटनीयं नर्तयितव्यं तदा हरिविरहेण कृष्णवियोगेनाकुलाया बल्लवयुवत्याः अर्थाद्राधिकायाः सखीवचनमिदं गीतं पठनीयं जयदेवकविलेद्दमेव करोतीतिविषादं मनस्तापं करोति।तदेव कृत्वा रोदिति आलिंगनादिकं न करोति।भसप्रेमावलोकनमपि कं कृतेरीति कृत्वा कंदति तदेव कृत्वा वचयति।तगस्यानं समालोकमाक्षेपादिकं नदः =

गीतमतिसाधीय इतिभावः २ अधुना राधायाः पुनरतिशयितदुःखशालितामाह आवासइत्यादि हंतविषादे संबोधने वा हे सखि त्वद्विरहेण भ
वदीयवियोगेन सा राधापि हरिणी रूपायते मृगीवाचरति। कथं हरिणीत्वमतआह। आवासः सदनं त्वद्विरहेण दुःखदं कृत्वा तद्विपिनायते अर
ण्यमिवाचरति। प्रियसखीमालापि वक्रजवयस्यामम् हो पि स्वछंदगमनात् मघाताद्भिवारकतया जालायते आनायइवाचरति। तापोपि
दहदाहोपि श्वसितेन निश्वासेन दावदहनज्वालाकलापायते वनवह्निज्वालावलीवाचरति। ज्वाला कराला यते इति क्वचित्पाठः। तत्र
दावदहनो वनाग्निः तस्य ज्वालाशिखा तद्वत्करालो भीषणः कोपि पदार्थस्तमिवाचरतीत्यर्थः। एवं सति कंदर्पोपि कामोपि शार्दूलविक्री
डितं व्याघ्रचेष्टितं विरचयन्कुर्वन् यमायते अंतकइवाचरति। अनेन हरिण्याइव तस्या वल्लुके दृढानुरागो दर्शीतः। निःस्नेहपि त्वयि स्ने
हात्तस्याः पशुत्वं हरिणीपदेन ध्वनितं। अपिरवधारणे। सैव राधा तादृशी नान्येत्यर्थः। विपिनमिवाचरति क्यङ् सलोपश्चेति क्यङ्। एवमित
रत्रापि। वनेचवनवह्नौ च दवो दावः प्रकीर्त्तित इति विश्वः। करालो भीषणे च्यवदितिच॥ हंतामंत्रणहर्षयोरितिधरणिः। केचित्तु धे हरिणी
शाब्देन कृशत्वमुपलक्ष्यते। यथा हरिणी कृशा तथेत्यर्थः। यद्वा। हरिणी पांडुगुणवती तद्रूपमिवाचरति। हरिणः पांडुरः पांडुरित्यमरः। हारि
णी स्यात्स्त्रगी हेमप्रतिमा हरिता चयेति च॥ शार्दूलविक्रीडितमित्यनेन छंदः सूचनमिति॥ अधुना राधिका सखी कृष्ण एकं राधायाः
कष्टचेष्टितमाह॥ स्तनेत्यादि गीतस्यास्य देशीयरागः एकतालीतालः रागलक्षणं च। आस्फोटनाविद्युतरोमहर्षो निबद्धसं
नद्धविशालबाहुः। प्रांशुः प्रचंडद्युतिरिंदुगौरो देशाखरागः किल मल्लमूर्तिः गीतार्थस्तु॥ हे केशव कृष्ण त्वद्विरहे सति राधा एवमेव
कुरुते। सा कृशतनुर्विरहक्षीणदेहा स्तननिहितं कुचसमर्पितं उदारं मनोहरं तं हारमपि भारमिव मनुते जानाति। हारस्य दुःखेन भारसाम्यं। कलेन ४
सा सरसमसृणं द्रवरूपं चिक्कणं मलयजपंकं चंदनलेपनं वपुषि शरीरेपि विषमिव गरलसहशसशंकं शंकायुक्तं यथा स्यात्तथा पश्यति अव
लोकयति। पंकः पापे च कर्दमइतिधरणिः। शीतलत्व सुघटत्व मसृणत्व स्निग्धत्वादिभिश्चंदनलेपस्य पंकता यथा विषं तापकारि तथा चंदन
लेपोपीत्यर्थः। सश्वसितपवनं निश्वासवातं अनुपमपरिणाहं अतिदीर्घसदाहं उष्णत्वाद्दाहयुक्तं। मदनदहनमिव काम संबंधिनमग्निमिव

नकलयति नजानि नो कीदृशो विदितो दृष्टा शार्विकस्यो यस्मिन्त्वं अनिसंतापजनककोऽल्पदत्रकानो जो दिनत्वादंगारसाम्यं ५८

16 वहतिधारयति। आभोगे परिणाहः स्यादिति शाश्वतः। सा दिशि दिशि प्रतिदिशं न[illegible]यननलिनेने त्र पद्मं किरति क्षिपति। त्वद्दर्शनकांक्षया
सर्वतः पश्यतीत्यर्थः। सजलकणजालं अश्रुकणसमूहसहितं। कीदृशमिव। विगलितनालमिव। विगलितास्त्रुटिता नाला येन विचलित
नालमित्यपि पाठः। तत्रायमेवार्थः। एतेन नयनयोरतिदीर्घत्वमुक्तं। यद्वा। कस्मात्स्वच्युतत्वाश्रु कृत्वा तत्कंदनेनलिनस्य सितत्वाच्च पद्मेन सादृश्यं॥
यद्वा। विगलिता त्रुटिता नाला यस्य तत्य[illegible]मीतद्वादृतिविशेषणद्वारेण विशेष्यप्रतिपत्तिरिति। नयनमाश्रित्य व्याख्येयं। नयनविषयं च सुगोचरं
किसलयतल्पमपि विहितेति पदे क्रियाविशेषणं वा। सा पाणितले न हस्ततलेन कपोलं न त्यजति। सचिंतत्वात्। कमिव। सायं संध्यायां अलोलं धी
रं बालशशिनमिव हिता पा चंद्रमिव हस्तपृष्टतलेन कपोलस्य किंचि दृश्यते तया बालचंद्रसादृश्यं। बालचंद्रस्य त्वसूर्यसंनिधानात्पांडुरत्वमथ करत्वं
च भवति। कपोलस्यापि तथात्वं विरहेण युज्यत एव। सायं संध्या लोहिता पाणितलमपि लोहितमिति सादृश्यं। सानिकाममतिशयितं सकामं साभिला
षं यथा स्यात्तथा हरिरिति रूपति ब्रूते। कीदृशी विरहेण वियोगेन विहितमरणेव। अन्योपि मरणकाले हरिरिति हरिरिति रूपत्येवं ध्वनिः। अयत्रापि ज
प कामनाव त्वं हरिरित्यादि मंत्रश्च भवतीति ध्वनिः॥ ८८ श्रीजयदेवभणितं जयदेवगीतं सुखयतु प्रीणयतु। श्रोतृजनानित्यर्थात्। कीदृशं केशव
पदं कूलसंनिधानमुपगतमुपनीतं। यद्वा। श्रीजयभणितमित्यनेन प्रकारेण गीतमुपनीतं उपस्थितीकृतं॥ केशवपदं केशवस्य स्थानं यस्य य स्मा
यो वा त्राणावायत्र सवेल्लजनस्तं सुखयतु। पदं स्थाने च वा कोचसंनिधिष्वचसाययोः। त्राणेपि दमास्याातमिति विश्वः॥ अधुनाभग
वतः समागमाभावाद्वश्यं साप्रियतइति सूचयति सा रोमांचतीत्यादि हे रवर्वैद्य प्रतिम सौंदर्येणाश्विनीकुमारसदृश यदि प्रसीदसि
प्रसन्नो भवसि। तदा मत्सखी राधा एतावति एतावत्परिमाणे अतनुज्वरे कामपीडायां ते तव प्रसादनुरागात्त्वङ्गीवेदेव। यद्वा। रसादिति ल्य
ब्लोपे पंचमी। तेन रसं शृंगारं प्राप्येत्यर्थः। कामानलपीडिता या तस्या व्यापारमाह। सा राधा रोमतनूरुहमंचति उद्गमयति। अंतर्भावितण्यर्थं
। यद्वा। रोमांचं करोतीत्यर्थे सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्य इति क्विप्। क्विबंतं धातुत्वं न जहतीति धातुत्वेलङादयः। सीत्करोतीति सीत्कारं त ::
नुते। विलपति परिदेवते। उत्कंपते कंपते। नवति। ताम्यति ग्लाना भवति। तमु ग्लानाविति धातुः। ध्यायति चिंतयति। उद्भ्रमति उच्चैर्भ्रमिता भवति॥ १६

त्वा तर २ – रोमांचति २

स्तु:

प्रमीलति मुद्रणमक्ष्णोः करोति। विलपति इतस्ततो वदति। उद्याति ऊर्ध्वं गच्छति। मूर्छति मूर्छां लभते। अत्र पूर्वार्धे पूर्ववत् एवोक्तः। अन्यथा यदि न प्रसीद
सि तदा हस्तकस्य कः। न कोपि वेद इति कृत्वा हस्तको हथा गीत प्रसिद्धः। सोपि त्यक्तः। हस्तालंबो इतरपरास्त इत्यर्थः। ध्वनिस्तु करचवैद्य प्रति मस्वर्गवैद्यतुल्य चि
कित्सक यदि प्रसीदसि तदा तव प्रसा[…]भावात् दत्तनुज्वरे महति ज्वरे रोगे तव रसात्व पारदादिघटितगुटिकातः रसं प्राप्य सा किं न जीवेत् अपि जीवेदेव। मह
ति ज्वरे रोमांचादयो भवंत्येव। अन्यथा रसदान व्यतिरेकेन हस्तको व[…] ग्लुप चयादिरपि त्यक्तः॥ अवश्यं म्रियत एव यतः। कीदृशी। वरतनुः शो
भनशरीरा। तथा च सुरतार्थं सेवयोग्येत्यर्थः। ध्वनिपक्षे समस्तगुणवतिशरीरे रक्षणेनातीव पुण्यलाभो भवति। रसो गंधरसे स्वादे रक्तादौ विष
रागयोः। शृंगारादौ द्रवे देह वीर्य धातुषु पुपारदे इति विश्वः। क्वचित्त्यक्तो न्यथा नो न करस्तिपाठः। तत्र पक्षे अन्यथा यदि न प्रसीदसि तदा तत्को यमस्त्य कोन
स्यात्। अवश्यं यमपुरगमनं मरणमिति यावत्। एतद्वस्तु राधां नानुस्मरतीति कृष्णं निंदितुमाह॥ ॥स्मरेत्यादि॥ हे कृष्ण उपेंद्र राधां स्म
रेणातुरां कामेनार्त्तां विमुक्तबाधां त्यक्त्वा पीडां न कुरुषे। अतो वज्रादपि दारुणोसि कुलिशाधिक विषमोसि। हे देव न वैद्य हे द्य अश्विनीकुमार
व स्त्रियरूप वन्नपावि चिकित्सकत्वेन या अश्विनीकुमार सामग्री। औषधान्वेषण जन्यमपि दुःखं ते न भवितेत्यत आह। त्वदंगसंगस्तव शरीरसं ध्यत्
बंध अमृतमिव तन्मात्रेण साध्यां प्रतिकार्यां सारामिति च पाठः। तत्र त्वदंगसंगामृतमात्रेण सारं बलं यस्या[…] अन्यो […] धातुरोगी देवता
तुल्येनामृतदानादिना साध्यते रोगरहितः क्रियते रोगी च हृद्यं वस्तु सेवत इति ध्वनिः। यद्वा। देवत वैद्य हे अश्विनीकुमार […] रूपक हृद्यं त्वदंगसं
गामृतं हृद्यं मनोहर इत्यर्थः। मात्रं कार्त्स्न्ये वधारणे इत्यमरः। छंदस्त्वेदमुपेंद्रवज्रनामकं॥ एतादृग्वस्तु पि राधा त्वच्चिंतने नैव क्षणं जीवतीत्या
ह। कंदर्पेत्यादि हे कृष्ण अस्या राधाया श्वेत श्चितं कर्ट चंदन चंद्रमाः कमलिनी चिंता सुमलयजशीतांशु पद्मिनीनां चर्चा सु चिरकालेसं
ताम्यति म्लायत्याश्चर्यं चित्रं। कीदृश्याः कंदर्पज्वरेण कामतापेन यः सन्न्यज्वरः पीडा तेनातुरतनोः पीडितांगायाः। अतिशीतलवस्तुषु संतप्ता
ना मननि […] त्याश्चर्यकरं। यद्येवं तदा कथं तादृशि महाज्वरेपि ति तस्यां राधायां जीवनमिति आशंक्याह। किंत्वित्यादि। किंतु रहस्ये कांते छि
तात्मामेवैकं प्रियं ध्यायंती चिंतयंती क्षणं मुहूर्तं क्लांति वशे नास्मिन् क्षणे नायातः क्षणांतरेण समागमिष्यतीति अनुरागेण प्राणिति जीवति

कथमपि

17 कीदृशं त्वां केनापि प्रकारेण शीतलतनुं चंदनादि कं वाप्यशीतलशरीरं प्रयत्नाक्रांतिवशेनोपः शैत्येन शीतलतनुं स्वच्छशरीरं स्मात्वत्संगमाय
अनिशमेव संतप्यत इति भावः। अपि कीदृशं त्वां प्रियं वल्लभं। सा कीदृशी। क्षीणा कृशांगी अपरपीडनासहेत्यर्थः। कचिन्नुत्तां तिवशेनेति पाठ
स्तत्र क्रांत्या आयत्तत्वयेत्यर्थः उभयोः पूर्वकालानुरागं वक्तुमाह क्षणमित्यादि हे कृष्ण यया राधया पुरा पूर्वस्मिन् समये तेतव विरहो वियो
गः क्षणमल्पतरकालमपि न सेहे न सोढः। असौ मत्सखी चिरविरहेण बहुकालवियोगेन रसालशाखी आम्रशाखी पुष्पितायां मुकुलि
तायां विलोक्य दृष्ट्वा कथं श्वसिति जीवति। पया कीदृश्या। नयननिमीलनखिन्नया। निरंतरनिरीक्षणविघातात् चक्षुर्निमेषदुःखितया। श्वसि
तीति श्वस प्राणने इति धातुः। छंदोप्यदः पुष्पिताग्रानामेव॥ सर्गांतिश्राशिषमाह॥ वृष्टीत्यादि कंसद्विषः कृष्णस्य बाहुः केनाभिवतां सामा
जिकानां सुखस्य श्रेयांसि कल्याणानि तनोतु विस्तारयतु। कीदृशस्य गोपतनोः। गोपस्य तनुरिव तनुः शरीरं यस्य। कीदृशो बाहुः। वृष्ट्या जल
कुंज वर्षणेन व्याकुलस्य गो[illegible]स्यावनरसात् क्षणानुरागात् श्लोवर्धनमानं गिरिमुद्धृत्य उत्तोल्य चिरं चिरकालं बिभ्रद्धानः। पुनः कीदृशः। वल्लवी उत्पाद्य
भिर्गोपीभिरधिकानंदात् दत्तनिहर्षीच्चुंबितः। कीदृशेन दर्पेण पर्वतोद्धरणाहंकारेण॥ ताभिरर्पितादन्ता अधरतद्याः सिंदूरमुद्रा इव लोहितत्वात् ताभिः करणभू
ताभिः अंकित इव चिह्नित इव। दर्पेणातिशय बलसंपन्नत्वगौरवेणामुद्रित इति भावः॥ क्वचित्तु कंदर्पेणेति पाठः अत्र कामेन तादृशा सिंहरमुद्रया अंकित
इव अतिमहत्कर्म कारित्वादित्यर्थः। बिभ्रदिति नाभ्यस्ताच्छतुरिति नुमो निषेधः। स्निग्धः स्नेहवान् माधवो यत्र॥ ॥इति श्री जगद्देवविरचितायां गीत
गोविंदटीकायां सारदीपिकां चतुर्थः सर्गः॥ ॥ ॥अधुना कृष्णप्रेरितां इतां राधामाह॥ अहमित्याह। राधायाः सखी पुनरेत्यागत्य पुनर्भू
योपि राधामिदं वचनं जगाद प्राह। कीदृशी सखी। इह यमुनातीरनीरकुंजे हं निवसामि तिष्ठामि। त्वं याहि गच्छ। मद्वचनेन मम वचसा राधामनुन
य प्रबोधय। आनयेथाश्च इत्येवं कृत्वा मधुरिपुणा कृष्णेन प्रयुक्ता आज्ञप्ता॥ सखीवचनमेव गीतेनाह। हरिरित्यादि गीतस्यास्य देशवराडी
रागः रूपकतालः। रागलक्षणं तु। विनोदयंती दयितं सुकेशी सुकंकणा चामरचालनेन॥ कर्णे दधाना सुरपुष्पगुच्छं वरांगनेयं कथिता वराडीति। १०
अस्मिन्सर्गे भिसारिकावर्णनीया। संस्कृता प्राकृतं मिश्रैततोपभ्रंशभाषणी। ततः प्रियतरावेश्या सर्वतश्चाभिसारिकेति भरतः। तस्याश्च लक्षणं भरते

प्र

लज्जां हित्वा मम कृष्णेयो वेनेन मदेन वा। अभिसारयते कांतं सा भवेदभिसारिका। गतार्थस्त्। हे सखि हे राधे तव विरहे सति वनमाली कृष्णः सीदति
अवसन्नो भवति। कस्मिन्सति त्याह। मदनमुपनिधाय कामदेवं सन्निधाने ऽर्चयित्वा मलयसमीरे दक्षिणानिले वहति सति। यद्वा। उपसमीपे नि
धाय मदनेन सहायं कृत्वेत्यर्थः। यद्वा। उपनिधाय उपहारं कृत्वा मदनजमानंदमुत्पाद्येत्यर्थः। पुनः कस्मिन्सति। विरहि हृदय दलनाय वियोगि
नां चित्तविदारणार्थं कुसुमानि करे पुष्पसमूहे स्फुरति विकसति सति। स्फुट विकसने धातुः। शिशिरमयूखे चंद्रे दहति सति मरणं चानुकरोति
मृत्युमुपकल्पति स्वीकरोतीति यावत्॥ सइत्यध्याहार्यं। मदनविशिखे कामशरे पतति सति। विलपति परिदेवते। विकलतरो ऽत्यर्थं न विकलः
ततो विकलतरो तीत्यतिशये ष्ठनधात्यते। यद्वा। अतिविलपतीत्यन्वयः। कश्चिद्विकली करोतीति पाठः। अत्राविकलं विकलं करोतीति वाक्ये ऽभूततद्भावे च्विप्रत्यय
स्तिप्र योगे संपद्यकर्तरि च्विरिति च्विप्रत्ययः। मधुपसमूहे भ्रमरौघे ध्वनति शब्दं कुर्वति सति कर्णमपि दधाति तिरोधत्ते। कृष्णः कराभ्यामिति
रहे० शेषः। मनसिचिते वलिते विसंभव वियोगे सति निशि निशि प्रतिरात्रं रुजमुपनयति पीडामनुभवति। विपिनविताने वनविस्तारे विस्तीर्णे वने से
ति संतिष्ठते। ललितधाम सुंदरगृहं त्यजति परित्यजति। धरणिशयने भूमिशय्यायां लुठति विचेष्टते। तव नाम हे प्रार्थने। नाथ राधे वल्लभे इति कृत्वा
बहु विस्तरं किल पति जल्पति। धामदेहे गृहे रश्मौ स्थाने जन्मप्रभावयोरिति विश्वः॥ विरहविलसिते न वियोगविलासेन भणति सति कविजयदेवे मन
सिजदेवसंबंधि चित्ते सुकृते न पुण्येन हेतुना हासस्फुरद्यतु कृष्णो ऽभ्युदितो भवतु। मनसि कीदृशि। रसभसविभवे रभसस्य हर्षस्य विभवः प्राचुर्यं य
त्रा गीते न हरेर्नामकीर्तनात् दति पुण्यं संचयतीति भावः। यद्वा। कविजयदेवे अर्थाद्धरेर्विरहविलसिते न हेतुना भणति सति मनसिं कृते न हरि
मु५ रुदयति गत्तृणां श्रोतृणां चेत्यर्थः॥ सोपि तव प्राप्त्यर्थं अनिशं तपस्यतीत्या [illegible] पूर्वमित्यादि॥ हे राधे माधवः कृष्णः भूयः पुनरपि तस्मिन्नेव निकुं
ज मन्मथमहातीर्थे लताविहितगृहमेव कामनातीर्थं तत्र दुर्गकुचकुंभनिर्भरपरीरंभामृतं त्वदीयस्तनकलशगाढालिंगनं पीयूषमिव वांछति॥
कस्मिन्यत्र त्वया सह रतिपतेः कामस्य सिद्धयो मनोरथ प्राप्तयः आदिताः प्राप्ताः किं कुर्वन्। अनिशं वारं वारं त्वां ध्यायन्नुचिंतयन्। तवैवालापः
संभाषणं मंत्रादुरमिव तदपि जपन्न् किंचित्तु महातीर्थे तपस्यत्य साविति पाठः। असो पस्त्वा वान्माधवः तपस्यति तपश्चरति। तपसः परस्मैपदं चेति

कयङ्।परस्मैपदत्वा। ध्वानिस्त्र। अन्ये नायिका कुंजमन्मथमहातीर्थतपश्चरित्वा अरिमारिस्मिद्धीः प्राप्य जपित्वा अमृतं मोक्षः प्राप्यतइति। श्रेयोनिः
श्रेयसामृतमित्यमरः। त्वयेत्यत्र सहार्थेतृतीया। अधुना उद्देशकस्थानेतिष्ठेतेकृष्णमनुसर्तुंत्वरयति। रतिसुखेत्यादि। यमुनातीरवनेताराधिके
रणोवनेवनमाली कृष्णो वसतितिष्ठति। कीदृशेतीरे। धीरसमीरे मंदः समीरो वायुर्यत्र। एतेनस्थानस्य मंदपवनाश्रयत्वेनोक्तं अङ्गनकत्वमुक्तं। गोपीपी
नपयोधरमर्दनचंचलकरयुगशाली। हेनितंबिनि विशिष्टश्रोणियुक्ते तं हृदयेशं भावितनाथं पतिमनुसरानुगच्छ। गमनविलंबनमभिसारकाला
तिपातं न कुरु। रुनकुर्याः। कीदृशं तं। अभिस्त्रियते ...त्रेति अभिसारः तत्रगते। करणाधिकरणयोश्चेति घञ्। रतिरित्यादि। अभिसारे कीदृशे। रति
सुखसारेरतेः सुरतस्य सुखंसारमुत्कृष्टं धनं न्याय्यं वायत्रयमुनातीरइत्यस्य वा विशेषणं। तत्ररतिसुखसारे शृंगारसौख्यप्रदाने। किंभूतं। मदनव
न्मनोहरोवेषोयस्य। यद्वा। मदयतीतिमदनः। तादृशोमनोहरोवेषो लंकारोयत्र। आकल्पवेषौनेपथ्येइत्यमरः। हृदयेशमित्यनेनसर्वेदाल्वहृदय
स्थः सचहृदयं चतत्वाधीनमितिसंदर्शितं। समीरमारुतमरुज्जगत्प्राणसमीरणाइत्यमरः। धीरः पंडितमंदयोरितिधरणिः। समाधवोनामसमेतंतव
संज्ञाक्षरसहितं कृतसंकेतं चयथास्याद्देवं क्रियाविशेषणं। मृदुवेणुमनोहरवंशंवादयते शङ्खायति। अहमिहनिवसामिराधिकेत्वरितमेही
तिकृ... तसंकेतमितिभावः। मृदुकोमलंयथास्यादेवंवेतिक्रियाविशेषणं। संकेतवंशनादेमृदुत्वमुचितमेव। नेष्विति प्रशंसायांसंबोधनेवा।
हेराधे तेतवतनुसंगतंशरीरसंपर्कं रेणुमपिपवनचलितंवातेननीतं बहुमनुतेआद्रियते। तनुसंगतश्वासोपवनचलितश्चेतिविशेषणस
मासः। पूर्वंयस्मिन्निकुंजेयुवयोः केलिरभूत् तत्रपवनेन चालितमपिरेणुं शरीरेनिपतितं साधुतरंमन्यते किंपुनस्त्वामितिराधायामनुरा
गातिशयोदर्शितइतिभावः। यद्वा। तेतनुसंगतेनपवनेनचलितंरेणुं बहुमनुते। तनुसंगतेत्यपिपाठः। तत्रअतनुअनं... ल्पं यथास्यात्तथा
बहुमनुतइत्यर्थः। सकृष्णः शयनंशय्यांरचयतिनिर्मातीति। नवपंथानं चकितनयनसहितं यथास्यादेवं पश्यति। कीदृशंपंथानं। शंकितं तर्कितं
भवत्याउपयनिमुपस्थितिः समीपगमनमितियावत् यत्रपथि। कस्मिन्सति। पतत्रेपक्षेतद्योगात्पक्षिणिवापततिगच्छतिसति पत्रेपर्णेविच
लतिकंपमानेस्खलतिवासति। पतत्रेपक्षिणः पक्षेविचलतिसति चलद्रूपेसतिपत्रेपर्णेपततिभ्रमतिसति। पात्रोपक्षिपक्षेचलेनपत्रस्खलने

राधासमायातेति शंकया चंचलनयनेन शय्या विरचिता सर्वतो विलोकितं चेति वदेकतानना कृष्णस्य सूचिता। पतत्रं पत्रपक्षिणोरिति धरणिः। भवदु
पयानमिति सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्य इति पुंवद्भावः। हे स[illegible]खि राधे कुंजं चल गच्छ। अभिसारानुरूपवस्तुग्रहणार्थमाह। मंजीरं नूपुरं त्यज
मुंच। कीदृशं अधीरमन्मदं अधैर्यवद्वा। मुखरं वाचालं शब्दसहितमिति यावत्। पुनः कीदृशं केलौ क्रीडायां सुलोलमतिचंचलं। अत एव रिपुमिव शत्रु
सदृशं। रिपुरपि मुखरश्चंचलो धीरश्च भवति। कीदृशं कुंजे। सतिमिरपुंजं तमस्तोमान्वितं। वृक्षाणां नैरंतर्यात् [illegible]कृततमःसहितं। नीलं निचोलं श्यामवस्त्रं
शीलय परिधेहि। भातनामनेकार्थत्वात् शीलिः परिधानार्थः। तमइव पुंजमिति च पाठः। तत्र नीलनिचोलस्य विशेषणं। अतिनीलं वसनमित्यर्थः। एतेना
तिनिभृताभिसारसमय उक्तः। अंधकारे दृश्यत्वार्थं नीलवस्त्रपरिधानं युक्तं। शुक्लादिवस्त्राणां दूराद्दृश्यतया न प्राशस्त्यमिति भावः। मंजीरो नूपुरो
स्त्रियामित्यमरः। निचोलो दृश्यवस्त्रयोरिति विश्वः। हे नीतमोरांगि मुरारेरुरसि कृष्णस्य वक्षसि उपहितहारे उपहितो न्यस्त आरोपित इति यावत्॥ हासे
मुक्तावली हारो यत्र। कुत्र समये राजसीत्याह। रतिविपरीते पुरुषायिते सुरतकाले विपरीतसुरत इत्यर्थः। पुनः कीदृशे रसि। सुकृतस्य पुण्यस्य वि
पाकः परिणामो यस्मिन्। अतिपुण्यमय इत्यर्थः। केव राजसे। घने मेघे तरलबलाके वा। चंचलबकसमूहे तडिदिव विद्युदिव। विद्युत्पीतवर्णा चंचला
च। राधा गौरवर्णा पुरुषायिता च चंचला च तस्याश्चलनात् कृष्णहृदयहारस्यापि चलत्वं। कृष्णस्य च श्यामतया बालकानां श्वेतत्वेन हारस्यापि श्वेत
नि तयासाम्यं। यद्वा। उपहितहारे उप[illegible]हितरत्नावलीके तिराधासंबोधनं। सुकृतस्य पूर्वजन्मोपार्जितस्य पुण्यस्य विपाकं फलं यस्यां तादृशि हे इत्यपिदं प =
संबोधनं वा चितत्काले कृष्णस्य प्राप्तिः पुण्यसंचयफलमेवेति भावः। उपहृतहार इति क्वचित्पाठः। तत्र उपहृतः स्थानांतरं नीतो हारो यया विपरीत
सुरते हि पृष्ठदेशे स्थापितहारः प्रायो भवतीति भावः। उरो विशेषणमेव वा॥ तत्राप्ययमेवार्थः॥ बलाका विसकंठिकोऽस्यां [illegible]द्बलाका विसकंठिका॥ बलाका
कामुकी मा द्रुर्बलाकश्च बकोमत इति शाश्वतः। तरला चासौ बलाका कामुकी चेति तरलबलाका तादृशि हे। तरलत्वं च विपरीतसुरते नैवेत्युक्तमेवाय
द्वा उरसि कीदृशो। तरलबलाके चंचलकामुकीके। तदानीं कृष्णवक्षःस्थले भवत्येव रूढमिति तरलबलाकत्वं तस्यापि भवतीत्याशयः। पीतो गौरो हर
रिद्राभ इत्यमरः॥ पंकजनयने पद्मनेत्रे हे। पल्लवः किसलयः शयनं शय्या यस्य तस्मिन् कुंजे त्वं जघनं कद्याः पूर्वभागसंगमय। यद्वा। पंकजनयनं यं
स्य तस्मिन् पुंडरीकाक्षे कृष्णे पल्लवकृतशयने च जघनं घटयेत्यर्थः। जघने कीदृशं। विगलितं स्रस्तं वसनं वस्त्रं यस्मात् तत्तथा। तथा परिहृतात्यको

रसनायां तु इयं घंटिकायेन अनतएवापिधानं आवरणरहितं। कमिव निधिमिव। शंखादिरत्नमिव। कीदृशं। हर्षनिधानं आनंदालयं। निधिरपिप्राप्तस्य आनंदा
श्रयएव भवतीत्यर्थः। पुनः कीदृशमपिधानं पिधानशून्यं उद्घाटितो निधिर्हर्षनिधानं भाति। क्षुद्रघंटी तु रसना स्त्री सिंजिन्योरिति धरणिः। निधानं त्वाल
19 ये निधावपि विश्वः। हर्षस्य निधानं आश्रयो यस्मिन्नु इति समासः। हरिः कीदृशः अभिमानी मनस्वीत्यर्थः। महामनस्विता लाघवं न सहत इति भावः। इदा
नीं सांप्रतं इयं रजनिः अपि रात्रिरपि क्षिप्रं मम वसानं याति यास्यति। भविष्यति लट्। मम वचने कुरु। कीदृशं वचनं। सहत्वरया वर्त्तत इति सत्वरं। शीघ्रं तत्र प्रधानी
ता दृशं रचनमलं कृत यत्र मम वसाशा ध्रुवं गच्छेत्यर्थः। मधुरिपुकामं कृष्णाभिलाषं पूरय संपूर्णं कुरु। त्वाय... सामिलाषस्य तस्य त्वयैव प
रमाभिलाषपूरणमिति भावः। रजनी विरामते नाभिसरणकालस्यात्यय... ताम्सूचिता। कृतहरिसेवे विहितकृष्णप्रणामे। आयुक्त जयदेवे परमर
मणीय मतिशयमनोहरमिदं गीतं भणति सति प्रमुदितहृदये हर्षितचित्तं यथा स्यात्तथा हरिं नमत। सज्जना इति शेषः। यद्वा। जयदेवे भणति सति
प्रमुदितहृदयं हर्षचालितचित्तं कृष्णं नमत इत्यर्थः। एतेन हर्षयुक्तकृष्णनमने हेतुरिति कृष्णः प्रसीदतीति ध्वनितं। हरिं कीदृशमित्याशंक्याह। विकिरती
त्यादि। नागते वेयमिति कृत्वा मुहुर्वारं वारं श्वासान्विकिरति क्षिपति नायातापि भदितयाऽनुध्यानेनैव तां पश्यामीति कृत्वा ध्यानेन मुहुः पुनःपुनः पुनः कृत्वा॥
कुंजं प्रविशति। एकवारमहत्त्वापि बहिर्नायाति। निकुंजस्तं पुनःपुनः प्रविशतीति कुंजप्रवेशनं पुनर्न घटत इति भावः। गुरुजनभयाद्वामस्यैव को शादिशो वीक्ष्य
पानुबंधाद्वा नानाविधकारणेन वा नायातेति चिंतयन् मुहुः पुनःपुनर्बहु किस्तरं कूजन् स्वस्य च्यक्करा इदं कुर्वन् ताम्यति ग्लायति। केनापि निमित्ते ते मुहुः पुनःपुनः
नाधुना याता आगतप्राया सेति मनसि कृत्वा मुहुर्वारं वारं रच्यां रचयति विस्तारयति। मयि दृष्टानुबंधा समागत्य निकटं मदीयचित्तानुराग
जिज्ञासार्था अत्रैव क्वचित्प्रदेशे निलीयति छन्ना तिष्ठतीति मत्वा पर्याकुलमतिर्यस्तं यथा स्यात्तथा मुहुरीक्षते। सर्वतः पश्यतीत्यर्थः। कूजन्निति कूज
अव्यक्ते शब्दे धातुः शत्रं तः। कदनं पापपाड्योरिति धरणिः॥ इदानीमेव गमनं योग्यमिति सोपपत्तिकमाह॥ त्वद्वाम्येनेत्यादि॥ हे मुग्धे मनोहरे
त्वद्वाम्येन असूयया सह समं तिग्मांशुः सूर्योऽस्तं गतो हृदयमपि अभिसरणनिवर्तकं नितांतमिति भावः। समग्रं संपूर्णं यथा स्यात्तथा गोविंदस्य कृष्णस्य मनो
रथेन वांछया सममं तमश्चांधकारः सांद्रतां निबिडतां यातं प्राप्तं। अस्तमिते दिनकरे अनुदिते शशिकरे च तमःसांद्रं भवत्येव। गोविंदमनोरथोऽप्यधुना अभिस २९
रणसमयमासाद्य प्रज्ञात इति भावः। सत्वरं गम्यतां यामदस्थर्थ नामदीयायाचना मादीर्घा सती कोकानां चक्रवाकानां करुणस्वनेन विरहदीर्घनादेन

यद्वा। कोकिलस्य पतीनां संधिकि चित्रोजश्रीवाह। एतादृक् तमो वर्तते अस्य समीपस्था। वपि नोपापनी अन्यस्ताम्नानं शान्ति। अन्यमंकान्तकार्याय मेवाभिसारिका त्वरतेत्यादि ३

स

सदृशी तुल्या। तत्तस्माद्विलंबनं विफलं कालातिपातो निरर्थकः। असावभिसारलक्षणोऽभिसारकालो रमणीयः तां दृशोः समुत्कवल्लभे ईदृशे च गमनकाले प्रियसरव्यां च मथि साथ हार्यां गमनविलंबनं मुग्धत्वं सहोक्तिनामालंकारः। तथा च दंडी। साहसोक्तिः सहभावस्य कथनं गुणकर्मणोरिति त्वद्वाक्ये नेत्यादौ सहयुक्ते प्रधानमिति तृतीया। ।तत्र गतायास्तत्र कुतूहलानि भविष्यंतीत्याह। आश्लेषादिति इह निबिडे तमसि अंधकारे दंपत्योर्जायापत्यो क्रीडाविमिश्रो लज्जासमन्वितः कः को न रसो भवति व्रीडया युक्तः सर्व एव रसो भवतीत्यर्थः। कः दृशयोः। अन्यार्थं परस्त्रीपुरुषार्थं गतयोः। भ्रमाद्भ्रांतेर्गाढांधकारवशात् दूतस्ततो भ्रमणाद्वा मिलितयोः। कुत्रावसर इत्याह। आश्लेषादालिंगनादनु पश्चात्। चुंबनात्पश्चात्। नखोल्लेखात् नखक्षतात्पश्चात्। स्वांतजः प्रोद्बोधादनु स्वांतजो मनसिजः कामस्य प्रोद्बोध उद्रेकस्तस्मात्। संभ्रमात्स्वत्वरं मनोरथः सिध्यति वांछायाः पश्चात् इत्यर्थः। रतारंभादनु सुरतोद्यमा

१ स्वयो त्पश्चात्प्रीतयोस्तत्तयोः संभाषणेः स्मरयुद्धारणे ज्ञानतो नर्म मम इयं भार्या न मम भार्यं पतिरित्यवगच्छतोः सात्त्विकं भावमासाद्य यथार्थमवगच्छतेरिति भावः। एतेनास्मिन्काले सर्व एव जनाः कामान्नभिवंतीति ध्वनिः। अत्राश्लेषानंतरं चुंबनं। ततो नखक्षतं। ततः कामविशेषः। ततो मैथुनं। ततः प्रीतिः ततो रसभावना। इति क्रमोऽपि कामशास्त्रकथितः। तदुक्तं भरते। आश्लेषचुंबननखक्षतकामबोधशीघ्रत्वमैथुनमनंतसुखप्रबोधं। प्रीतिस्ततोऽपि रसभावनमेव कार्यमेवं निगतोत चतुराः सुचिररमंत इति। स्वांतेजातः स्वांतजः स सम्यांज नेइः। जाया च पतिश्चेति अत्र जाया या जनं भावो दंभावश्च नि पात्यते। दंपती जंपती जायापती भार्यापती च ताविप्यमरः। त्वल्लाभमात्रेण वकुल्कृतार्थः स्यादित्याह। सभय इत्यादि। हे सुमुखि शोभन वदने राधे सुभगः सुंदरः सकृष्णः त्वां पश्य दर्शनं कृतार्थतां उब्ब मनोरथत्वं ययेतु गच्छतु। दृशिरत्रज्ञानार्थः। का दृशी त्वां। सति मिरे तिमिरयुक्ते पथि वर्त्मनि सभयचकितं भयविस्मयाभ्यां चकितं यथास्यात्तथा ता दृशी वा दृशं नयनं विन्यस्यंती समर्थयंती निबिडतमतमो दर्शनाद्भयं तादृशि गाढांधकारे शंकास्ते तो गच्छामीति विस्मयः। प्रियतमेन स्मरसमागमो भविष्यतीति वा चकितां। पुनः का दृशी। कथमपि तमसोऽनेविज्ञात केना पि प्रकारेण संगितरंगिभिः कामकल्लोलशालिभिरंगैरवयवैर्हेतुभूतैः रहः प्रासां निभृते निस्पर्शेऽलक्ष्यां नवदृष्टामिति भावः। कुतिस्स फुर चकित मिति पाठः। तत्र सफरो मत्स्यविशेषः तस्येव चकितं यथास्यादित्यर्थः। तिमिराभिति तिमिरमस्यास्तीति अर्थे अर्शआदिभ्यइत्यचू मत्वर्थीयः। पदं वाक्ये च पादे च व्यवहारापदे शयोरिति विश्वः। कोपात्पदशा हृस्य क्लीबत्वं। सर्गांते तमः प्रतिरूपकं कलंकी कीर्तयन्नाशिषमाह।।

पातं ८

20 राधेत्यादि॥ स देवकीनंदनः कृष्णः त्वां सामाजिकप्रधानं अवतु रक्षतु। राधायाः मुग्धमुखारविंदे मनोहरमुखपद्मे मधुपो भ्रमर इव लीनः तया
मधुपानकर्तृतया च साम्यं। यद्वा। राधामुग्धमुखारविंदं मधु पिबतीति मधुपः। पुनः कीदृशः। त्रैलोक्यस्य त्रयाणां जगतां मौलिस्थलीनां चूडा
प्रदेशानां नेपथ्योचिते प्रसाधनयोग्यं नीलरत्नमिव यः। कांतत्वान्नीलदर्शनत्वाच्च इंद्रनीलरत्नसादृश्यं। पुनः कीदृशः। अवनीभारार्थं
भूभारनिमित्तं अवतारमुत्पत्तिर्येषां वेदादिविद्वेषितत्वात्तेषां केशिकंसशिशुपालादीनां अंतकोयम इव संसारकत्वेन नीलकत्वेन सा
म्यं। पुनः कीदृशः। स्वच्छंदानां व्रजसुंदरीणां मनस्तोषे चित्तप्रीतौ प्रदोषो रात्रिमुखमिव जनासां प्रीतिजनकत्वाच्च साम्यं। राधानयनार्थं
सखीप्रस्थापितसा कांक्षः पुंडरीकाक्षोऽयत्रसतथा॥ ॥इति श्रीजगद्धरविरचितायां गीतगोविंदटीकायां सारदीपिकायां पंचमः सर्गः॥ ॥
इदानीं राधाचेष्टितं सखी गोविंदे कथयति॥ अथेत्यादि॥ अथानंतरं गोविंदे कृष्णे राधायाः सखीत चरितं राधायाः पारंपर्याहउक्त
वती। किं कृत्वा। रतां धादृश्वागंतुमशक्तां कृष्णमधिकमन्वेष्टुमसमर्था। पुनः कीदृशी। चिरमनुरक्तां चिरकालमनुरागिणीं। कुत्र दृ
ष्ट्वेत्याह। लतागृहे लतोपयुक्तमंदिरे। कीदृशि गोविंदे। मनसिजनंदे। कामवृद्धिकारिणि। क्वचित्तु मनसिजमंदे इति पाठः॥ तत्र। मनसिजे
नमंदे विकले इत्यर्थः। ।तच्चरितमेवाह। पश्यतीत्यादि। गीतस्यास्य गुणकरी रागः। रूपकतालः रागलक्षणं तु। रतोत्सुका कांतपथप्रती
क्षा मापालयंती मृदुपुष्पतल्पे। इतस्ततः प्रेरितदृष्टिराजविप्रियामातनुर्गौणकरी प्रदिष्टेति। अस्यां गाथायां वासकसज्जा वर्णनीया॥ वासवे
श्मनि सुकल्पित तल्पे या समागमविधिं विदधाना। पश्यति प्रियसमागमर शय्यां तामिहाकलयवासकसज्जां। जातार्थस्तु हे हरे नाथ
हे प्रभो वासगृहे तव पूर्वसंकेतवासस्थाने राधा सीदत्य वसन्ना भवतीत्यर्थः। रहस्ये कांते स्थिता सा दिशि दिशि प्रतिदिशं भवंतं प
श्यति त्वामेवावलोकते। कीदृशी। त्वदधरमन्यस्या अधरं तदेव मधुरमधूनि तानि पिबंतं। त्वत्छ इन्य पर्यायः। सर्वादिगणे पठितोऽन्यस्य च इदृस्य
न्यगो यांप्रसक्तिः। यद्वा। त्वत्छ इस्यायत्वादयय स्थाने कार्थत्वादन्यगो यांप्रसक्तिः। क्वचित्तु त्वदधरमधुरमधूनि इति पाठः तस्या अन्यस्या
अधरस्त्वदधरस्तस्या अधरमधूनि सरसमाध्वीकानि पिबंतं धयंतमित्यर्थः। त्वदभिसरणरभसेन तवाभिसारोत्साहेन वलंतीं संभज्यमाना॥

२०

कियंति पदानि चलंती सती पतति सा अधिकं गंतुं न पारयतीत्यर्थः॥ विहिताः कृता विशदाः शुभ्रा बिसकिसलया मृणालांकुरा एव वलयाः
कटका यया तव रतिकलया तव सुरतचिंतनेन परमिह समये जीवति। अन्येन हेतुना न जीवतीत्यर्थः। कला स्यान्मूलने वृद्धौ शिल्पादौ अंशमात्रके
षोडशांशेऽपि च चंद्रस्य कालचिंतनयोः कला इति विश्वः। मुहुः पुनः पुनः अवलोकिता वीक्षिता मंडनलीला अलंकारविलासो यया॥ अहं मधुरिपुः
कृष्ण इति भावनेन ध्यानेन शीलं स्वभावो यस्याः। एतेन त्वदीयवियोगोपशमाय ध्यानेनात्मानमेव प्राप्य पुरुषायितसुरते लालसामनुवर्त्तते। स्त्रीणां
प्रिया लोकफलो हि वेष इति मंडनस्य शोभा लोकसंकल्पे त्वामासाद्य सा फलं मन्यत इत्यर्थः सूचितः। हरिः कृष्ण त्वरितं शीघ्रं अभिसारम
भिसरणस्थाने कथं नोपैति नायातीति वारं वारं सखी वदति। वदतीति द्विकर्मद्वयनौ निर्देशः। अनल्पं महापरिमाणं बहुतरं वा तिमिरमं
धकारं सा घोरो तिमिरं व्याप्तितुं वर्तते च। कीदृशी। जलधरतुल्यं मेघसदृशं। ईषदसमाप्तौ कल्प देश्य देशीयर इति कल्पप्रत्ययः। कुत इत्यत आह।
हरिः कृष्णः उपगत आयात इति मत्वा हेतोर्नीलस्निग्धतया साम्यमंधकारकृष्णयोः। भवति विलंबिनि विलंबनशीले सति विगलितलज्जा ग
तत्रीडा वासकसज्जा नाम नायिका विलपति विलापं कुरुते। रोदिति च क्रंदति च। यद्वा। वासके प्रशस्तं गृहं प्रशंसायां कन्॥ तत्र शय्या विहि
तसविधाना सेत्यर्थः॥ विलंबोस्यास्तीत्यर्थे अत इनिठनाविति इनिः। यद्वा ताच्छीलिको णिनिः। वासकसज्जा लक्षणमुक्तमेव। श्रीजयदेवकवे
रुदितं भाषितं इदं गीतं रसिकजनं सरसश्लोकं अतिमुदितं हृष्टतरं तनुतां विस्तारयतु॥ ॥ त्वदलाभे विध्यानेनैव शृंगारं सालभत इत्याह। विपु
लेत्यादि॥ हे कितव धूर्त तवामं दंकं दर्पविंतो महत्कोमस्य स्मरणं विधाय कृत्वा ध्यानलग्ना सती मृगाक्षी हरिणनयना राधा रसजलधिमग्ना
शृंगारसागरे लीना बभूवेत्यर्थः। यत्र क्रिया न श्रूयते तत्र भवत्यादयो ध्याहर्तव्याः इति वैयाकरणाः। निमग्नेन विकल्पमाह। विपुला महती पुलक
पालिः रोमांचपंक्तिः यस्याः सा तथा। पुनः कीदृशी। स्फीतसीत्कारं प्रवृद्धसीत्करणं यथा भवति तथा अंतर मध्ये तरेजनिताभ्यामुत्पन्नाभ्यां
जडत्वध्वनिविकारविशेषाभ्यां व्याकुलं यथा स्यात्तथा व्याहरंती वदंती। एतल्लक्षणं जलेशृंगारे निमग्ना तो जनस्य भवति। सीत्कारलक्षण
कोकग्रंथे। ईक्षितस्तनि चेत्कृतस्य च हेत्युतमितरोदनादिकौ। मुंच पाउ यग्रहाण जीवनाधविग्वेरहसि सीत्कृतं विदुः। तच्च नाककपोतको

२१

किल्लाहं सकेकिस हशे रूप कमैं॥ मिश्रितं ग्रहणे के प्रयुज्यते अन्यदा तु विपरीतमीस न इति॥ काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः
इति अमरः। आदिशब्देन विकारादय उक्ताः॥ उभयक्रियाविशेषणेनांगिकः सात्विकश्च कामविकारो दर्शितः। मृगस्येवाक्षिणी यस्याः॥ बहुव्रीहौ
सक्थ्यक्ष्णोः स्वांग इति षच् समासांतः। षित्वात् ङीष् मृगाक्षीति सिध्यति। पालिः स्त्र्यंकपंक्त्यय इत्यमरः। जडस्य भावो जडिमा दृढादिभ्य इमनिच्
प्रत्ययः ध्यानपरा पि राधा त्वां विना न निशां नेष्यतीत्याह। अंगेत्यादि। एषा इति बुद्ध्या प्रत्यक्षीकृत्य वदति। एषा खरतनुः अंग शरीरं राधा
अंगेषु शरीरावयवेषु आभरणमलंकारं बहुशो बहुप्रकारं करोति। एतेन तल्परचना दर्शिता। कृष्णेन सह सुरते सति अद्य मयेदं मिलितं कर्तव्यमिदं
च वक्तव्यं इति चिरं बहुकालं ध्यायति चिंतयति। अनेन संकल्पलीलां गतमुक्तं। इत्येवं क्रमेण आकल्पविकल्प तल्परचना संकल्पलीलाशतया
सकोपि प्रसाधनवितर्कशय्या निर्माणव्यंसचिंतनविलासशत प्रयुक्तापि सती त्वया विना निशां रात्रिं नेष्यति त्वत्संभोगेनैव रात्रिप्रेरणाय समर्था
स्यादिति भावः। अंगशब्देनांगावयवाः करचरणादय उक्ताः॥ लक्षणया तल्पाते न बहुवचनोपपत्तिः। बहुशब्दइति बहुगणवतुडति संख्येति सं
ख्यासंज्ञायां संख्यैकवचनाच्च वीप्सायामिति शस्प्रत्ययः। संचरितुं शीलं यस्येति ताच्छील्ये कोणिनिः। आकल्पवेषौ नेपथ्यमित्यमरः। तल्पं शय्या
ट्टदारेष्विति च। संकल्पः कर्म मानसमिति च। सगंति आशिषमाह। किं विश्राम्यसीत्यादि। गोविंदस्य कृष्णस्य गिरो वाचो उपयंत्यु त्कर्षेण प्र वचनैः तत्रा एवं वदे
शावर्धतामित्यर्थः॥ सायमतिथि प्राशस्त्यगर्भाः॥ सायं संध्यासमयस्यातिथीनां प्राशस्त्यं प्रशंसा तद्गर्भे आशये यासां तास्तथा। दिनांतातिथौ तु इत्यादि पद्य ... मम
विमुखे गते यस्तातकं नृणां॥ तदेनाष्टगुणं पुंसो प्रदापे विमुखे गते इति स्मृतौ यत्प्राशस्त्यं संध्यातिथीनामुक्तं तदन्विता इत्यर्थः॥ यद्वा॥ किं २१ स्फारः ग कर्ष
विश्राम्यसि कृष्ण भोगिभवने भांडीरभूमीरुहीति राधायाव चनं भ्रातर्यासि न दृष्टिगोचरमितः सानंदनंदास्पदं इति गोविंदस्य वचनं
केचिदध्वगमुखाः सायं सुविशिष्टमातिथ्यमवाप्यमुकुर्वारं वारं नंदति श्लाघते। अध्वगमुखानां श्लाघा गिरो जयंति। कीदृश्यः। अतिथि
प्राशस्त्यगर्भाः॥ तत्र ताभ्यां सादृश्यपदिष्टमिति प्रशंसंतीत्यर्थः। गोविंदस्य कीदृशस्य। नंदांतिके नंदगोपपार्श्वे अध्वगमुखात् राधायास्तद्वचनं गोप
तः श्रुण्वतः। किं तद्वचनं तदाह। भ्रातः पथिक भांडीरभूमीरुहि भांडीरनाम्नि वटवृक्षे किं विश्राम्यसि। कीदृशि वृक्षे। कृष्ण भोगिभवने कृष्णस्य ह
पथिकाननात्

रेः भोगिनः शृंगारिणो भवने निवासस्थाने। ध्वनिस्तु कालसर्पालये। एतेनात्र विश्वासो न युक्त इति दर्शितं। इतोऽस्मा दृष्टिगोचरं त्यक्त्वा क्रियमा
णं सानंदनंदास्पदं सानंदनंदगोपगृहं नयामि। राधाया वचनेन तदध्वगमुखानंदं इति केचिन्मुकुन्दरिति च पाठः। तत्र श्लोकार्थे तु राधायास्त
द्वचनं केचिदध्वगमुखान्मुकुन्दं इति प्रशंसंति। अतो गोविंदस्यैव गिरो जयंतीत्यर्थः। कृष्णः केशवल्लीलयोरिति धरणिः। भोगः सुखे स्त्र्यादिभृ
तावहेश्च फणकाययोरित्यमरः। भोगोऽस्यास्तीति भोगी कुलस्थासो भोगी चेति राजदंतादित्वादङ्गस्य परनिपातः। भोगी कामुकसर्पयो
रिति विश्वः। तथाविधामपि राधां मानुसरतीति कुं ग क्रियो वैकुं गायत्र हरिः सतथा। इति श्रीजगद्धरविरचितायां गीतगोविंदटीकायां सा
रदीपिकायां षष्ठसर्गः। अधुना चंद्रोदयवर्णनव्याजेन राधायाः क्लैब्यं कथयितुं कविराह। अत्रांतरे चेति।।७ इंदुश्चंद्रः। अत्रांतरे अ
स्मिन्नेवावसरे वृंदावनांतरं वृंदावनस्य परिसरमवकाशदेशं वा। अंशुजालैः किरणसंघैः अदीपयत्प्रकाशितवान्। कीदृश इंदुः।
स्फुटा प्रव्यक्ता लांछनश्रीः कलंककलेवरस्य यस्य स तथा। कुलटाकुलस्याभिसारिकासमूहस्य वर्त्मपातेन पथः प्रतिरोधेन संजातपातक इव उत्पन्न
पातक इव। योपि पातकयुक्तो भवति सोपि व्यक्तकलंक इव जायत इत्यर्थः। पुनः कीदृशः। दिशः सुंदर्य इव तासां वदनस्य मुखस्य चंदनबिं
दुः श्रीखंडतिलक इव यः। अंशुदीपैरिति क्वचित्पाठः। तत्रांशवो दीपा इव तैः प्रकाशं कृत्वा दश्रूनागतागतादिविघातकतया चंद्रेण
तासां वर्त्मपात इत्यर्थः। पतनं पातः भावे घञ्। इदानीं विप्रलब्धायाः राधायाः विधुरतां कथयितुमाह। प्रसरतीत्यादि। राधा विधुरां
विकलां सती विरचितविविधां विलापं यथा स्यात्तथा उच्चैर्महांतं परितापं परिदेवनं चकार कृतवती। कस्मिन्सति शशधरबिंबे चंद्रमंडले प्र
सरति उड्डयति सति माधवे कृष्णे विहितविलंबे कृतकालातिपाते सति। स्वभावोक्तिरलंकारः। अत्र सर्गे विप्रलब्धा नाम नायिका
वर्णनीया। तल्लक्षणं च भरते। प्रविलसदनुरागा दूतिकां प्रेष्य पूर्वं स्मरभसमभिधाय क्वापि संकेतगेहे।। न मिलति खलु यस्या वल्लभो दैव
योगात्त्ववदतिभरतस्तां नायिकां विप्रलब्धां।। इदानीं तस्या विलापमेव स्फुटयति कथितेत्यादि। अस्य गीतस्य मालवरागः परिम

ता

सामीप्येवर्त्तमानवद्वेति अ
वतात्वः॥ हे सखि इति स्वचित्तसंबोधने इह वने समये वा कं पुरुषं शरणं रक्षितारं यामि गमिष्यामि वर्त्तमान सामीप्ये वर्त्तमानवद्वेति अ
नेन भविष्यति लट्। तद्वा तत्कालक्रियाया एव वर्त्तमानत्वेन वर्त्तमाननिर्देशः। यद्वा कं जलं शरणं यामि जलप्रवेशो मम श्रेयानिति भा
२२ नेन भविष्यति लट्। तद्वा तत्कालक्रियाया एव वर्त्तमानत्वेन वर्त्तमाननिर्देशः। यद्वा कं जलं शरणं यामि जलप्रवेशो मम श्रेयानिति भा
वः। यद्वा अकं रोगं शरणं यामि रोगवती स्यामित्यर्थः। कीदृशी सखी जनस्य वचनैः कुलसमागमावेदकैः वंचिता प्रवंचिता। अहह हेति
खेदे। स्वचमत्कारा विष्कारे वा। हरिः कुंजः कथितसमये प्युदीरितकालेपि वनांतं वृंदावनसंकेतस्थानं नैति न ययौ वनं नाजगाम अतद
दं मम यौवनमनुरूपमपि योग्यमपि विफलं फलशून्यं निरर्थकमिति यावत्। हरिश्चेन्नायातस्तर्हि नवयौवनेन न हि प्रयोजनमिति
भावः। कं शिरो जलमाख्याति कं सुखे च प्रकीर्त्तितमित्येकाक्षरः। अकं पापे च रोगे चेति विश्वः। हे अकमिति व्याख्याने निपातस्य कालनि
ङिति प्रगृह्यसंज्ञा न भवति। तद्विधेरनित्यत्वात्। शरणं गृहरक्षित्रोरित्यमरः। यस्यानुगमनाय अनुगमनार्थं निशि रात्रौ गहनमपि वन
मपि परिशीलितमनुसृतं। तेन कुलेन हेतुना मम हृदयं मदीयं चित्तं असमबाणेन कामेन कीलितं विद्धं कुंजागमनाभावात्यं च बाणेभ्यो
। स्त्रिणोतीति भावः। अनुगमनाय इति तादर्थ्ये चतुर्थी। शीलसमाधौ धातुरयं अनुभावार्थोपि। तेनेति हेतौ तृतीया। इह वने घ चेतना ज्ञान
श्न्याविकलासती विरहानलं वियोगवह्निं किं विषहामि किं शब्दः किमिस्यर्थपरः। कीदृशी॥ अतिवितथमतिशयेन व्यर्थं अयथार्थं वा केत २२
नं गृहं यस्याः सा तथा। त्यक्त गृहा वनाश्रिता यत इति भावः। यद्वा अतिवितथं व्यर्थं केतनं चिह्नं यस्याः सा तथा। अनवाप्तसुखकेतत
या। चिह्नमपि व्यर्थमिति भावः। तस्मान्मम मरणमेव निधनमेव वरं। मनागिष्टं रान्यार्थं। यतो मरणे सति विरहानलो व्युपशांतो भवेद्वा हार्थश्च्यएव
वा भविष्यतीति भावः। न्याय्येश्रेष्ठे वरः श्रेको मनागिष्टे मतं वरमिति धरणिः॥ वितथं त्वनृतं वचः॥ केतनं लांछने कार्ये गोत्रे चोपनिमंत्रणे
• इति विश्वः॥ विषहामीति परस्मैपदं। आत्मनेपदस्य गणकार्यमानित्यमिति वचनेनानित्यत्वे सति बोद्धव्यं। अतिवितथवेतनेत्य विपावः॥
अत्रातिवितथमतित्यर्थं वेतनं प्रत्याशा यस्याः इत्यर्थः। वेतनं धन्यदेयस्यात्प्रत्याशायां च वेतनमिति विश्वः। अहह रवेदे। मधुराप्रियासरसा वा

५४

अतिवितथममसंकेतनं मा घ चोपनिमंत्रणं अकनाविफलमिति भावः ४०

यस्य कुलस्य मिलनार्थमहं वनेपि स्थितातेन कुलेन मम हृदयं असमा अनन्य साधारण ...
...ितं ...ि इति महत्व...चितौ...

विकलीकरोति॰

मधुयामिनी वसंतरात्रिः मां विधुरयति। का पि कृतसुकृतकामिनी विहितसुकृता कांता हरिमनुभवति। प्रीणातिधातोरनेकार्थत्वात् विधुरं करोती
त्यर्थे तत्करोति तदाचष्ट इति णिच्। विधुरं विफलेऽप्युक्ते विधुरे भूषणे रिते इति विश्वः। मधुरस्वरसे ज्ञेयं स्वादु च प्रिये मनोहर इति धरणिः। कापी
त्यपि शब्देन मत्तोऽन्या काचिदनिर्वचनीय गुणेति भावः सूचितः। यद्वा कापि कुत्सितापि सुकृतफलेन हरिमनुभवतीत्यर्थः। कृतं सुकृतं यया
सा कृतसुकृता सा चकामिनी चेति स्त्रियाः पुंवद्भाषित पुंस्कादित्यसूत्रेण पुंवद्भावः। अहह खेदे। वलयादिमणिभूषणे कटकप्रभृति रत्नयुक्त
मलंकारं हरिविरहदहनवदनेन च कल्ल वियोगाग्निधारणेन हेतुनाबद्ध दूषणमतिशयापराधं कलयामि मन्ये। यतः स्त्रीणां प्रियालोकफ
लो हि वेष इति भावः। स्रगपि पुष्पमालापि मां हृदि हंति। कीदृशी। पुष्पवत्कुसुमवत्सुकुमारा कोमला तनुः शरीरं यस्याः सा तथा। तर्हि कथं हं
तीत्याह। अतनुशरलीलया कामबाणविलासेन कामबाणानां पुष्पमयत्वेन मनोविदारणकत्वेन च स्रजः साम्यं। पुष्पमयबाणेन घाते
नयथादि कमवतीत्यत आह। कीदृश्या अतिविषमशीलाया अतिविषमं मत्यर्थेन दारुणं विपरीतं वा शीलं स्वभावो यस्याः। अन्यबा
णानां हि बहिः क्षतकारित्वं अस्य चेतोविदारकत्वमतो विषमशीतलेति भावः। अनुकूलकामयोरिति धरणिः। इह कुंजे अहं निवसामि
तिष्ठामि। कीदृशी। नगणितानितावनस्य वेतसा वेतस ह ज्ञायते निविडवेतसान्विते पि कुंजेव स्थानादतिकामुकीत्वमभियंजितमिति भावः।
अत्र च नगणिता वनवेतसा य येत्यत्र निषेधवाचकेन नशब्देन समासः। यथानेकधानेककीर्त्तिरित्यादौ गमिकर्मीकृतनैकनीवृद्गेति
नलचरिते च अमानोनाप्रतिषेधवचनादिति नशब्दस्यापि प्रतिषेधवाचकत्वं। यद्वा नभ्राण्नपादित्यादिसूत्रेण कृतिगणत्वादप्यु
पगमनेकारलोपः। यद्वा समासे कृते पश्चान्नञ्संबंधः। यद्वा अगणितवनेतसा इह कुंजे न निवसामि अपितु निवसाम्येव। नकारश्च
शिरश्चालनेवितर्ककालाव च्छन्नवेतससंख्या युज्यत एवेति भावः। एतादृशीमपि मां मधुसूदनश्चेतसा न स्मरत्यपि। अत्र छा
नत्र येप्यपि संबंध आकांक्षावशात्। अर्थगर्थदयेशामिति सूत्रेविभाषासंबंधात् वेतसो वेस इति प्रसिद्धः। हरिचरणशरणैरक्षितायस्य

नेनर सा१

सचजयदेवकविश्चेतितस्यभारतीवाणीगीतरूपेयं हृदि चित्ते वसतु स्फुरतु वार्थात् सज्जनानां। कीदृशी कोमला अकठोरा सरसा वा। कलाव
तीकवित्वशिल्पयुक्ता। उभयोर्विशेषणसमासः। केव। युवतिरिव। यौवनवती कामिनी यथा सापि कोमला कलावती मनोहरा शिल्पा
दियुक्ता हृदि वसतीत्यर्थः। यद्वा। कोमला सुकुमारांगी कलावती चतुःषष्टिकलायुक्ता युवतिरित्यर्थः। कृष्णस्यानागमने विविधं
वितर्कमाह॥ ॥ तत्किमित्यादि। संकेतीकृतः असंकेतं वसंकेतः कृतः संकेतीकृतः। मंजुवंजुललताकुंजः। मनोहरवेतसलताकुंजगृहं। उ
भयोर्विशेषणसमासः। तत्रापि कांतः कामुकः सकृष्णो यद्यस्मान्नागतः तस्मात्किं कामपि कामिनीमभिसृतः तां प्रच्छितस्तत्रैव कृतार्थश्चेति
नायातः। संकेतस्थां मां विदित्वा कथमन्यामभिसरिष्यतीत्याशंक्याह। किं वा कलाकेलिभिः शिल्पपरिहासैर्हेतुभिः यद्युक्तिः वद्धो यंत्रितः
यद्वा। कलाकेलिभिरिति बंधुविशेषणं। बंधुजनक्रीडारसाद्यधिकोमत्समागमइति कथं मां विहायतत्र गमिष्यतीत्याह। अंधकारिणि
तमोयुक्ते वनोपांते वनसमीपे पंथानमप्राप्य किमुद्भ्राम्यति उद्वेग्रांतिमवति। अकेनैवारमिह कुंजेयातायातैर्नतस्यश्रमइत्यतआह। क्लांतम
नाम दर्थे समाकुलचित्तः पथिवर्त्मनि मनागापि स्वल्पमपि प्रस्थातुं गंतुं नक्षमः अशक्त एव। एतेन पथिकत्वमस्य दूरीकृतीमदनसागरम
ग्नः सोपीति धिक्तिं वा वितर्के किं किमूत चेत्यमरः। अभिसृत इति सृगतौ अभिपूर्वः। बंधुर्मित्रे प्रिये चेत्यमरः॥ अंधं चक्षुःशून्ये विषयाग्रा
हकं तथा अंधं करोतीत्यंधकारः कर्मण्यण् अंधकारोस्यास्तीत्यंधकारी। अतइनिवनादिति निः। उपांतः सविधेपि चेति विश्वः। श्लेषो
पोयमलंकारः। सखीमकृतकार्यामालोक्य कृष्णस्याप्यासक्तिमाह। अथेत्यादि। अथानंतरं मिषं राधामाधवमंतरेण कृष्णं विना
आगतां सखीं वीक्ष्य दृष्ट्वा एतद्गीतं वक्ष्यमाणमाह। अंतरांतरेणयुक्त इति द्वितीया। अंतरेणपदं विद्यादिहीनावाक्यार्थयोरपीति विश्वः
कीदृशां सखीं विषादमूकां। कार्यासिद्ध्या विषादेन विवर्णतया वक्तुमक्षमामित्यर्थः। कीदृशी राधा। जनार्दनं कृष्णं कयापि कामिन्यारमि
ते क्रीडितं विशंकमाना वितर्कयंती। संनिधिवर्त्तिनोभिधानं तु दूरस्थस्याशंक्याह। दृष्टवद्यथा दृष्ट्वाभिधीयते तथाह इत्यर्थः। एषात् स्मा द

तउक्तिर्वा यथागत मित्यपिपाठः॥ तथा तेन प्रकारेणागत मित्यर्थः॥ तत्पक्षे बोद्धव्यं तथागत मित्यपि कचित्पाठः॥ तत्पक्षे तथागतं तादृश मभ्य र्थित मितियावत् माधवं विनेत्यर्थः॥ उत्प्रेक्षानामालंकारः॥ दृष्टवदिति॥ यदुक्तं तदेव गीतेन स्फोरयति स्मरसमरेत्यादि गीतस्यास्य वसंत रागः॥ एकताली तालः॥ रागलक्षणं तूक्तमेव गीतार्थस्तु हे सखि का पियुवतिः कापि तरुणी मधुरिपुणा सह कृष्णेन सह विलसति क्रीडति॥ म धुरिपुणेति गम्यमानेपि सहार्थे तृतीया॥ की दृशी सा अधिकगुणा अतिशयित सौंदर्यादिगुणयुक्ता॥ संकेतस्थानमागमनमत्र कृष्णो यामवस्थत इति साम त्तोधिकगुणाभवतीतिभावः॥ कीदृशी स्मरसमरोचितः कृतो योवेषः प्रसाधनं यस्या नानालंकारवतीत्यर्थः॥ पुनः कीदृशी॥ गलितकु सुमेन विगलितपुष्पेण दर विलुलिता ईषद्स्तव्यस्ताः केशायस्याः॥ गलितकुसुमभरविगलितकेशेति क्वचित्पाठः॥ कुसुमानां भरः समूहो यस्मात् विगलितश्च्युतबधः केशपाशो यस्याः सा तथेत्यर्थः॥ संग्रामसमराजय इतिधरणिः॥ मधुनामा दैत्यविशेषः॥ मधुर्दैत्ये मधुश्चैत्रे मद्ये क्षौ द्रेपि मधुर्मत इतिविश्वाभ्रतः॥ तस्यरिपुः॥ कीदृशी॥ हरेः कृष्णस्य परिरंभणे आलिंगने चलितः संभवन्मनोहरोवा विकारः काम भावो यस्याः॥ कुचकल शयोरुपरि स्तनघटयो ... र्मस्त केतरलितश्चंचलो हारो यस्याः सा॥ निरूपपद हारशब्दो मुक्तागुच्छे वर्त्तते॥ यथा गव्य शब्दो गव्यदधिशक्रः अन्यत्र सोपपदः॥ यथा महिषी दध्नीत्यादि॥ पुनः कीदृशी॥ कंपमाने रत्नकैश्चूर्णकुंतलैर्ललित आननचंद्रोमुखे ... दुर्यस्याः॥ क्वचित्तु॥ विगलदलककलितानन चंद्र इति पाठः॥ विशेषतो गलन्ती या सा वलकश्चूर्णकुंतलैर्लते न गलितः शोभमान आननचंद्रो यस्या इत्यर्थः॥ तस्य कृष्णस्याधरपानरसेन कृता तंत्री रतिसुखजनिता या ... क्षिता रशना कांचीपत्रजघने॥ तस्योपयोगमनेन लोलाचंचला या रशना कांचिजिह्वयोरिति धरणिः॥ दयितस्य कृष्णस्य विलोकितेन वीक्षणेन लज्जिता चासा हसिता चेतिकर्मधारयः॥ तेन पुंवत्कर्मधारयेत्यादिना पुंवद्भावः॥ बहुविधमनेक रूपं कूजितमव्यक्तशब्दो यत्र ताहृशो रतिरसे रसितं शाब्दितं हर्षितं वा यया॥ अधःस्थितेन कृष्णेन सुरते मम सकलं शरीरं दृष्टं निरूपितं॥ स्त्रीस्वभावाल्लज्जितया मदन्यया कयापि दविदग्धया विपरीतरते न सम्भगवानुरूकिं वंचितव्यमिति हसितेतिभावः॥ विलोकितमितिभावे क्तः॥ रसितं शब्दिते हृष्ट इति अमरः॥ पुनः कीदृशी॥
पुनः कीदृशी॥ चंचलेत्यादि॥ चंचला या ... कुंडला भ्यां ... अलितौ कपोलौ यस्याः सा ४

गीत कुसेन। १२

२५

विपुला बहवः पुलकारोमांचा यस्याः सा तथा। पृथुर्महानुवे पथुः कंपो यस्याः भंगतरंगितेति यस्याः पश्चाद् द्वनयोः कर्मधारयः॥ वेपथुरिति टुवेपृ कंपने

ट्वितोथुजिति अथुच् प्रत्ययः। विकसदिति कसदी सौ शतृ प्रत्ययः॥ कीदृशा॥ श्रमजलकणभरेण प्रयासघर्मकणातिशयेन सुभगं मनोहरं

शरीरं यस्याः। उरसि वक्षःस्थले अर्थात् कृष्णस्य परिपतिता सर्वतोभावेन स्थितेत्यर्थः। रतिः सुरतो रण इव तत्र धीराः पंडिता सकलकामकुशला इत्य

र्थः। क्वचित्तु रणधीरेति पाठः। तत्र रतिरणे धीरा युद्धविशारदा। लवक्लेशकणा एव इत्यमरः। सुभगः सुंदरेपि चेति विश्वः। श्रीजयदेवस्य भणितमिदम

तिललितं अतिशयेन मनोहरं कलिकलुषं कलियुगस्य दुरितं शमयतु शांतं करोतु। कीदृशं। हरेः कृष्णस्य रमितं रमणीयं यत्र तत्तथा। क्वचित्तु श्रीज

यदेव भणितरमणीयं जगदसुखं शमयतु कमनीयमिति पाठः। तत्र पक्षे श्रीजयदेव भणितं च तत् रमणीयं च तत् कर्तृ जगति भुवने असुखमकल्या

णं शमयतु। अत एव कमनीयं काम्यं तदित्यर्थः। क्वचिच्च जगदसुखं जनयतु शमनीयमिति पाठः। तत्र पक्षे जगतामसुखं शमनीयमसाधारणीयं अतत

जनयत्वित्यर्थः। क्वचित्तु श्रीजयदेवभणितहरिरमितं सुखयतु केशवपदमनुगमिति पाठः। तत्र पक्षे श्रीजयदेवभणितं च तद्धरिरमितं चेति तत्कर्तृ सु

खयतु। केशवमित्यर्थात् सज्जनादिकमिति वा। कीदृशं सत्। केशवपदं अनुकूलचरणं लक्षणया कृत्यगामितं प्रापितमित्यर्थः। तत्र पाठ पयोधीस

हृदये नावधेयौ। कलहे थयुगेके कलिरिति धरणिः। कलुषं वृजिनैनो घमंहो दुरितदुष्कृतमित्यमरः। अनेन गीतेन विपरीतसुरतमुक्तं। अथ चंद्रकिर

णमसहमाना राधाह विरहेत्यादि। अयं विधुश्चंद्रः अयि सखि हृदये अर्थान्मम मदनव्यथां कामपीडामतीवात्यर्थं ननु नोति विस्तारयति।

अयि शब्दः प्रश्ने कोमलामंत्रणे। अयि कोपे विषादे च संभुद्धे स्मरणेपि चेति विश्वः। कीदृशः विरहेण पांडो धूसरस्य मुरारिमुखांबुजस्य द्युतिः शोभा य २५

स्या यदा विरही कृष्ण आसीत् तदा तन्मुखमपि स्मृतं सदृद्धे जनं कं जातमितिभावः। पश्चान्मुरारिमुखसाम्याद्धे द्वनां दुःखदं तिरयन्नपि दधानोपि।

वेदना ज्ञनयोरपीति विश्वः। पीडाकरत्वे हेतुगर्भं विशेषणमाह। मनोभुवः कामस्य सुहृन्मित्रं यतः। रूप कमलेकारः। यमकोपि। उक्तं दंडिना। ए

कद्वित्रिचतुष्पादैर्यमकानां विकल्पना। आदिमध्यान्तसाम्याद्यंत इति सर्वत इति यमकलक्षणं इदानीं राधा कस्या स्थिन्नायिका

यारतांतरेप्रधानमाह। समुदितेत्यादि। अस्यगीतस्यगूर्जरीरागः। एककालीतालः। रागलक्षणंतूक्तमेव। गीतार्थस्तु। अधुनेदानींकालेवि
जयीजयनशीलोमुरारिः कृष्णोयमुनायाः पुलिनाधारकेवनेरमतेक्रीडति। कथंरमतइत्यतआह। रमणीवदनेकांतामुखेमृगमदतिलकंक
स्तूरीचित्रकंसपुलकंरोमांचसहितंयथास्यात्तथाविलिखति। कीदृशेवदने। मुदितोत्यंतमुपचितोमदनःकामोयत्रसकाममइत्यर्थः। पुनःकी
दृशे। चुंबनायवलितोदीप्तःसंभ्रमकोवा अधरोयत्र। तिलकंदत्वावदनंमतिसाधितिकृत्वाकृष्णेनचुंबितमित्याशयः। कस्मिन्केव। यथारजनीक
रे चंद्रेमृगंतथालिखतीत्यर्थः। तदत्रमुखस्यचंद्रसादृश्यं। मृगमदतिलकस्यकृष्णवर्णत्वान्मृगसादृश्यमितिभवत्युपमालंकारः। कस्तूरीति
लकमथोचंदनतिलकंच [illegible] नायकैःक्रियतइतिकामशास्त्रसमाचारः। यद्वा। चंदनसहितेललाटेश्वेतरूपेश्यामरूपंकस्तूरीतिलकं
इतिकामरसज्ञनकमतिमृदुतरमतिसुरक्तिचेतिक्रियतेश्वेतभागेकृष्णेनैवपरभागलब्धेःललाटेचंदनानुलेपनंक्रियतइतिदृष्टमेवलला
टिकाचंदनधूसरालकेति। यद्वा। नायिकागौरांगीतस्याललाटेगौरेश्यामंकस्तूरीतिलकमितिसुंदरताधायकं। नायकेतुकृष्णरूपेचंदनति
लकमतिसौंदर्यजनकमित्थंयथायोग्यंक्रियतइत्याशयः। कश्चित्तुविलिखतितिलकमितिपाठः। प्रविलसदलकमितिपाठः। तत्पक्षेतिलकंकस्तूरी
तिलकंउक्तं। युक्तेरिहवक्षःस्थलेलिखति। कीदृशंतिलकं। प्रविलसंतोदीप्यमानाःसंबद्धाअलकाश्चूर्णकुंतलायस्मिंस्तत्तथा। तिलकंचिक
त्रकेदृक्लेमखेपिचमनोहरइतिधरणिः। अलकाश्चूर्णकुंतलाइत्यमरः। रमतइत्यनुपसर्गाद्वेत्यात्मनेपदं। तोयोत्थितंतत्पुलिनमित्यमरः। वि
जयोस्यास्तीतिविजयी अत्रतद्गुणिगनाविनीनिः। यद्वा। जेतुंशीलंयस्येत्यर्थेताच्छीलिकोणिनिःगुणोनतुवृद्धिः। तदनेनविशेषणेननिर्भरानंद
युक्तःसंभगवान्नूमांस्मरत्यपिनेतिध्वनितं। चिकुरेषुकेशेषुकुरुबककुसुमंलोहितम्लानपुष्पंमेंदीपुष्पंवायथास्थानमर्पयति। चिकु
रइत्येकवचनंसज्जितकेशापेक्षयाद्रष्टव्यं। कीदृशेचिकुरे। घनचयरुचिरेमेघसंघवन्मनोहरे। यद्वा। घनोनिरंतरोयश्चयःसमूहस्तेन
रुचिरेसुंदरे। पुनःकीदृशे। तरलितानिचंचलीकृतानितरुणीनांयूनां आननानिमुखानियेन। अतिसुंदरतयावीक्षणार्थंप्रशंसार्थंवेत्यर्थः

यद्वा तरलितश्चंचलीकृतः तरुणो येन ईदृशमाननं यस्यास्ता दृशि हे सखीति सखीसंबोधनमेवेदं पदं। पुनः कीदृशो। रतिपतिः कामो मृग इव तस्य कान
25 नेवनेयथा मृगवासो वनं तथा कामस्य वासस्थानं चिकुरः। कुरवकोरवकारणतां यद्युशितिमाघेयमकितत्वेन कुरवकेशश्चो न कुरुवकश्च इत्य
भिधेयी। कीदृशं तत्। चपलायाइव विद्युत इव सुषमा शोभा यस्य तत्तथा। पुष्पाणां लक्ष्यालक्ष्यत्वाल्लोहितत्वाच्च विद्युत्साम्यं। अन्यस्मिन्न
पि मेघसंघे चपलासुषमा शोभा भवति। कीदृशे मेघे। तरलितश्चंचलीकृतस्तरुणो येनेदृशमाननमुपक्रमो यस्य तरुणानां हि मेघसमयेत्यें
तं कामाविर्भावः। उन्मनस्को भवति इति तस्य निरीक्षणार्थं तिपिचं चला भवंति। यद्वा तरलितं चंचलीकृतं तरुणानां यूनामाननं मुखं येः। मेघदर्शने हि
तरुणास्तरुणीमुखचुंबनार्थं तरला एव भवंति। मेघनिरीक्षणार्थं चपला इति भावः। पुनः कीदृशे मेघे। रतौ प्रीतौ पतिः स्वामी चासौ मृगश्चाति सु
खितमृगस्तस्य केसुखे आननमुपक्रमो यस्य। मेघोदये हि हरिणानामति सुखं भवति। स गंधपृथिव्यादि गंधाधानं च। नहुकेमेघहूते। गंधमा
धाय चोर्व्याः सारंगास्तेजलकल्लवमुचः सूचयिष्यंति मार्गमिति ध्वनिः। रूपकोयमलंकारः। यद्वा। चपलाया विद्युतः सुषममत्यंतसदृशमित्यर्थः
सा दृश्यनिमित्तं तु लौहित्यं सुक्लमेव। कुचद्वयं स्तनयुगं गगनं आकाशमिव पीनोन्नतत्वात्। तत्रामलं विशुद्धं मणिसरं मुक्ताहारं घटयति
योजयति। कीदृशे। सुघने अतिनिरंतरे। पुनः कीदृशे मृगमदरुचिः कस्तूरीदीप्तिस्तया भूषिते अतितेजस्वीकृते इत्यर्थः। पुनः कीदृशे नखपदे नख
क्षते शशीव चंद्र इव लोहितत्वाद्वक्रत्वाच्च तेन भूषिते अलंकृते कमिव घटयति तारकपटलमिव नक्षत्रसमूहमिव। यथा गगने नक्षत्रसमूहो २५
भवति तथेत्यर्थः। कीदृशे गगने। सुघने शोभनमेघवति। मृगमदवद्यारुचिर्दीप्तिस्तया भूषिते शोभमाने गगनस्य स्वभाव नीलतया कस्तूरी
समदीप्तिमत्त्वं। पुनः कीदृशे। नखस्येव व्यवसायो यस्य ता दृशेन शशिना चंद्रेण भूषिते अलंकृते इत्यर्थः। तारकपटलं तु स्वभावादेवामलं श्वेतं
केचित्तु प्रथमपक्षे कुचयुगगने कुचयुगयोर्गगनमाकाशं वरमित्यर्थः। गगनस्योपस्थितत्वे न गगनव्यपदेशमिति वदंति। तन्न। गगनशब्दस्योप
रिवाचकत्वे मानाभावात् लक्षणाबीजस्य संततसंबंधे रभावाच्च। मृगनाभिर्मृगमदो गंधशेखरमित्यपीति हलायुधः। अभिषंगेऽस्पृहायां च गभ

न१ ग हारावरी =

स्तो चरुश्चिर्मतः इति विश्वः॥ तारके कर्णधारे च नक्षत्रे दृशि तारकमिति विश्वः। पदं स्थाने च वाक्ये च व्यवसायापदेशयोरिति विश्वः॥ रूपकोयमलं
कारः॥ मृदुभुजयुगले अति कोमलबाहुद्वये। मरकतवलयं मरकतयुक्तकंकणं वितरति ददाति॥ वितूर्वस्तरतिर्दानार्थः। तदुक्तममरे। विस्तारणं
वितरणं दानं च प्रतिपादनमिति। कीदृशे। जितबिसशकले। सदृशीकृतमृणालखंडे। पुनः कीदृशे। करतलं हस्तस्वरूपं तं नलिनीदलमिव पद्मप
त्रमिव यत्र। पुनः कीदृशे। हिमवच्छीतले। कामानलतप्तानां तापशांतिकारित्वात्। कीदृशं वलयं॥ मधुकरनिचये भ्रमरसमूहमिव। अन्यस्मि
न्नपि बिसखंडे पद्मिनीपत्रयुक्ते न हिमेन शीतले भ्रमरचयो विक्षिपतीति ध्वनिः। नलिनी पद्मिनी पद्म व्योमासिंधुसरोवरेति विश्वः॥ मरकतो मणि
विशेषः। कंकणे वलयो मत इति धरणिः। मधुकरभ्रमरालय इत्यमरः। रूपकमिदं। रतेः शृंगारस्य गृहमिव यत्र जघनं तत्र मणिमयरसने मुक्तादिषु क्रमेरस
लं विकिरति विक्षिपति नितंबे सुदूरं टिकां ददातीत्यर्थः॥ कीदृशे जघने। विपुलो महाभोगाय घनः शरीरं यत्र॥ अतिस्थूल इत्यर्थः॥ यद्वा विपु
लं महत्वयुक्तं अपगतो घनः काठिन्यं यत्र। तदपघनं। कोमलमुभयोर्विशेषणसमासः। तेन महापरिमाणे सुकुमारे इत्यर्थः। अपघनोंगमिति
निपातनी। पुनः कीदृशे। मनसिजस्य कामस्य कनकासने सुवर्णपीठ इव सुखकारित्वात् वर्णसाम्यात् प्रमोदाधारत्वाच्च साम्यं। पुनः कीदृशे। कृ
तं दत्तं वासनं दसनं यत्र। वसनमेव वासनमिति प्रज्ञाद्यण् स्वार्थे। यद्वा कृता वासना आकांक्षा अर्थात् कृष्णेन यत्र। वस्त्रशून्यतया अतिसुंदरतया
च कृष्णस्य तत्र कांक्षेत्याशयः। यद्वा कृतं वासनं धूपनं यत्र सुरतार्थं विहितधूपन इत्यर्थः। वासनं धूपने ज्ञाने इच्छायामपि वासना इति ध
रणिः॥ यद्वा कृतं वासनं ज्ञानमर्थात् कृष्णेन यत्र। अलंकृतः कृष्णेन निरीक्षित इत्यर्थः। अयं च प्रसाधनानां च स्वभावः। यत्प्रसाधनं कृत्वानि
रीक्ष्यत इति। क्वचित्तु हृतवासने इति पाठः॥ तत्पक्षे हृतं दूरीकृतं वासनं वस्त्रं यत्र। मेखलादानार्थं विवस्त्रेत्यर्थः। यद्वा। हृता अपनीता वासना इच्छा
र्थात् परपुरुषेण यत्र भगवत्कामिनीपुमात्वेन न केनापि पीडेति भावः॥ कीदृशं रसनं तोरणस्य निंदकं तोरणं हसतीति नंद्यादित्वात् कर्तरि
ल्युः॥ अन्यस्मिन्नपि राजगृहे विपुलशरीरे सुवर्णपीठवति परविहिताभिलाषे तोरणं विक्षिप्यत इति ध्वनिः॥ क्वचित्तु मणिरसनमिति पाठः॥ तत्पक्षे

पादपद्मवेर ति ति गृहेषु

26 मणिर्मुक्तादिमरो... तिकाताभ्यां ग्रथितं रसनं मेखला इत्यर्थः। कचित्तु मणिसारसनमिति पाठः। तत्र मणियुक्तं सारसनं मेखला इत्यर्थः॥ क्लीबे सारसनं
चापीत्यमरः। रूपकोऽयं। चरणकिसलये यावकभरणमलक्तकपूरणं उपत्युपपादयतु। कीदृशे। कमलायाः लक्ष्म्याः निलये गृहे अतिकांतिमतीत्यर्थः
पुनः कीदृशे। नखा मणय इव तेषां गणेन समूहेन पूजिते अर्चिते॥ प्रशस्ते वा। पुनः कीदृशे। हृदि हृदये अर्थात् कृष्णेन योजिते अर्पिते कृष्णेन
निजहृदये कृत इत्यर्थः। अनेन कुक्कुटबंधः सूचितः। यद्वा हृदि कीदृशे कमलायाः लक्ष्म्याः निलये कृष्णस्य लक्ष्मी... हृदये वसत्येव। कीदृशे
मावकभरणे बहिर्बाह्ये अपवरणं आच्छादकं। चरणस्य स्वभावलोहितत्वे न तदलक्तकं चरणवश्य वर्णि लौहित्याच्छादकमेवेति भावः। अन्यद
पि लक्ष्मीगृहे बाह्ये स्थिता पवरणं भवतीति ध्वनिः। तत्पदे श्रोरिति प्रसिद्धं। तच्च बाह्यदेश एव क्रियते। कोमलत्व लौहित्याभ्यां चरणपल्लवयोः
साम्यं। कचित्तु बहिरुपचरणमिति पाठः। तत्र बहिर्बाह्ये उपचरणं अनुष्ठानं यस्येत्यर्थः। रूपकमिदं। हलधरस्य बलभद्रस्य सोदरः समानोदरजः
स चासौ खलो दुर्जनश्चेति तस्मिन् कमपि सुदृशां शोभननयनां सदृशां रूपगुणादितुल्यां यथास्यात्तथा रमयति सति इह विटपोदरे कुंजे चिरं ब
हुकालं अफलं निःफलं विरसं रसशून्यं च यथास्यात्तथा किमिव संस्थितास्मि। हे सखि ब्रूहि॥ यावत् हलधरस्य ज्ञाह्वच्छलेन वाहीकस्य सोदरः
कृष्णः अतं खल इति भावः। यद्वा। कृष्णे कीदृशे। विटपोदरे विटं पातीति विटपो धूर्तरक्षकः। तादृशमुदरमभ्यंतरं यस्य कृष्णस्याज्ञायोर्ध्वस
मागरतं कथमाम्रेता दृशीरमयिष्यतीत्याशयः॥ कचित्तु खलु हलधरसोदर इति पाठः। तत्र खलु निश्चितं। इतरत्र तु तुल्यमेव॥ अवसमितिव २६
स निवासे। अनघत नेत्कडुः मिथु अड्डागमः। इह कविर्नृपजयदेवके कलियुगचरितं कलियुगेनाचरितं कृतमितियावत्। दुरितं पापं नवस
तु। न तिष्ठतु। कविर्नृपश्चासौ जयदेवश्चेति समासे स्वार्थिक एव कन् प्रत्ययः। कीदृशे रसभणने शृंगारोदीरणे। कर्तरि ल्युट् प्रत्ययः॥ कृतं हरेर्गु
णानं चिंतनं यत्र। पुनः कीदृशे। मधुरिपोः कृष्णस्य पदसेवके चरणानते। यद्वा। कीदृशे। इह रसः कलियुगे रसस्तस्य भणनं यत्र तादृशे। कलियु

गस्य चरितं वर्षितं यत्र प्रहर्षि तमिति अर्थो वा। जयदेवकृतप्रशंसायां वा कर्त्ता प्रत्ययः ॥ इदानीं हरेरनागमनाद्विषण्णां सखीं समाश्वासयंती

राधा निजामुत्कंठां स्फोरयति ॥ नायात इत्यादि। हे सखि इति यदि शठो धूर्त्तो निर्दयो निःकरुणः कृष्णो नायातो नागतस्तस्मात्त्वं किं दूयसे किमुप

तप्तासि। आगमनाभावे हेतुमाह। बहवो वल्लभाः प्रेयस्यो यस्य बहूनां वल्लभः सततं तत्स्थाने स्वच्छंदमनिवारितं यथा स्यात्तथा क्रीडतीति ते किं दूषणं।

अपि तु न किमपीत्यर्थः। अद्य मम चेदिदं मासंनेकर्त्त प्रियसंगमाय कृष्णसंभोगार्थं स्वयमेव यातीति पश्य। जानीहि। दृशोर्ज्ञानार्थत्वात् पश्येति कि

याभ्यां वा कर्मार्थ एव कर्म। कीदृशं चेति। दयितस्य वल्लभस्य गुणैः रूपादिभिः कृष्यमाणं कीदृशं मत् । उत्कंठार्त्तिभरादिव उत्कंठया उत्सुकतया आर्त्तिः

पीडा तयोर्भरोतिशयः तस्मादिव स्फुटत् व्यक्तीभवत् निर्गच्छत् इव यावत्। किंचित्वोत्कंठार्त्तिभरादिवेति पाठस्तत्र उत्कलिकाशयास्वरूपेत्यर्थः। उत्कं

त्प्रेक्षालंकारः। अन्योपि गुणैरज्जुभिः आकृष्टः प्रयातीति ध्वनिः॥ इदानीमात्मनो दुःसहं दुःखमस्याश्च कृष्णरमितायाः सुखं राधा कथयति॥

अनिलतरलेत्यादि ॥ गीतस्यास्य देशीयरागो रूपकतालः ॥ रागलक्षणं तु पूर्वोक्तमेव। गीतार्थस्तु। हे सखि या गोपी वनमालिना कृष्णे

न सह रमिता क्रीडिता। सा किसलयशयनेन पल्लवशय्यया न पततीति नो प० तप्ता भवती वियोगे संभोगे तु या कृष्णेन रमिता क्रीडिता किशल

यशयनेन पतति। अत्र क्रीडनादपि तु पतत्येव। चंचलरमणत्वात्। कोमले किसलयशयने क्रीडति वारंवारं कृष्णेनेति न तापयुक्तेति भावः।

कीदृशेनानिलेन वातेन तरलं चंचलं यत्कुवलयं नीलपद्मं तद्वन्नयनं नेत्रं यस्य सर्वगोपीनामवलोकनार्थं चपलनयनेनेत्याशयः। विकसि-

त सरसिजललितमुखेन प्रफुल्लपद्ममनोहरवदनेन वनमालिना या रमिता सा मनसिजविशिखेन कामबाणेन स्फुटति अपि तु स्फुटत्येव। वनमालिना या रमिता सा २

कमलस्यानंगबाणत्वेन कामस्य लक्ष्मीभवतीति भावः॥ अमृतमधुरमृदुतरवचनेन पीयूषमनोहरातिकोमलवाक्येन मलयजपवनेन

न ज्वलति न दीप्यते। इति संभोगपक्षे। वियोगे तु न ज्वलति अपि तु ज्वलत्येव। लघुपवनतया पतमा भवत्येवेति भावः। स्थलजलरु[illegible] हारिणा स्थलप

द्मानि तेषां रुचिर्दीप्तिरिव दारिता येषां तादृशाः करचरणा यस्य तेन वनमालिना या रमिता सा हिमकरकिरणेन न दहति चंद्रांशुना नोपतप्ता भवति।

अतिसंभोगपक्षे वियोगे तु न स्फुटति मनसिजी भवति अपि तु भवत्येव ४

27

कश्चित्तु लुवतीति भावः। तत्रायमेवार्थः। इति संभोगपक्षः। वियोगे तु न दहति चंद्रपद्मयोर्विरोधादिति भावः। स्थलसमसिंहारेण उत्करहश स्थापि
स्तदिमात्रं पुरस्कृत्य पक्षे वर्त्तत इत्यवधेयं। जलपद्मापेक्षया स्थलपद्मस्यातिलोहितत्वेनोपादानसिद्धिः। सजलजलदसमुदयरुचिरेण तोय
सहितमेघोदयवत् सुंदरेण वनमालिना या रमिता सा चिरविरहेणानेककालीनवियोगेन हृदि न दलति न दीर्यते। इति संभोगपक्षे। वियोगे तु
न दलतीत्यपि तु दलत्येव। जलदस्य भावोद्दीपकत्वादिति भावः। कनकनिकषरुचि[illegible] शुचिवसनेन सुवर्णघर्षकांतिविमलवाससा पीतांबरेणेत्य
र्थः। तेन रमिता या सा परिसर्वतोभावेन हसनेन लोकहास्येन न श्वसिति न श्वासं करोति। परिजनः सखीजनो वा इति संभोगपक्षे। वियोगे तु न श्व
सितीत्यपि तु श्वसित्येव। सपत्नीजनोपहासेदि कांतस्य शुचितया न सुभगा या सौभाग्यस्तुतिरिति भावः। निकषः कषपट्टिकेति हारावली। निक
षो घर्षणं वा। सकलभुवनेषु ये जना युवानस्तेभ्योपि परेणाश्रेष्ठेन तरुणेन युवा हरिणा या रमिता सा करुणारसेन रुजां पीडां वेदनां धारयति अ
पि तु दुःखानां भाजनं न म[illegible]हमेवेत्यर्थः। सकलयुवतिरुचिकरतरुणेनेति पाठस्तत्र समस्ततरुणीप्रीतिकारकपुरुषेणेत्यर्थः। इति संभोगपक्षे। वियोगे तु
न वहत्यपि तु वहत्येव। कलहायक रमणादिति भावः। अनेन गीतेन श्रीजयदेवभणितं चंद्रमणं मनोविनोदकरं चेति कर्मधारयः। तेन हेतुभूतेन
हृदये विशतु हरिः कृष्णः प्रविशतु सर्वेषां जनानां पुण्यदातृत्वात्। कीदृशं हृदयं। सद्गुणमंहरिचरणस्मरणात्। विन ष्टपापमिति भावः॥ ॥अथ रा
धा मलयानिलेनापि पीड्यमाना सती प्राणनिरपेक्षापि कृष्णसंदर्शनाय स्वयमेवाभ्यसूयति। हे मलयानिल मलयवात मनोभवानंदन कामप्रबोधजनक २७
प्रसीद प्रसन्नो भव। रे इत्याह्वेपसंबोधनं दुःखकारित्वात्। हे दाक्षिण्य तवामतां मुंच प्रातिकूल्याचरणं मा कुरु। दक्षिणस्या दिश आगतत्वात्वं दक्षि
णाचंदनानिल इत्यर्थः। यद्यपि मलयजत्वेनैव दाक्षिण्यत्वे लब्धे पुनर्दक्षिणग्रहणं विफलं पौनरुक्त्यादिति। तथापि वामतां मुंचेत्यस्यानुरोधे
न विरोधाभाससूचनार्थं च दक्षिणपदोपादानं। यो दक्षिणः स कथं वाम इति वामदक्षिणयोर्विरोधात्। वामं शंरस वास्या[illegible]दपस
यं तु दक्षिणमित्यमरः। यद्वा। त्वं दक्षिणो विनीतो वामतां प्रतिकूलतां मुंच। दक्षिणश्चाथ सरले हे अपसव्यविनीतयोरिति विश्वः। वामो वर्णेप्र

टी२

नीचे च सव्ये कुत्सितहीनयोरिति धरणिः। एतदप्यनुचितं तदेवं कुरुष्वेत्याह। हे जगत्प्राण क्षणमल्पकालं माधवं पुरो निधाय रूक्षमये कृत्वा पश्चान्म
म प्राणहरो भविष्यसि। जगत्प्राणस्य तव प्राणहरत्वं अनुचितमिति भावः। आनंदयतीत्यानंदनमिति नंद्यादित्वाल्ल्युः आक्षेपोयमलंकारः
अधुना राधा स्वापराधेपि दयिते सानुरागं निंदति। रिपुरिवेत्यादि यस्मिन्कांते मनोगते चित्तप्रविष्टे नतु दृष्टिमधिरूढे सति अयं सखी
जनः सहसम्यक्प्रकारेण वासो वासस्थानं रिपुरिव शत्रुरिव दुनोति उपतापयति मामित्यर्थात्। हिमानिलः शीतवातोपि शिखीव वह्निरिव दु
नोति। सुधारश्मिश्चंद्रोपि विषमिव दुनोति। यद्वा। यस्मिन्प्रिये गते दूरस्थे सति अयमयं मम मनो दुनोतीत्यर्थः। कस्मिन्कांते। अदये निः
करुणे। एवमनेन प्रकारेण पुनर्भूयोपि मम हृदयं बलात्सामर्थ्यात् तु वल्लते संभजते गच्छतीति यावत्। अतएवार्थांतरन्यासमाह। कुवलय
दृशां कमलनयनानां वामो दक्षिणः कामो निकामं निरंकुशोऽतिशये नाविचार्य एवं भवति यत इत्यर्थः। निसर्गतोंकुश इव रोधको यस्य स तथा॥
तदुक्तं रसिकसर्वस्वे। निषिद्धे वर्तते प्रायः कामो वामस्वभावत इति। शिखाज्वाला अस्यास्तीति शिखी वह्निः॥ अथ राधा दुःसहविरहवशाज्जी
वितनिरपेक्षं प्राह। बाधामित्यादि॥ हे मलयानिल मलयवायो बाधां पीडां मम विधेहि कुसुमपंचबाण प्राणान् जीवितानि गृहाण। पुनरहं गृ
हं नाश्रयिष्ये। न यास्यामि। कुलस्यालाभेन मरणस्यावश्यं संभवात्। हे कृतांतभगिनि यमुने ते क्षमया शांत्या किं। अपि तु न प्रयोजनमित्यर्थः
यमभगिन्यास्तव शांतिर्नोचितेति भावः। तस्मात्तरंगैः कल्लोलैः अंगानि सिंच। मम देहदाहः शरीरोप[illegible]ं तापः शाम्यतु। मरणमेव भवत्विति
भावः। मरणे सति देहस्यापि शांतेः। अन्यत्रापि देहदाहे तरंगसेचनेन शांतिर्भवत्येवेति ध्वनिः। जननीभगिनीस्वसेत्यमरः॥ श्लेषोयमलं
कारः अधुना समाप्तिकविर्मंगलमाह। सांद्रेत्यादि। श्रीगोविंदपदमरविंदमिव श्रीकृष्णचरणं वंदामहे नमामः। किमर्थं। अशुभस्कंदाय अमं
गलनाशार्थं। तादर्थ्ये चतुर्थी। सांद्रानंदा निविडहर्षाः पुरंदरादिदिविषदः इंद्रादिदेवतास्तेषां वृंदैः समूहैरमंदादरादतिशयितबहुमानादान
म्रैः समंतात् नतियुक्तैः कर्तृभूतैः मुकुटानामिंद्रनीलमणिभिर्नीलवर्णैः करणभूतैः संदर्शितइंदिंदिरो भ्रमरो यत्र। इंदिंदिरस्तु मधुलिट् चंचरीकोपि मधु

मलिमि: १

२४ ध्रुवत इत्यमरशेषः॥ पुनः कीदृशं स्वच्छंदं यथास्यात्तथा मकरंदवत्सुंदरं पुष्परसवन्मनोहरं॥ यथास्यात्तथा गलत्यामंदाकिन्या वियद्गंगया मेदुरं सांद्र
स्निग्धमित्यर्थः। दिविसीदंतीति दिविषद इति सत्सूद्विषेत्यादिना क्विप्। श्रीशाहृतत्कर्मार्थः। नागरश्चतुरो नारायणोयत्र सतथा॥ ॥इतिश्रीजगद्धरवि
सप्तमस्सर्गः॥ ॥अधुनाराधाप्रातरागतं प्रियं निरीक्ष्यासूयया मल्लमाह॥ ॥अथेत्यादि॥ अथानंतरं कथमपि केनापि प्रकारेण सा राधा यामिनी
रात्रिं विनीय नीत्वा प्रणतमपि प्रियं साभ्यसूयं यथास्यात्तथा आह उक्तवती। कीदृशं। प्रातः प्रभातसमये अग्रे अर्थात् राधायाः अनुनयवचनमनुनया
यप्रबोधाय वाक्यं वदंतं। कीदृशी स्मरशरैः कामबाणैर्जर्जरिता नितांतविद्धापि केचिदग्रे प्रणतमपीति योजयंति। गुणेपि दोषारोपोऽभ्यसूया तयासह वर्त्त
त इति साभ्यसूयं क्रियाविशेषणत्वेन नपुंसकत्वं। यामः प्रहरः सोस्यास्तीति यामिनी। अस्मिन्सर्गे खंडिता नाम नायिका वर्णनीया। तल्लक्षणं ना
यिकालक्षणे। निद्राकषायकलुषीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रितांगः। यस्याः कुतोपि गृहमेति पतिः प्रभाते सा खंडितेति कथिता कवि
भिः पुराणैः॥ इति। अधुना गीतेनाभ्यसूयावचनमेव स्फोरयति रजनीत्यादि गीतस्यास्य भैरवीरागः रूपकतालः॥ रागलक्षणं तु सरोवरस्थे स्फ
टिकस्य मंडपे सरोरुहैः शंकरमर्चयंती। तालप्रयोगप्रतिबद्धगीता गौरी ननु भैरवीयं॥ गीतार्थस्तु। हरिहरीति खेदे हे माधव याहि इतो गच्छ
केशव याहि कोपसंभ्रमेण पुनरुक्तिः। यद्वा मा लक्ष्मीः तस्याः धवः कांतः अनेन कमलापतित्वेन चांचल्यं ध्वनितं। केपानीये शेते इति केशवो जलम
ध्यस्थायी तथा च जलमध्यवासेन नागरत्वं ध्वनितं। यद्वा मधोर्यादवस्यापत्यं माधवः। एतेन गोपतया रसानभिज्ञत्वं सूचितं। केशवमृतक हे त्वं ने २८— इस
न सुखानभिज्ञता दर्शिता। कैतववादं कपटवचनं मा वद मा ब्रूहि। हे सरसीरुहलोचन कमलनेत्र तामनुसर। अनुगच्छ या गोपी मदन्या तव विषादं सं
तापं हरति अपनयति। अत्र सरसीरुहलोचनत्वेन रूपादिविशेषाज्ञानता। मोसहामोल्लाहनं सोल्लुंठमाह॥ हे कृष्ण तव नयनं कर्तृ स्फुटं व्यक्तं तस्या अ
नुरागमिव वहति दधाति। कीदृशं नयनं। रजनिजनितेन रात्रिजातेन गुरुणा अतिशयितेन जागररागेण विनिद्रतोद्भूतरंजनेन कषायितं लोहितीकृ
तं। पुनः कीदृशं। अलसो मंथरो अक्षिपक्ष्मस्खलनं यत्र। अनुरागं कीदृशं। व्यक्तोऽभिसाराभिनिवेशः शृंगाराभिप्रायो यत्र। अनुरागस्य लोहितत्वाद्रक्तौ लोचने
उत्प्रेक्षा। जागरणमेव जागरो भावे घञ्। रागोऽनुरक्तौ मात्सर्ये इति विश्वः। कषायो रसभेदे स्यादंगरागे विलेपने। निर्यासे च कषायोऽथ सुरते लोहि

विस्तारयति २ यद्वा रचितै कृतै २

न्यवादीति। च॥ कषायश ह्लादितच् प्रत्ययः। हरिहरिश ह्रोप्यः खेदवाची। वदनेवादः भावेघञ्। कृतस्तवदशनवसनमधरः कर्त्ता अरुणं तां मूलरागलो
हितं तनोः शरीरस्यानुरूपंसदृशं तनोति। कज्जलेनांजनेनमलिनस्या पितस्य विलोचनस्य च लुषः [illegible] चुंबनेन [illegible] विरचितो
नीलिमा नीलत्वं येना रूपशद्धस्य अनुरूपशद्धेन संबंधनीयः। नीलिमरूपं श्यामता स्वरूपं येन नयनचुंबनस्य कामशास्त्रे प्रतिपादितत्वात
तदुक्तमिहा अरुणामिति तस्य पूर्वदशा प्रतिपादनेनौपाधिकश्यामता निवेदनेन चान्यकामिन्यां कृतस्यानुरागस्सूचितः नीलस्य भावो
नीलिमा। पृथ्वादिभ्य इमनिज्वा इतीमनिच् प्रत्ययः। रूपं स्वभावे सौंदर्यइत्यमरः। तव वपुः शरीरं कर्तृ रतिजयलेखं सुरतविजयलिखने अनुह
रतिसदृशी करोति। कीदृशं सत् स्मरसंगरे कामयुद्धे खराणां तीक्ष्णानांनखराणां क्षता नियत्रो कामस्य मरकतशकलैर न्नविशेषखंडे
कलितायाः आरोपितायाः कलधौतलिपेः सुवर्णविरचिताक्षरस्य विन्यासस्येव वपुषोति नीलत्वान्नखक्षतस्य रक्तत्वान्मरकतखंडार्पित
सौवर्णाक्षरसाम्यं। संगरइव संगरः। तवेदं हृदयं कर्तृ बहिर्बाह्यतो मदनद्रुमस्य कामवृक्षस्यैव नवकिसलयपरिवारं नूतनपल्लवसमूह
मिव दर्शयतीति। कीदृशं सत्। चरणकमलादन्यस्मी पादपद्मात् गलता पतता अलक्तकेन यावकेन सिक्तमुद्रितं। कौंच बंधे कामिनीचरणो
कांतस्य हृदितिघतः। तदुक्तं भरते। हस्तोपस्थाप्य मानीय पादस्थाने शिरस्तयोः। स्त्रिया पादौ हृदि स्थाने कौंचबंधं प्रकीर्तितः। पुनः कीदृशं
हृदयं। उदारं महत्। महारंभं महापुरुषलक्षणं। तथा च रघुः कपाटवक्षाः परिणद्धकंधर इति। उदारं कौटिल्यरहितं वा। यत् आंतरं काम
भावं बहिः प्रकटीकरोति। यद्यपि किसलयशद्धो नूतनपल्लवमेवाभिधत्ते इतिनवपदं व्यर्थं। तथापि नवपल्लवानंतरं नूतनत्वं यत्र प्रदर्शितं प
४ जने रिवारः परिकरे समूहे वेष्टने चेति धरणिः। भवतो धरगतं दशनपदं कामिन्यंतरदंतचिह्नं कर्तृ मम चेतसि खेदं कष्टं जनयत्युत्पादयति। एतद्द
शनपदं अधुनापि इदानीमपि कथं केन प्रकारेण मया सह तव वपुरभेदं भेदशून्यमिति कथयति। पूर्वं तवशरीरं मम शरीरादभिन्नमोहादिना आ
सीत्। इदानीं तु परकीयं तव शरीरमतो न मया सहाभेद इत्याशयः। अधरगते क्षते अन्यशरीरे खेदो द्वयोरैक्ये परं न युज्यत इति भावः। यद्वा। एतत्तव व
पुर्मया सहापि अधुना कथं केन प्रकारेणभेदं कथयति। ततस्तवाधरगतेन ममपीडेति भावः। वस्तुतस्तु अधरगतदंतक्षतस्य गोपितुमशक्यत्वा

२१ इाधाया दर्शनादंतं दुःखमितिभावः। हे कृष्ण तव मनोऽपि चित्तमपि बहिरिव मलिनतरमतिकृष्णं भविष्यतीत्युत्प्रेक्षा। नूनं शब्द उत्प्रेक्षाव्यंजकः। तथा च
दंडी॥ मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः। यथा बहिः शरीरं श्यामं तथा मनोऽपि श्यामं भविष्यतीतिभा
वः॥ बहिः शब्दोऽत्र लक्षणया बाह्यशरीरमाह। केचित्तु बहिः शब्दोऽनेकार्थ इति बाह्यवर्णवाचीत्याहुः। अनुगतं जनमस्मद्विधं कथं वंचयसे। की
दृशं जनं। कुसुमशरज्वरेण कामपीडया दूनमुपतप्तं। अत्रापिरध्याहर्तव्यः। कृतेन कामशरपीडितमपि जनं निःकरुणस्त्वं वंचयसे इति तव मनो
मलिनमेवेतिभावः। अत्रानुशब्दो व्ययत्वादनेकार्थ इत्यन्यार्थवाची। अबलाकवलाय स्त्रीणां यसनार्थं मारणार्थं वा भवान् वनेषु भ्रमति। अ
त्र स्त्रीवधे किं चित्रं चित्रमाश्चर्यं। यतः पूतनिकेव पूतना नाम कंसभगिनी सैव तनुवधूवधेन निर्दयं बालचरित्रं शिशुलीलां प्रथयति निवेदयति
वर्तमानसामीप्ये वर्तमानवद्वेति भूते लट् प्रत्ययः। त्वया शिशुना बालचरित्रे लोत्तानशायिना विषदिग्धस्तन्यदानेन हंतुमागता पूतना हता
तास्मिन्नत्वयि सूनिसं प्रतिकामिनीयासे किंचिन्नमितिभावः। वधूवधनिर्दय। हे। तव बालचरित्रं शिशुलीलां पूतनिकेव प्रथयति। अत्रव्याख्या
नेसंबोधनेनैव विवक्षितार्थबोधः। हे विबुधाः पंडिताः शृणुत आकर्णयत। श्रीयुक्तो जयदेवः श्रीजयदेवः तेन भाणितउक्तंश्थासो रतिवंचित
खंडितयुवतिविलापश्चेति कर्मधारयः। रत्या संभोगेन वंचिता त्यक्ता या खंडिता युवतिः तस्या विलापः परिदेवनं। अन्यथा स एव धृष्टनाय २६
कः परगृहात्प्रातरागत्य खंडितां निजवधूं सुरते न संतोषयत्यपि। अधुनानेयं तथेति रतिवंचितशब्देन ध्वनितं॥ खंडितालक्षणमुक्तमेव। कीदृ
शं। सुधामधुरं सुधा अमृतं तद्वन्मधुरं मनोहरं। विबुधालयतोऽपि स्वर्गादपि दुरापं दुर्लभं। आलयो गृहम्। विबुधालयत इति आद्यादिभ्यस्तस्यु
पसंख्यानं इति सप्तम्यर्थे तसिः। पंचम्यर्थे वा। क्वचित्तु वहतोऽपि दुःखं दुरापमिति पाठः। तत्र सुखं वहतोऽपि जनस्य दुर्लभमिति। विबुधैः पंडितैर्वा देवे
श्चः॥ सा पुनरपि कृष्णं सामान्यस्त्रयमाह। तवेदमित्यादि। हे कितव धूर्त त्वदालोकस्तव दर्शनं कर्तृ प्रत्याख्यातस्य लोकप्रसिद्धस्य प्रणयभरस्य प्रे
मातिभारस्य भंगेन विनाशेन यः शोकस्तस्मादपि किमप्यनिर्वचनीयां मम लज्जां जनयति उत्पादयति। मम कीदृश्याः। तव देहं हृदयं पश्यं-
त्याः। कीदृशं हृदयं। प्रियापादालक्तकच्छुरितं सुरते क्रौंचबंधेन कांताचरणयावकसंबद्धमित्यर्थः। अत एवारुणद्योति। अरुणः संध्यारागस्तद्

विलक्षो वैलक्ष्ययुक्तः। वैलक्ष्यलक्षणं तु। आत्मनश्चरिते दुःखे ज्ञाते न्यैर्यत्र जायते। अपत्रपाति महता तद्वैलक्ष्यमुदाहृतमिति॥

द्योतितुंशीलमस्येति ताच्छीलिको णिनिः। यद्वा। अरुणवदादित्यसारथिवद्द्योतः प्रकाशो यस्यास्ताः। ति णिनि प्रत्यये अरुणद्योतीति साधुः। अरुणच्छाय
मितिक्वचित्पाठः। तत्पक्षे। अरुणा लोहिता कांतिर्यस्य पश्चाद्धृदयेन सह कर्मधारयः। किमिव। बहिः प्रसरदनुरागमिव। बाह्यवर्त्तमानानुरागमिव।
उत्प्रेक्षालंकारः। अरुणो व्यक्तरागे स्यात्संध्यारागेऽर्कसारथौ। लोहितेप्यरुण इति विश्वः। छाया सूर्यप्रिया कांतिः प्रतिबिंबार्कयोषिति। प्रणयः
प्रेम्णि विश्वास इति च॥ सर्गांते कविर्मंगलमाह॥ प्रातरित्यादि। अयं नंदात्मजः कृष्णो जगदानंदाय लोकानां सुखाय अस्तु भवतु॥ कीदृशः व्री
डाचंचलो लज्जया तरलं नयनयोरंचलं अपांगं राधानने राधामुखे आधायार्पयित्वा स्मरस्मेरमुखः अत्यर्थेन सहासाननः। कस्मिन्सति। प्रातः
प्रभाते अच्युतं कृष्णं नीलं निचोलं यस्य तं श्यामवस्त्रधरं राधायाश्च उरोवसः स्थलं संवीतपीतांशुकं उरसीयकृतपीतवसनं विलोक्य चकितं विस्मि
तं यथा स्यात्तथा इति कृत्वा सखीमंडले गोपीकदंबके हसति सति। विलक्षो विरक्तो लक्ष्मीपतिर्यत्र सः तथा॥ इतिश्रीजगद्धरविरचिते
अष्टमः सर्गः॥ ॥अधुना राधां कलहांतरितां कश्चित्सखी प्राह॥ अथेत्यादि अथानंतरं तां राधां सखी गीते वक्ष्यमाणमाह उक्तवती॥ कीदृशी
मन्मथखिन्नां कामेन दीनां रतिरसेन संभोगरागेण भिन्नां विदारितकरणां विषादसंपन्नां उद्वेगसहितां अनुचिंतितमनुध्यातं हरिचरितं कृष्ण
चरितं यया तां। कलहांतरितां कलहे न दूरस्थां कृष्णादर्शनात्। अथ च कलहांतरिता नाम नायिकैव। तल्लक्षणं तु भरते। प्राणेश्वरं प्रणयकोपम
रेण भीतं या चाटुकारमचिरादवधीर्य पश्चात्। संतप्यते मदनवह्निशिखासहस्रैर्याव्याकुला तु कलहांतरितेति सा स्यात् इति। भिन्नां दारितसंग
ता इति विश्वः॥ कलहांतरितमेव स्फुटयति हरिरभिसरतीत्यादि गीतस्यास्य गुर्जरीरागो रूपकतालः लक्षणं तु क्रमेव। गीतार्थस्तु। अयेमा
निनि कुपिते माधवे मानं रोषं मा कुरु। हे सखि राधिके। मधुपवने वसंतवायौ वहति सति हरिः कृष्णोऽभिसरति स्वयमायाति। भवने गेहे अप
रमधिकं सुखं किं अपि तु न किमपि। इदमेव परमित्यर्थः। मृदुपवन इति क्वचित्पाठः। अत्र मृदुपवने मनोहरवाते वा वहति सतीत्यर्थः। मधुर्दै
त्यो मधुश्चैत्र इति शाश्वतः। हे सखि कुचकलशं स्तनघटं किं फलं कुरुषे। कृष्णहस्तपरिशीलनविलासाभावात्तेः प्रयोजनं कथं करोषीत्यर्थः

30 कीदृशं तालफलादपि गुरुं। कठिनत्वात्तालफलादप्यधिकमित्यर्थः। पुनः कीदृशं अतिसरसं अतिशयरसयुक्तं। तस्मिन् दृष्टे तरुणेऽलालसा
भवतीत्यर्थः। इदमचिरं सांप्रतमेव कतिवारान् अनुपदं पदे पदे मया न कथितं किंतु उदितमेव। हे सखि हरिमतिशयरुचिरं अतिकांतं मा परिहरेति। अनु
पदमिति वीप्सायामव्ययीभावः। पदं स्थाने च वाक्ये च व्यवहारापदेशयोरिति विश्वः। इत्यनेन प्रकारेण विफला दुःखिता त्वं विषीदसि विषादं करो
षि। रोदिषि किं दूयसि च। सकलासमस्ता तव युवतिसभा तरुणीगोष्ठी विहसति। अर्थात्त्वामिव। मृदुनलिनीदलेन कोमलकमलपत्रेण शालि
तं कृतं यच्छयनं तत्र हरिं कृष्णं आलोकय पश्य। तद्दर्शनात् नयनेव चक्षुषी सफलय सफले कुरु। इत्येवं रूपेण गुरुखेदं महादुःखं मनसि चित्ते
किं किमर्थं जनयसि। खेदशांतये मम वचनं शृणु। कीदृशं। अनीहितो नाकांक्षितो भेदोऽसांनिध्यं यत्र येन वा तत्तथा॥ श्रोतव्यवचनमाह। हरिः
उपयातु हे सखि त्वय्युपगम्यतां भवतु। वदतु बहुतरं मधुरं चाटु प्रियं वदतु। इत्येवं सति हृदयमतिविधुरं अतिशयविकलं करोषि। विधुरं स्यात् प्रति
पक्षे विधुरो विकलोऽन्यवदिति विश्वः। श्रीजयदेवभणितमिदमतिललितमतिमनोहरं कर्तृ रसिकजनं सरसलोकं सुखयतु सुखिनं करोतु
अतिललितात्मागतालमानादीनां अवैषम्यात्। कीदृशं हरिमिलितं कृष्णमेलकं भणितमिति गीतं। सुविनीतमिति पाठः। इत्यनेन प्रकारेण नी
ती रसिकजनं सुखयतु। कीदृशं जनं सुविनीतमति विनययुक्तमित्यर्थः। प्रणतमपि प्रियमतिरोषात्यजंतीं राधां निंदंती सखी इदमाह॥ स्निग्ध इत्यादि॥
हे विपरीतकारिणि विपर्ययविधायिनि सखि तस्मिन् प्रिये यद्यस्मात् स्निग्धे मधुरे वा दिनि स्नेहवति वा सति त्वं परुषासि निष्ठुर[illegible]वादिन्यसि। प्रणमति ३०
विनते सति स्तब्धासि दंडवत्स्थितासि। रागिणि सानुरागे प्रिये सति द्वेषस्थासि अप्रीतासि। उन्मुखे वीक्षितुं सन्मुखे सति विमुखतां यातासि। त
तस्माद्युक्तमेवं चंदनानुलेपः तव कृते विषमिव तापजनकत्वात्। शीतांशुश्चंद्रस्तपन इव रविरिव। हिमं तुषारो हुतवहोऽग्निरिव। क्रीडा
मुदः केलिप्रमोदा यातनास्तीव्रवेदनाइवेति सर्वं युक्तं योग्यमेव तव विपरीतकारित्वात्। विपरीतं कर्तुं शीलं यस्याः सा तथा। यातना तीव्रवेदनाइत्य
मरः। रूपकोऽयमलंकारः। सर्गांते कविर्मंगलमाह। अंतरित्यादि। कंसरिपोः कृष्णस्य वंशीरवो वेणुनादः वो युष्माकं अश्रेयांसि अकल्याणानि

व्यपोहतु हरी करोतु। कीदृशः कुरंगीदृशां हरिणनयनानां अंतर्मोहनं मनोमोहः मौलिघूर्णनं शिरश्चलनं मंदारविध्वंसनं। संभ्रमकस्य मंदारस्य पारिजा
तस्य विध्वंसनमधःपतनं सात्विकभावात्। स्तंभ्नाकर्षणे स्तंभस्याभिष्टो राकर्षणमाकर्षः। स्तंभः स्तंभः आकर्षणं आत्मसात्करणं। दृष्टिहर्षणं नेत्रोल्ला
सः। एकुसुमैर्वेधुमहामंत्रः सिद्धमंत्रः। वंशीरवाकर्णनेन सर्वा नायिकाः सकलभावापन्नाः भविष्यंतीति भावः। पुनः कीदृशः। दर्पाद्धिर्दर्पयुक्तैः दा
नवैर्दूयमानानां दिविषदां देवानां दुर्वारदुःखापदां अनिवार्यदुःखपरिपंथिनां अंतो विनाशकः। भगवद्वंशीरवमाकर्ण्य दुःखिता अपि देवाः सु
खमुद्वहंतीति भावः। मोहनमिति भावे ल्युट्। मंदोलसो मुकुंदः कल्लोयत्रसतथा। इति श्रीजगद्धर नवमः सर्गः॥ ॥ अधुना राधा मांत
ब्दष्टां सोत्कंठः कल्लो नुनयन्नाह॥ अत्रांतर इत्यादि। अत्रांतरे अस्मिन्नेवावसरे हरिः कल्लो दिनांते दिनांते प्रदोषसमये राधामुपेत्य राधा समी
पमागत्य सानंदगद्गदपदं मानंदेन गद्गदं पदं यत्र तत्तथा तेन स हव दितं सानंदगद्गदपदं न घथास्यात्तथा इत्यग्रे वक्ष्यमाणमुवाच। कीदृशीं म
सृणः स्निग्धोत्पन्न इति यावत् कोपाट्टागो यस्यास्तां। पुनः कीदृशीं। सव्रीडं सलज्जं यथास्यात्तथा ईक्षितसखीवदनां दृष्टवयस्यामुखीं। मसृणः क
करोस्निग्धेत्यपायांमसृणो मत इति विश्वः। उक्तमर्थं गीते नस्फुटयति वदसीत्यादि। अत्र देशिविराडीरागः अडतालः रागलक्षणं तु आर
अ ढगमनमुद्रा घूर्णयमाननयनयुग्मा। सुखशायिनि निजदयिते देशवराडी भवेद्गौरीति। गीतार्थस्तु हे प्रिये राधिके। चारुशीले मनो हरस्व
भावे सद्वृत्ते वा। मयि मद्विषये मानमभिमानं मुंच। परिहर। कीदृशं मानं। अनिदानं अनादि कारणं। मानिनी भवतीति कलासपदि तत्क्षणं मदनानलो
भावे सद्वृत्ते वा। मयि मद्विषये मानमभिमानं मुंच परिहर। कीदृशं मानं। अनिदानं अनादिकारणं। मानिनी भवतीति कल्ला सपदि तत्क्षणं मदनानलो
अनंगाग्निः मम मानसं दहति। अतो मुखकमलस्य मुखपद्मस्य मधुपानं मे देहि। मधुना वह्निदाहः प्रशांतो भवति। यतः केचित्तु मदनानलो म
म मानसं दहति अतः सपदि दाहानंतरमेव मधुपानं देहीति योजयंति। हे प्रिये। यदि किंचिदपि वदसि तदा तव दंतरुचि कौमुदी दशनकांति
चंद्रज्योत्स्ना दरतिमिरं भयांधकारं अतिघोरमत्यंतभयंकरं हरति विनाशयति। विकाशत्वेन दंतरुचेः कौमुदीसाम्यं। तववदनचंद्रमा मुखचं
द्रः स्फुरदधरसीधवे दीयमानाधरामृतार्थं मम लोचनचकोरं नयनपक्षिविशेषं रोचयति रुचिं करोतीति। चकोरः पक्षिविशेषः चंद्रामृतलोलु

श्रा नं० ८३

यो भवत्येवेति ध्वनिः। तदत्र मानिनी मानप्रणोदार्थं तदीयभावणमुक्तं। निजनामार्थपूर्वार्द्धे [illegible]तरार्धं तु निजाभिकस्पृहामुल्ला[illegible]सयितुमिति भावः॥
साधव इति तादर्थ्ये चतुर्थी। रुच्यर्थेवा॥ रूपकालंकारः। हे सुदति शोभनदशने यदि मयि मद्विषये कोपिनी कोपवत्यसि। सत्यमेवेदं तदा खरनखरशरघा
तं देहि। कोपवता जनेन निशितनाराचघातो दीयते इति युज्यत एव। भंग्या तु विपरीतरतारंभः सूचितः। पुनस्तदेवाह। भुजाभ्यां बंधं यजनस्य। रदखं
डनं दंताघातं रचय। येन वा मुष्टिप्रहारादिना सुखजातं प्रीतिसमूहो भवतितं त्वं कुरु। वा विकल्पोपमयोरित्यमरः। केचित्तु देहि खरनयन
शरघातं। इति पठंति। तत्पक्षे लोचनत्वेन कटाक्षः सूचितः। शोभना दंता यस्याः सा सुदती। वयसि दंतस्य दंतृ। यद्वा दंतसमार्थे दत्तृशद्वः। तदुक्तं बाल
रामायणे। [illegible]बालकन्ने न नखरोमम रवातो विषीदति। उत्पाटितास्त्वशत्रो यथा कुद्दो विभीषति। अत्र विषीसपोदति द्वं ते खरस्तीक्ष्णइत्यर्थात्
समूहे तद्भवे जातमिति धरणिः। त्वं मम जीवनमसि। सत्यं मत्रमंतर्हिता यां सत्यां त्वयि मम प्राणा गंतुकामा [illegible] यतः। त्वं मम भूषणमसि। त्वां विना
न शोभां दधामि यतः। त्वं भवजलधिरत्नं संसारसागरनिधिरसि मम॥ जातो जातो यदुत्कृष्टं तद्रत्नमभिधीयते इति रत्नत्वमुक्तं। इहेति देशे काले
वा भवतीं [illegible] मयि मद्विषये सततमनवरतमनुरोधिनी अनुकूला भवतु। यत्र विषये मम हृदयं कर्तृ अतियत्नं भवति। अनुरोधी त्वनुवर्तनमि
त्यमरः। भवस्यानंतत्वाद्दुस्तरत्वाज्जलनिधिना रूपकं॥ हे तन्वि कृशांगि तव लोचनं कर्तृ कोकनदरूपं रक्तोत्पलतुल्यतां धारयातिरक्तं भवतीत्य ३१
र्थः। की दृशं। नीलनलिनाभं मपि श्यामपद्मप्रभमपि। अपि नाम्नर्वदिशो क्तो पूर्वं श्याममपि नयनमधुना रोषवशाद्रक्तमित्यर्थः। एतच्च समुचितमे
व कोपवतः। पुनरप्यनुरूपमेवाह॥ कुसुमेत्यादि। इदं चक्षुः कर्तृश्यामं कुसुमशरबाणभावेन कुसुमशरः कामस्तस्य बाणाः कुसुमान्येव
तेभ्यो भावडत्पत्तिर्यस्य मधुनस्तेन रंजयसि रक्तं करोषि [illegible]त दा एतद्रक्तरूपमनुरूपं योग्यं भवति। यदि मधुपानं मया सह करोषि तदा नयन
स्य रक्तत्वमेव योग्यं भवतीत्यर्थः। यद्वा यदि कृष्णमिमां कुसुमशरबाणभावेन कामनाराचाभिप्रायेण सुरतादिना रंजयसि तदा इदं रक्तत्वमेव
तदनुरूपं तस्य योग्यं भवति। यतः कृष्णानुरंजकमिति समुचितमेव भवत्याः। यद्वा। यदीदं चक्षुः। कुसुमशरबाणभावेन कामनाराचा

भिप्रायेण त्वं दूरं रंजयसि। अनुरंजकरोसि। तदेव तव चक्षुः कज्जलं सदनुरूपमनुगतरूपं भवति। कोपत्यागात् ... ता परित्यागे पूर्वास्थामतेव भवती
ति भावः। मधुनः पुष्परसस्तेन कुसुमशरबाणभावमुपगतमेव। केचित्तु यदि कुसुमशरबाणभावेन कामाभिप्रायेण हृत्सुमयेत तत्र चेत्तुर नुरंजयसि त
दा दूरं रक्तत्वमनुरूपं भवति। रतिः प्रतिभावे कोपे च सति रमणीनां वस्तुलौहित्यं भवति अनुरूपतेति व्याचक्षते। मणिमंजरीरत्नलताहारल
तेति यावत्। कुचकुंभयोः स्तनकलशयोः उपरिस्फुरतु शोभतां तव हृदयदेशं रंजयतु दीप्तं करोतु। रश्मिभिरितिशेषः। तव घनजघनमंडले
निबिडकटिपुरोभागदेशे रसना किंकिण्यपि रसतु शब्दं करोतु। सा च यां स्वसंज्ञां सफलामापादयत्वित्यर्थः। ये वा मन्मथनिदेशं कामाज्ञां घो
षयतु च। जघने मया सह रतेराचरणात्तदा कामशासनघोषणामुचितमेवेति भावः। मणिभिर्हरत्कं मणिरुच्यते। अत एव रंजधातोः प्रयोगः
। घनो काठिन्यसंघाताविति विश्वः। एकपदे स्थानद्वयेपि तवेति पदं न दुष्टं। अग्रतनर्कस्यादोषात्। हे घनमसृणवाणि निबिडस्निग्धवच
ने तव पदकंजं चरणकमलं सरसरसदलक्तकरागं करवाणि। सरसं रससहितं यथास्यादिति रलयोरैक्यात् अलक्तकरागो यत्र तादृशमित्यर्थः।
। कीदृशं। स्थलकमलगंजनं। गंजतीति नंद्यादित्वात् ल्युः। स्थलकमलसदृशमित्यर्थः। ... स्थलपदेनात्र कमलस्यातिलौहित्यं अतिसुकुमा
रत्वं सूचितं। पुनः। मम हृदयनंदनं। हृदयानुरागकारकं। अत्रापि नंद्यादित्वात् ल्युः। पुनः। जनितो रतेः रंगस्य सुरतकौशलस्य परभागो
न्यच्छोभा यस्य येन वा तत्तथा। भागः कौशलरागयोरिति विश्वः। परस्य रंगतया कांतिः परभागः स कथ्यत इति धरणिः। मसृणं चिक्कणे स्नि
ग्ध इति च। केचित्तु भण पठंति। तत्र हे राधे भण एवं वदेति योज्यं। सुगममितरत्। उदारं श्रेष्ठं पदपल्लवं मम शिरसि देहि अर्पय। कीदृशं मे
डनमलीकरणं वा। अत्रापि मम शिरसीत्यनुषज्यते। आकांक्षावशात्। कीदृशं। स्मरगरलस्य कामविषस्य खंडनं मोचनं। मदनकद
नानलः कामपरितापवह्निः ज्वलति दीप्यते। कीदृशः। दारुणः क्रूरकर्मा भयानकोपि। एतेन मदनोपहितविकारं आरोपितोपतापं
कामदत्तविकारं हरतु समस्तदर्थमेव पदपल्लवस्य शिरसि ... दानमिति भावः। अन्यस्यापि पल्लवाच्छादितशिरसः सूर्यतापो न भवति।

32

अत एव मदनकदनदारुण इति पागंतरं घटते। अरुणः स्फुरद्रागोऽस्यास्त्वर्थे सूर्यस्य सारथाविति विश्वः। अत्राशिरसि पाददानेन जनितार
तिर्मानिनीमानभंगायदर्शिता। कदनं कलुषे ताप इति विश्वः॥ कामविकाराः कंपादयः। मधुवैरिणः कृष्णस्य इत्यनेन प्रकारेण वचन
जातं वचनसमूहो जयति उत्कर्षेण वर्धतां। वर्णनस्योद्देश्यमाह। राधिकामधिराधामधिलक्ष्य इत्यर्थः। कीदृशं। चटुलं मनोहरं।
चाटु प्रीतियुक्तं। पटुदक्षौ। चारुसुकुमारो। यद्वा। चाटुपटुदैन्यकुशलमित्यर्थः। पुनः कीदृशो। जयदेवकवेर्भारत्या वाण्या विभूषितमलंकृतं छ॰
मानिनीजनस्य जनितं सुखं येन तथा कश्चित्तु जयति पद्मावतीरमणजयदेवकविभारतीभणितमतिशातं इति पाठः। तत्पक्षे पद्मावती
[illegible] भार्या [illegible]स्य [illegible] तां रमयतीति नंद्यादित्वात् ल्युः। स चासौ जयदेवकविश्चेति तस्य भारती तया भणितमतिशातमतिसुखं ददातीत्यर्थः।
चटुलः सुंदरे चले इति धरणिः। अत्वाभावस्त्वनभिधानादेव। संप्रत्यपराधापनयमाह॥ परिहरेत्यादि। हे कृष्णसातंके विहितकोपे इमां कोप
रस्त्रीसंभोगशंकां परित्यज परिहर। मम स्वांते हृदये सततमनवरतं त्वयाक्रांते अत एव परानवकाशिनि अन्यस्य विकाशशून्ये सति वित
[illegible]नो ऽन्यः कामाद[illegible]ः कोपि धन्यो मम आंतरं अभ्यंतरं न विशति। विगतातनुर्यस्य एतादृश एवावकाशः। अन्यो न विशतीति भावः। त्वया कीदृश्या।
घने कठिने स्तनजघने यस्याः एतादृश्या। अत एवान्यानवकाशः। अत एव ममांतरं कामो विशति। अत एव स्तनभरपरिरंभे स्तनातिशयालिंगने।
द्योगे विधेयतां कर्तव्यतां विधेहि आलिंगय मामित्याशयः। आतंकः क्रोधशंकयोरिति धरणिः। स्तनजघनेति प्राण्यंगत्वादेकवचनं। पुनरपि ३२
निजापराधापनयनायाह। मुग्धेत्यादि। हे मुग्धे मूढे मनोहरे वा। मयि निर्दयं दंतदंशं दयाशून्यं दंतक्षतं विधेहि। ऊरू। दोर्वल्लिबंधो भुजलं
ताबंधनं तेन निबिडं दृढं यथा स्यादेवं स्तनपीडनानि आलिंगनानि विधेहि। ऊरू इत्याकांक्षावशात् उभयत्राप्यनुनेयं। हे चंडि अत्यंतकोपने त्वमे
व मम सुखं दृषं उदंचय। अवजनय। एवकारेण अन्यविषये निजानुरागाभावः सूचितः। पंचबाणः कामः स एव चंडालस्तस्य कांडदलनात् शराघातात्
इसवः प्राणा न प्रयांतु न गच्छंतु॥ अतो मयि प्रसीदेत्यर्थः। चंडीत्स्यादतिकोपनेत्यमरः। उदंचिर्जननार्थे धातूनामनेकार्थत्वात्। चंडालः श्वपचो मत इति
धरणिः॥ पुनस्तदेवाह। शशिमुखीत्यादि। हे शशिमुखि चंद्रवदने तव भंगुरभ्रूर्भाति। युवजनानां मोहाय कराला भीषणा कालसर्पिणीकृष्णस

र्पवधूस्तादृशी वा। यस्य उदितमयस्य भंजनाय मर्दनाय प्रभुतां तस्य गणानां त्वदधर ॥ सीधुः सुधैव तदधरसीधुर्मद्यद्रवपानसाम्यात्। सोपि सुधामा
धुर्यात्। अस्त्याह्लादकत्वाच्च स एव सिद्धमंत्रो विषापहरणार्थं सिद्धं यथा स्यादेवं मंत्र इत्यर्थः। सर्पीत्यत्र पुंयोगादाख्यायामिति ङीष्। स्वरूपकोऽर्थः। भंगुरमि
ति भंजधातोर्भंजभासमिदो घुरच्॥ ॥कथयतीत्यादि। हे तन्वि तव वृथा मौनं निःफलं निर्वचनं कर्तृ व्यथयति। मामिति शेषः॥ अतः पंचमं रागविशेषं
प्रपंचय विस्तारय। हे तरुणि मधुरालापैः कोमलवचनैः तापं मनोव्यथां मम विनोदय। अपसारय। हे सुमुखि सुवदने विमुखीभावं त्वं दृष्टिभि
र्दर्शनैर्मुंच। परिहर॥ मां पश्येत्यर्थः। मां च न परिहर। हे मुग्धे ज्ञानशून्ये स्वयमुपस्थितोऽतिशयस्निग्धो महावत्सलः प्रियोयमस्ति। स्वयमुपगते प्रेम
लेरति न व भासीति मूढत्वमिति भावः॥ पंचमो रागभेदे स्यात् पंचानामपि पूरणे इति विश्वः। तावच्छब्दः साकल्यार्थे प्रयुज्यते। तथा च। साकल्यार्थे परिच्छि
न्ने त्रक्रमे तावदव्ययं इति विश्वः। स्निग्धो वत्सलविकरणाविति च। अधुना मानिनीप्रबोधनाय चाटुवचनपुरःसरं तत्प्रशंसामाह। बंधूकेत्यादि॥
हे चंडि कोपने तवायमधरो बंधूकद्युतिबांधवो रक्तपुष्पविशेषो बंधूकस्तस्य द्युतिः कांतिस्तस्य बांधवो मित्रं सदृश इति यावत्। एवं विशिष्टश्च कास्ति।
शोभते। तथायं गंडः स्निग्धश्चिक्कणः सन् मधूकच्छविः शोभते। मधूको मधुक इति ख्यातः। पुष्पविशेषः। मचकुसरः। तथा तव लोचनं नीलनलिनश्रीमो
चनं श्यामकमलदलविलासत्याजनं तव नासा तिलप्रसूनपदवीं तिलपुष्पमार्गमभ्येति अनुगच्छति। हे प्रिये कांते कुंदाभदंति कुंदकुसुमसमदश
ने। प्रायः उत्ते त्वन्मुखसेवया सपुष्पायुधः कामो विश्वं विजयते। विश्वविजये कामः पुष्पायुधानि व्यापारयति। तानि त्वदीयवदन एव संतीत्यु
त्प्रेक्षितम्। एतेन कामस्यापि त्वन्मुखसेवा तत्कथमहं वराकस्त्वद्विरहेण जीवामीति ध्वनितं। स्निग्धो वत्सलचिक्कणाविति विश्वः। मोचनमिति मोचय
४ त्वार तीति नंद्यादित्वाल्ल्युः। प्रायःशब्दस्त्वत्रोत्प्रेक्षार्थः। मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादयः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश इति। दंडिवचनात्। विजयत
इति विपराभ्यां जेरित्यात्मनेपदं। स इति तच्छब्दः प्रसिद्धौ। अतो यच्छब्दाकांक्षा नास्ति। तस्मै नमः परमकारणकारणायेत्यादिवत्। दृशौ शा इत्यादि॥
तव दृशौ नेत्रे मदालसे मदेनालस्ये अवलोकनाय मंदायते। वदनं तवेंदुमत्या चंद्रबुद्ध्या अधिवितेषु अनुगतं। त्वदीयवदनदर्शनेन साम्यात् चंद्रबुद्धिर्भव
तीत्यर्थः। तव गतिर्गमनं जनमनोरमा सुंदरी रूपद्वयं तव विधुताजितारंभा कदलीयेन तत्तथा। तव रतिः सुरतविलासः कलावती कामकलाकौशलयु

33 केत्यर्थः। भ्रुवौ तव रुचिराणां चित्राणां लेखानां पंक्तिर्ययोस्ते तथा। तदनेन पदयोजनकौशलेन मदालसेंदुमती मनोरमा रंभा कलावती चित्रले
खा अप्सरसः प्रतिपादिताः। दृष्टिमातेति दृष्टी संदोपिधानिते॥ प्रियोऽलंकारः। कदलीकारणेबुसारं भेत्यमरः॥ यौवतं युवतीवृंदे च। मंगलं सर्गां
ते प्राह। प्रातामित्यादि हरिः कल्लोलांबु युष्माकं प्रीतिं तनुतां विस्तारयतु। कीदृशः॥ रणे संग्रामे कुवलयापीडेन कंसहस्तिना सार्धं कुंडेन स्थूल
हस्तेन संभेदवान् संबद्धः। अतस्तत्र कुंभे राधायाः पीनपयोधरस्मरणं कुर्वन् राधिकामांसलस्तनसंयुक्तः। हस्तिदर्शनेन पीनकुचस्मरणं युज्यत ए
न व। तदुक्तं। सदृशादृष्टचिंताद्याः स्मृतिबीजस्य बोधकाः। यत्रेवाहने बिभ्यति भयं गते सति। अथानंतरं यस्मिन् हरौ निबिडद्वीपे अभिमुखे कुवलयापी
डे सति बालैर्जितं जितमिति याऽलोच्चं चलः कोलाहलः कलकलः कंसेशीलति अश्रयति सति कंसो बालेन जित इति सर्वैः कलकलः कृत इत्य
र्थः। वचनैरनुकूलतया मानिनीमानापनोदनाच्चतुरश्चेतनश्चतुर्भुजः कृत्वा यत्र। स तथा॥ इतिश्रीजगद्गुरु दशमः सर्गः॥ अधुना राधां प्र
तिसखीवचनमाह। सुचिरमित्यादि। कापि सखी राधांऽगादुक्तवती। वक्ष्यमाणमिति शेषः। प्रदोषे रूपकमसमयेस्फुरति दीप्यमाने सति। सत्रे
कीदृशे। दृष्टिं दर्शनं मुष्णातीति कर्मण्यण्। तस्मिन् अंधकारवर्णनतया प्रदोषस्य दर्शनमोषणत्वमिति भावः। कीदृशीं। निरवद्यां। निर्गतो वसा ३३
दोमानभंगादिरूपो यस्यास्तां। पुनः कस्मिन् सति। सुचिरमतिबहुकालं अनुनयेन प्रीति वचसा तां मृगाक्षीं हरिणनयनां प्रीणयित्वा प्रस
न्नां कृत्वा केशवे कुंजशय्यां लतापिहितगृहे शयनं गतवति सति प्राप्ते सति। कीदृशे वेषः शृंगारादिरूपमलंकारादिरूपं येन तस्मिन्। तां
कीदृशीं रचिता कृता मनोज्ञा भूषालंकरणं यया। तदनेनान्योन्यालंकारविधानेनान्योन्यानुरागः स्फुरतायस्सूचितः॥ उक्तमर्थं गीतेनाह। वि
रचितेत्यादि। गीतस्यास्य वसंतरागो रूपकतालः गीतार्थस्तु। हे राधे मुग्धे मूढे मधुसूदनं माधवमनुगतमनुकूलमनुसर अनुगच्छ। वीरपुरुषे स्त्रीणामभि
तिशयितो मनोरथो भवतीति दर्शयितुं मधुसूदनपदं। यद्वा। मधुपानरतेन कृष्णेन सह मधुपानं सुरतमनोरथश्च तवस्यादिति बोधितं मधुसूद
नपदेन। रचिता चाटुवचनरचना येन तं॥ पुनः कीदृशीं। चरणे रचितः प्रणिपातो येन तं॥ मानभंगाय कृतनमस्कारमिति भावः। पादपतनमातो मानइति

कृतः ७

शय्यो ऽनुलग्नी कृत्य गतं। अतस्तत्र तत्र गमनमवश्यमुचितमिति भावः। रसने एव आस
अथोर्थं गुरु। केल्यर्थं शा।

भरतेन दर्शितमेव। संप्रत्यधुना। मंजुलो मनोहरो वंजुलो ऽशोको वेतसो वा तस्य समीप निपर्यंतेन तद इति यावत्। केलिशयनं क्रीडार्थं शयनं केलिशयनं। जघ
नजघनस्तनभारभरे ऽघनयोर्निबिडस्थोऽघनस्तनयोः यो भारो ऽतिशयस्तेन मंथरो यस्यास्तादृशि। हे राधे कृष्णमुपेहि उपगच्छ। इदं मंथरं ईषन्मं
थरचरणविहारो यत्र गमने तत्तथा।। मुखरवरितो ध्वनितो मंजीरो नूपुरं यत्र तद्यथा स्यात् तथा क्रियाविशेषणं। अत एव मरालस्य हंसस्य निकामस्य तादृश्यं यथा
हंसं विडंबयति। मंथरगमने नन्पुरशब्देन च राजहंसस्य सादृश्यं। सो ऽपि प्रिया प्रबोधार्थं मंथरमेवागच्छतीति भावः। मरालो राजहंसे स्यान्मरालो हंसे
स्मर्य इति धरणिः। धात्वनामनेकार्थत्वे न निर्वृद्धं करोतीति शब्दार्थे ऽपि।। हे सखि रमणीजनस्य मोहनं मधुरिपोः कृष्णस्य रावं नादं वंशस्य तिशेषः।
अर्थलभ्यमिदं वा [illegible] शृणु। कीदृशं। रमणीयतरमतिमनोहरं। कोकिलतु मधुपविरावमिति पाठः। तत्र मधुपस्य भ्रमरस्य विरावं झंकारं शृण्वित्यर्थः।
पिकनिकरे कोकिलसमूहे भावमभिप्रायं लीलां वा भजस्व आश्रय। कीदृशे। कुसुमशरासनस्य पुष्पधन्वनः कामस्य शासनं आज्ञा वल्लितु शीले यस्य य
स्मिन्। हे मानिनि मानमपहाय तरुणं भजध्वं इति शासनमिव कोकिला लालापंतीति भावः। एतेन वसंतकाले यं तरुणीनां तरुणैः सार्धं क्रीडि
तुमिति त्वमपि तथा कुर्विति ध्वनितं। केचित्तु कुसुमशरासने पदं राधिकासंबोधनमिति वदंति। तदसत्। उपक्रांतरसा निर्वाहकत्वात्। वल्लातीति
ताच्छीलिको णिनिः। भावः सत्तास्वभावाभिप्राय चेष्टात्मजन्मसु इति अमरः। हे करभोरु गतिं प्रति विलंबं मुंच त्यज। शीघ्रं गच्छेत्यर्थः। यतो लतानिकुरंब
लतासमूहस्त्वामिति प्रेरणमिव करोति। लतायाः करस्यासंभवमाशंक्याह। अनिलतरलेन वातप्रेरितेन किसलयनिकरेण पल्लवसमूहेन करेण
लिहूपकं ज्ञानरहिता अपि लतास्त्वां कांतसविधं गंतुं प्रेरयंति किं तु मा हस्य इति भावः। समूहे निकुरुंबमस्त्रियामित्यमरः। करभा विव वृत्तानुपूर्वे
त्वेनोरू यस्यास्तादृशी ति संबोधनं। इदं तु विलंबकारणमुक्तं। भ्रे यो लंकास्य। हे राधे अमुं कुचकुंभं स्तनघटं एहि गंतव्यं चेति। कीदृशं। अनंगः काम
स्तस्य तरंगश्चांचल्यं तस्य वशमायत्त तात्तस्मादि वस्फुरितं भृशं कुपितमित्यर्थः। अत एव सूचितो हरेः परिरंभो येन तं। आवेदं प्रियजनागमसूचनं
यस्तनकंपो भवतीति वात्स्यायनः। पुनः कीदृशं। मनोहरो मुक्तानां जालो यत्र तं। यः पूर्णकुंभो भवति तस्य मुखाज्जलधारा पततीति ध्वनिः। परिणाहि

त्वादिनास्तनयोः कुंभसाम्यं॥ रूपकं पल्यनिर्माणत्वादिनाहारस्य जलधारासाम्यं। उत्प्रेक्षालंकारः। हे चंडि अत्यंत कोपने। नवेदं वपुरधरतिरणसक्तं
सुरतसंग्रामसंनद्धं यथा भवत्येवं अखिलसखीभिः समस्तवयस्याभिः अधिगतंज्ञातं। सर्वेगत्यर्था ज्ञानार्था इति गमिर्ज्ञानार्थः॥ कीदृशं। रसिताश
ब्दिता रसना कांचीतस्या रवो ध्वनिः सएव डिंडिमो यत्र तत्तथा॥ सरसं रससहितं यथा स्यादेवमलज्जं लज्जारहितं यथास्यादेवमभिसरं अभिसरत्य
र्थाद्। रतिरणे सज्जयतीति पचाद्यच्। रतिरणशय्या शरादृढ़साधुः। डिंडिमशब्दोरवपरमिहोपचारात्। डिंडिमोवाद्यभेदो दोदुं गुरिति प्रसिद्धः॥ केचित्तु
अभिसारे अभिसारविषये सरसमिति वपुर्विशेषणमेवेदमिति वदंति। हे राधे करेण सखीमवलंब्य सलीलं विलासान्वितं यथा स्यादेवं गच्छ। (क)
दर्शनकरेण। स्मरशरवत्कामबाणवत्सुभगोमनोहरो नखो यस्य तस्य क्कणितैः कंकणशब्दैः हरिमवबोधय। अहमागतास्मीति ज्ञापयेत्यर्थः।
अपिः क्रियासमुच्चये। कीदृशं हरिं। निजआत्मनि गतिर्यस्य सनिजगतिः कामस्तस्मिन् शीलं समाधिर्यस्य कामपरवशमित्यर्थः॥ यद्वा। निजस्य
गतोगमने शीलं स्वभावो यत्र तत्तथा गमनार्थे विहितनिजगमनमित्यर्थः। यद्वा। निजगतिशीलस्वभावो यस्य नानातरुणीगमनार्थमगमनशील
मपिहरिं अहमागतास्मीति बोधयेत्यर्थः। शीलं समाधौ स्वभावे... नेविधरणिः। श्रीजयदेवभणितमिदं गीतरूपं कर्तृ हरौ कृष्णे विहितमनसामा
 रोपितचित्तानां जनानां कंठतटीमधितिष्ठतु। अधिशीङ्स्थासां कर्मेति कंठतटी कर्मत्वं। कीदृशं। अधरीकृतो हारो येन उदासिता अतिदूरं निक्षिप्ता
रामासुंदरी येन। कंठतटी माहारः आरोप्यते सोपि जयदेवभणितेन सरसतया दूरीक्रियते इति भावः। अविरामम विरतिर्यथा भवत्येवं इति क्रि
याविशेषणं। यद्वा। अधरीकृतोन्यकृतो हारोयत्र उदासिता उपरिस्थापिता स्थापिता सुरतार्थं राधा रामा यत्र तत्तथा। उभयविशेषणेन राधा ३४
 याविपरीतरता भियोगोभवितेति सूचितं॥ अधुनासखीराधांप्रति कृष्णस्यातिस्नेहमाह। सामामित्यादि॥ हेसखि तव प्रियः पतिर्माधवो नि
कुंजे स्थिरतमः कुंजे निबिडांधकारवति एवमेवं कुर्वन्नास्ते। इति सामान्यतो योजना। विशेषेणाह। तं पश्यतीति निरीक्षते। दूरतएव निभाल
यतीत्यर्थः। वेपते कंपते। पुलकयति। पुलकं रोमांचं करोति। आनंदति हृष्यति। खिद्यति स्वेदाविलो भवति। प्रत्युद्गच्छति आगतेति कृत्वा प्र

विपरीत४

दमनं करोति। मूर्छति मोहमाप्नोति। कीदृशः सन्। इत्यनेन प्रकारेण चिंताकुलश्चिंतया व्याकुलः॥ तत्स्वरूपमाह। सामामिति। हे सखि राधिका वयस्ये सारा
धामामिमं तादृशां इदृशः। इक्ष्यति ईक्षते। स्मरकथां कामसंबंधिनीं कथां वक्ष्यति कथयिष्यति। प्रत्यंगं प्रतिशरीरावयवं आलिंगनैः प्रीणयिष्यति। स
मागत्य संकेते नूपुरं स्यते क्रीडयिष्यति। इक्ष्यति दृशिर् प्रेक्षणे लृट् दृश् ज दृशो र्मल्यमकितिइत्यमागमः। वक्ष्यतीति वच परिभाषणे लृट् प्रत्ययः। प्रत्यंग
मित्यंगं अंगं प्रतीति वीप्सायामव्ययीभावः। अंगशब्दोऽत्र लक्षणया अंगावयवे वर्त्तते। रंस्यत इति रम क्रीडायां लृट्। यद्यपि सखीति सामान्यतोऽस्ति तथा
पि प्रकरणाद्राधाया एव सखी गृह्यते। कचिद्दूरं पश्यतीति भावः। पुलकमाचरतीत्यर्थे क्विप् पुलकयतीति साधुः। स्विद्यतीति। ञिष्विदा गात्रप्रक्षरणे ल
ट्प्रत्ययः। द्वयोरलंकारः स्वेदादयोपि कामवशाद्भवंति। स्वेदस्तंभोथ रोमांचो वैवर्ण्यं मथ वेपथुरितिति भरतः॥ इदानीमभिसारयोग्यं ध्वांतं वर्णयन्नाह।
अक्ष्णोरित्यादि। हे सखि ध्वांतमंधकारं सुदृशां नायिकानां प्रत्यंगं प्रत्यवयवमालिंगति। कीदृशं। अक्ष्णोर्नेत्रयो रंजनं कज्जलं निक्षिपत् विन्यस्यत्॥
श्रवणयोः कर्णयोः तापिंछगुच्छावलिं तमालस्तवकविततिं निक्षिपत्। मूर्ध्नि मस्तके श्यामसरोजदाम नीलोत्पलमालां विक्षिपत्। कुचयोः स्तनयोः .. क
कस्तूरिकापत्रकं मृगमदपत्रावलीं निक्षिपदिति सर्वार्थे आकांक्षावशात्। सुदृशां कीदृशानां धूर्त्तानां परवंचकानां विश्रब्धं सर्वत्र निकुंजे अभिसारसत्वरहृ
दां अभिसारे सत्वरं हृत् यासां कीदृशं ध्वांतं। नीलनिचोलवत् श्यामवस्त्रवत् चारु मनोहरी। स्याद्गुच्छस्तबके स्तंभे हारभेदे कपोलयोरिति विश्वः। धूर्त्तस्या
द्वंचके लोले शठधूसरयोरपीति। अंजनादिकमभिसारिकाणामपीति दर्शितं। अभिसारिकालक्षणमुक्तं॥ काश्मीरेत्यादि॥ एतस्मिन्नेकत्र तासां
प्रेमतत्प्रेम तदेव हेमसुवर्णं तस्य निकषोपलतां कषपाषाणतां तनोति विस्तारयति। कीदृशमेतत्। तमालदलवत् तापिच्छपत्रवत् नीलतममतिश्या
मं। अतिशायने तमप्। अभिसारिकाणां रुचिमंजरीभिः दीप्तिप्रकरैः आरब्धा कृता रेखा यत्र। अभितः सर्वत्र। कीदृशीनां काश्मीरगौरवपुषां कुंकुमतुल्य
पीतशरीराणां कुंकुमवत् गौरशरीराणां वा। अतिगौरनागरीणां पार्श्वे तमोलेखा सुवर्णनिकष इवोल्लेखितमिति भावः। हारावलीत्यादि। अथानंतरं व्रीडाव
ती सलज्जा सखी राधा प्रियं सखीपुनरिदमुवाच॥ निकुंजनिलयस्य लतागृहस्य द्वारे हरिं निरीक्ष्य दृष्ट्वा व्रीडावतीमित्यर्थः। कीदृशस्य निलयस्य हारावली
हारलतिका तरलकांचनकांची च चलत्सुवर्णकटिक्षुद्रघंटिका तस्या दामगुच्छो मंजीरो नूपुरः कंकणं च तेषां मणयस्तेषां द्युतिस्तया दीपितस्योज्ज्वलस्य। त
राधा माठगमस्मिन्निकुंजाभ्यंतरे स्थिता कृष्ण स्फुरस्थित ... दृश। दर्शिते राधाया हारावलीमादिविशेषणेन दर्शनयोग्यता द्योत्यते ॥

35 देवगीते नाह। मंजुतरेत्यादि। गीतस्यास्य वराडीरागेण निःसारुकतालः। गीतार्थस्तु। हे राधे माधवसमीपं प्रविश इहरुछा नेकिलसविलासं कुरु। कीदृशि॥
हे रतेः शृंगारस्य रभसः आवेगस्तेन हसितं वदनं यस्यास्तादृशि हे। इह कीदृशे। मंजुतरः सुंदरतरः कुंजतरः प्रकृष्टकुंजस्तत्र केलिः क्रीडा तस्याः सदनं गृह
मिव तत्र। कुंजतर इति तरप्रत्ययात्कुंजस्योत्कर्ष उपदर्शितः। प्रतिपदमाद्यविशेषणमिहेत्यस्यापरं राधायाः। नवेत्यादि॥ तरलं चंचलं तद्दलावरतितर
लं तस्मात्तं पदं। नूतनेन तरलत्वेन कल्पभवत् अशोकदलेन तेन शयनं शय्या तदेवस्मारोधनं यत्र तादृशे॥ कुचकलशयोस्तरलो हारो यस्या इति राधावि
शेषणी। कुसुमचयेन पुष्पसमूहेन रचितं रुतं शुचिवासगेहं विशुद्धवासमंदिरं यत्र। केलिसदने क्रीडावासगृहे इति पदयोस्तु पौनरुक्त्यं त्वरादिनात्तस्या
दोषात्। कुसुममिव सुकुमारः कोमलो देहो यस्याः इति राधाविशेषणं। चलेत्यादि॥ चलश्चंचलो मलयजः पवनो दक्षिणानिलस्तेन सुगंधिशीतले मत्याव
लितासंबद्धा ललिता मनोज्ञा गीतिर्यस्या इति राधाविशेषणी। रसवलितललितगीते क्वचित्पाठः। तत्पक्षे रसेन संबद्धा ललिता सुंदरी गीतिः प्रचारो यस्याः
गीतिः प्रचारे सद्भावे लोहकिट्टाव क्रूदयोरिति विश्वः। विततेति। विततं बहुलतानूतनकिसलयशयनं यत्र। पीनो मांसलो जघनो यस्याः तादृशि हे।
क्वचित्तु विस्मति पीनजघने इति पाठः सुभग एव॥ मधुमुदितेत्यादि॥ पुष्परसहृष्टभ्रमरसमूहविहितरागे मदनरसेन योरभसः आवेगस्तस्य भावो भि
प्रायो यस्यामिति राधाविशेषणं। मधुतरलेत्यादि। मधुना पुष्परसेन तरलश्चंचलः पिकनिकरः कोकिलसमूहस्तस्य निनदेन शब्देन मुखरे शब्दायिते
क्वचित्तु मधुरतर पिकनिकरेत्यादि पाठस्तत्पक्षे मधुरतरा ये पिकनिकरास्तेषां निनादैस्तैर्मुखर इत्यर्थः। दशनरुचिर्दंतदीप्तिः सैव रुचिरं शिखरं यस्यास्ता ३५
दृशि हे। पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुरिति शाश्वतः। विहितेत्यादि। हे मुरारे कुशलमंगशतानि कुरु विधेहि। जयदेवकविराजे भणति सति॥
कीदृशे। विहितः कृतः पद्मावत्याः निजपत्न्याः सुखस्य समाजः समाविध्यं येन तस्मिन्। क्वचित्तु प्रविश राधे माधवसमीपमिह भणति जयदेवकविरा
जे इति पाठः स तु सुबोध एव। अयं च पाकेरीतिनिर्वाहकतया मनोहरः॥ तामित्यादि॥ हे राधे अयं कृष्णस्तव सुधासंबाधबिंबाधरं सुधया अमृतेन संबाधो
गहनं स चासौ बिंबतुल्योधरश्चेति समासः। कीदृशः। त्वां चित्तेन मनसा चिरं वहन् धारयन् अतिश्रांतः परिश्रमयुक्तः भृशमत्यर्थं नकंदर्पेण तापितस्त्व
तदेकसुधापानेन पलाशः इति भावः। अस्योपि हँसीस्पर्यादिता पञ्चाबजलादि पातुमिच्छतीति ध्वनिः। तस्मात्तस्य कृष्णस्यांकं क्रोडं क्षणं मुहूर्तमात्रं इह

ताप

यदि त्वमिमं हलीमृत्स्रोपमात्रेण नल्लोकयसि तदा पुनः त्वं तेव ला मालमनि गमन्तों ला ला लीला नुरक्तो भवादिति भावः २

स्थाने अलंकुरुष्व। तत्समीपे यातुं बिभेमीत्याह। इह कुले दासइव भृद्गसदृशे कुतः संभ्रमः कुतो भीतिः। इह की दृशे। भ्रुवो विक्षेपश्चालनं स एव लक्ष्मीः संपादि
स्तया नवकीर्तितेन तत्र कीर्तितो दासो तिभा तोभ वतीतिभावः। ए अतएव पसे वितंपदांभोजं येन तस्मिन्। अह्वामि नवकीर्तिते दासे सर्वेषामादरो भवतीति द
र्शितं नवपदे। क्वचिच्चिरं वहन्निति पाठः। चकारः समुच्चये। संबाधः कण्टे मतः इति हलकोषः। विंबाधरम् इयधरं बिंबमिवेति विग्रहे उपमितं व्याघ्रेत्यादि
नासमासः। धर्मादिषु भयमितिविंबस्य पूर्वनिपातः। संभ्रमः स्फुरवरेलोतोसंगमे आदरेपि चेति विश्वः। लक्ष्मी हरिप्रियासंपत् शोभा वाण्योषधीषु
चेति धरणिः॥ ॥सा ससाध्वसेत्यादि॥ सा राधा निकेशनं गृहं प्रविवेश। सखीवचनादित्यर्थात्। सिंजानमंजुमंजीरं सशब्दमनोहरनूपुरं यथा स्यात्तथा।
ससाध्वसं ससंभ्रमं। सानंदं सस्पृहं यथा स्यात्तथा गोविंदविषये लोललोचना चंचलनयना। सकलकलाकुशलो वनमाली कथं मया अविदग्धया रंजनी
य इति साध्वसो। अनेन विदग्धेन मम मुग्धाया अपि मनोविनोदो भवितेति सानंदत्वमिति भावः। क्वचित्तु ससाध्वससानंद इति गोविंदविशेषणे। तत्र पूर्वा
धा॰ परात् साध्वसं राधाया आगमनात् सानंदत्वमितिभावः। हरिदर्शनं गीतेनाह॥ राधावदनेत्यादि। गीतस्यास्य वराडीरागो रूपकतालः॥ गीतार्थ
स्तु। राधा तं हरिं ददर्श। कीदृशं। एकस्यां राधायां रसो यस्य राधैकानुराग इत्यर्थः। यद्वा। एको ऽद्वितीयः रसः शृंगारो यस्य तं। चिरं बहुकालमभिलषित
कामितो विलासः क्रीडा येन। गुरुहर्षस्य महा[...] प्रमोदस्य वशंवदं आयत्तं वदनं यस्य तथा तं। अनंगकामस्य विकाशो यत्र तं। पुनः कीदृशं। राधा
वदनस्य विलोकनेन विकसितो लसितो विविधो बहुप्रकारो विकारविभंगः कंदर्पपरंपरा यत्र तं जलनिधिमिव समुद्रसदृशमित्यर्थः। कीदृशं जल
निधिं। विधुमंडलस्य चंद्रबिंबस्य दर्शनमालोकस्तेन तरलितश्चंचलीकृतः उपचितस्तरंगः कल्लोलो यत्र तं तथा। उपमालंकारः। कीदृशं हरिं
हारं मुक्ताहारं दधतं धारयंतं। क्व उरसि हृदये। हारं कीदृशं। अमलतर[...]तारं। अत्यंतविशुद्ध बृहत्तरं। पुनः कीदृशं। परिलंबनशीलो विहूरो ति
शयितभारो यस्य तं महालंबमित्यर्थः। यमुनाजलपूरमिव कालिंदीपानीयप्रवाह इव तत्तुल्यमित्यर्थः। स्फुटतरः प्रथकः फेनकदंबस्तेन करंबि
तं मिश्रितं मिलितं। यद्यनुकूलपूर्वविशेषणं। यद्यपि यमुनापूरमित्येतावतैव जलप्रासोऽजलपदं व्यर्थं। तथापि जलपदमत्यंतसादृश्यप्रतिपा

36 ः दनार्थं स्फुटार्थमिति केचित्तदुक्तं वैः फलेपि भारः स्यादिति विश्वः। दधतमित्यत्र नाभ्यस्ताच्छतुरिति नुमो निषेधः। मिश्रणं तु करंबितमिति धरणिः॥ स्फुरः प्रवा
हे विख्यातः स्फुरणे विस्फुरणेपि चेति विश्वः॥ श्यामलेत्यादि। श्यामलं कोमलं मृदुलं कोमलं कलेवरमंडनं शरीरालंकारो यस्य तं॥ अधिगतं परिहितं गौर
दुकूलं पीतपट्टवस्त्रं येन तं। नीलनलिनमिव नीलोत्पलतुल्यमित्यर्थः। कीदृशं नीलनलिनं। पीतपरागाणां कुंकुमरेणूनां पटलं भरः समूहा
तिशयस्तेन वलयितं वेष्टितं मूलं यस्य तत्तथा। धातूनामनेकार्थत्वेनाधिपूर्वगमेरिह परिधानार्थः। तरलेत्यादि। कीदृशं हरिं तरलश्चंचलो
दृगंचलः कटाक्षस्तस्य चलनेन मनोहरं सुंदरं यद्वदनं तेन जनित उत्पादितो रतौ रागोऽभिलाषोऽर्थान्नारीणां येन नारीणामति कामकरमित्यर्थः॥
किमिव शारदि शरत्काले तडागमिव। कीदृशं तडागं। स्फुटकमलस्यापि कुस्मितपद्मस्योदरे मध्ये खेलितं क्रीडितं खंजनयोर्युग्मं युगलं यत्र तत्तथा।
शरत्काले खंजनदर्शनमुचितमेव। पद्मेपि खंजनं मिलत्येव। तदुक्तं। अब्जेषु गोषु गजवाजिमहोरगेषु राज्यप्रदः कुशलदः शुचिशाद्वलेषु इति॥ व
दनेत्यादि। हरिं कीदृशं। वदनकमलस्य परिशीलनमामिलिते मिहिरसमे सूर्यतुल्ये ये कुंडले ताभ्यां शोभा यस्य तं तथा। स्मितरुचिरुचिरो हास्यदी
प्तिसुभगः समुज्ज्वलितो देदीप्यमानो योऽधरपल्लवस्तेन कृतो लोभो युवतीनां रताभिलाषो येन तं तथा। सापेक्षत्वेपि इति लोभमित्यत्र गमकत्वा
त्समासः॥ शसशीत्यादि॥ ॥ कीदृशं हरिं शशिकिरणेन चंद्रदीध्या च्छुरितं मिलितमुदरमभ्यंतरं यस्य जलधरस्य तद्वत्सुंदराः सकुसुमाः केशा
यस्य तं तथा। तिमिरे अंधकारे उदित उच्छ्रितो यो विधुमंडलश्चंद्रबिंबं तद्वन्निर्मलं मलयजतिलकं चंदनबिंदुस्तस्य निवेशोऽवस्थानं यत्र तं तथा। ३६
शृंगारिणां नागराणां तिलकं वर्तुलमेवेति चंद्रेण साम्यं। विपुलेत्यादि। कीदृशं। विपुलोऽधिकः पुलकभरो रोमांचातिशयस्तेन दंतुरितं निम्नो
च्छ्रितमित्यर्थः। रतिकेलिकलाभिः सुरतक्रीडाकथाभिरधीरं चंचलं मरकतमणिगणानां किरणसमूहेन समुज्ज्वलं देदीप्यमानं यद्भूषणं तेन सुभ
गं सुंदरं शरीरं यस्य तं तथा। श्रीजयदेवेत्यादि॥ श्रीजयदेवस्य भणितविभवेन भावितप्रपंचेन द्विगुणीकृतो भूषणस्यालंकारस्य भारो
यस्य तं हरिं हृदि विनिधाय मनसि कृत्वा सुचिरमतिकालं हे जनाः प्रणमत। सुकृतस्य पुण्यस्योदय उपचयस्तस्य सारः स्थिरांशो यस्य तं

ते सम्महे देवके पिबेतिध राः ।। १०

इदानीमेव स्वच्छनादिकमेतदेलन्नदुर्गमनादानीं सावधानतास्या परिजनः परि गतमिति ः २

तथा । सारो बलेस्थिरांशे चन्याय्ये नीरे धने च विवेति विश्वः । अलंकारवत्या जयदेवकवितया साहित्ये नालंकारस्य हेतुरेवं भवत्येवेति भावः अतिक्रम्येत्या

दि ॥ कविवचनमिदं राधायाहर्षाश्रुनिकरः सात्त्विकभावेनं नेत्राम्बुपूरः प्रयातः । तदानीं प्रियतमस्य वल्लभस्य समालोककाले अस्याः नेत्राम्बुप्रसरोघर्मो

घर्मजलप्रवाहसदृशः । कीदृशयोः तरलतरतारं चंचला हि कनीनिकं यथास्यादेवं पतितयोः । कथमपांगे नेत्रान्ते दृशोः अतिक्रम्य श्रवणान्तपर्यंतं ग

मनप्रयासेनेव कर्णाबर्तगमनायासेनेव वाद्वशहृतलेल्लायां । अन्यो पि श्रमीपतनीतिध्वनिः अधुनापुनरपि कविराह । भञ्जंत्या इत्यादि । मृगदृशो

हरिणनयनाया राधाया लज्जापि सलज्जा लज्जावती सती दूरं स्वगमदिव गतेव । कीदृश्याः । अवहिताली परिजने सावधानसर्गे गेहाद्बहिर्याते सति खोवध

पिध कृतकपटकंडूतिर्हितस्मिते विहितकर्णकंडूति छादितहास्ये तल्पान्तं शय्यान्तं भजंत्याः । तल्पं शय्याट्टदारेष्वित्यमरः । अंतशब्दः स्वरूपवचनः । अंतः स्व

रूपे पर्यंते विनाशे विनिगद्यते इति धरणिः । किंतु आलीपरिजनश्चेत्यालीपरिजनः इति योजयंति । आलीडी वेतः । निवार्यतामालि किमप्ययं वटुरिति

वत्त्वापुनः कीदृश्याः । प्रियास्यैव स्मरसुखं पश्यंत्याः स्मरस्य रमास्तेषां समाकूतो भिप्रायस्तेन सुभगमतिमनोहरं क्रियाविशेषणमिदं वा ॥ इदानीं सर्गांति

मंगलार्थं हरिभुजदंडस्तोति ॥ जयश्रीरित्यादि । मुरजितः कृष्णस्य भुजदंडो दंडाकारो बाहुर्जयति उत्कर्षेण वर्तते । कीदृशः । प्रकीर्णा स्रग्विंदुर्विस्तीर्णरुधिर

बिंदुः स एव स्वयं सिंदूरेण मुद्रित इव चिह्नित इव अकृत इत्यत आह । द्विपरणमुद्राकुवलयापीडेन योरणः संग्रामस्तत्र जातो हर्षस्तया तत्र मदो यो बाहुरत्यंतं यु

द्धविशारद इति कृत्वा सिंदूरीकृत इत्याशयः ॥ मंदारकुसुमैः यापि जात पुष्पैः महितइवपूजित इव । कीदृशः । जयश्रिया जयलक्ष्म्या विन्यस्तैर्दत्तैः कृतसमरस्या

परि पुष्पवृष्टिरिव चिता । यत एव मुरजितः । कीदृशस्य कुवलयापीडस्य । बाहुदंडस्य कंडूया विलासेन हतः कुवलयापीडनामा हस्ती येन तस्य तथा ॥ महितइति

महः पूजा यांको मुद्रित इति । मुद्रा चिह्नं सा संजाता यस्येत्यर्थे तदस्य संजातं तारकादिभ्य इतिइतच् प्रत्ययः । रुधिरे स्त्रलोहितास्वरक्क्षतजशोणितमित्यमरः

॥ इति श्रीजगद्धरविरचितायां गी मुरमसुरविशेषं जितवानसुरजिदिति सत्स्वद्विषेति क्विप् राधागमनसमये सानंदः सहर्षो गोविंदः कृतस्तत्र सतथा ॥

एकादशः सर्गः गतवतीत्यादि ॥ सखी हंदे राधा चयस्या कदंबे गतवति सति सहरिः कृष्णो राधामुवाच ॥ अथ वक्ष्यमाणमिति शेषः । कीदृशीं मंदस्तुच्छोय

स्त्रपाभरो लज्जातिशयस्तेन निर्भरस्मरोतिमोदकामस्तत्परं वशमायत्तो यस्य आकूतो भिप्रायस्तेन स्पृतं संबद्धं स्मितमीषद्धास्यं तेन स्नपिता व्याप्तो धरो यस्यास्तां ।

कश्चित्तु स्मितश्वसिताधरामित्तिपाठः॥ तत्र स्मितेन श्वसितो वृद्धो अधरो यस्यास्तां। कर्त्तरिक्तः। पुनः कीदृशीं। सरसं सानुरागं अलसं कामाविर्भावान्मंथरं कांतं
कलिहस्या मुहुर्मुहुः पुनः पुनः नवपल्लवप्रसवैः अभिनवकिसलयपुष्पैरेव यद्वचयनं शय्या तत्र विक्षिप्ते प्रसारिते क्लिणीययातां तथा। केचित्तु सरसमनसमि
तिपाठः। तत्र सरसं रससहितं मनो यस्या इति राधाविशेषणमेव। कांतं दृष्ट्वेत्येव योज्यं। तत्पक्षे क्लिश्यातामिति वक्तुं श्रीहोसक्यप्यस्तोः स्वांगाद्युक्त्वा। अस्मिन्सर्गे
स्वाधीनभर्तृकानायिका वर्णनीया। तल्लक्षणं च नायिकालक्षणे। यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुंचति। विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृकेति।
तदेव गीतेनाह। किसलयेत्यादि। गीतस्यास्य विभास रागः एकताली तालः॥ रागलक्षणं तु। स्वच्छंदसम्मानितपुष्पचापः प्रियारसस्वादु सुधामितः प्रापः
* यूं मध्यमस्य कृतापवेशो भासः सुनिद्राद्विहेम गौर इति। गीतार्थस्तु। हे राधे अधुना कृतसंभुक्तेन अनुगतमायत्तं नारायणमनुसर हे कामिनि किसलयशय
नतले पल्लववत्कृतशय्यातले वरणनलिनस्य पादपद्मस्य विनिवेशमर्पणं कुरु॥ नदिदं किसलयशयनं कर्तृ तव पदपल्लव एव वैरी तस्य पराभवतिरस्कारस्य
मनुभवतु॥ पल्लवस्य पल्लवांतरं वैरी भवति। यथा राज्ञो राजांतरं अतः पराभवउचित एवेति भावः। यद्वा। भवत्याश्चरणपल्लवस्य कोतिहरणात् पल्लवो वैरी तत
स्तत्पराभव उचित एवेति भावः। यद्वा। पदः पादस्य लवो लेशोपि यत्रेति व्युत्पत्त्या पल्लवो वैरी पदस्य भवति। अतस्तत्पराभवउचितएवेतिभावः॥ इदं कीदृशी। सु
वेषमपि मनोहरमपि अत्राध्याहर्तव्यः। क्रियाविशेषणमेवेदं। नलं स्वरूपवार्स्योः खड्गमुष्टिचपेटयोरिति विश्वः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति विष्णुपुराणे। सुवेषमिति नारायणविशेषणं वा॥ हे राधे त्वं विहृत्य आगतासि। अतस्तव चरणमहं मात्मनैव
करकमलेन हस्तपद्मेन करोमि संवाहयामि। इह धातूनामनेकार्थत्वात्करोतिः संवाहनार्थः। विहृत्य गमनेन व्यथा जायते। अतः पदसंवाहनमिति भावः। क
श्चित्तु करोतिः पूजायामिति वदति। अत्रापि क्षणेशयनोपरि शय्यायामामि त्वानुगतिस्तत्रं अनुगमसमर्थं नूपुरमुपकुरु। सुरतमनास्त्वा शय्या त
लमलंकुरुष्वेति भावः। हे राधे वचनं रचयस्वेत्यर्थः। अनुकूलं प्रियममृतमिव। कीदृशममृतं। तववदनमेव सुधानिधिः चंद्रमास्तस्मात् गलितं पतितं
गलितं उरसि दुकूलं पट वस्त्रमपनयामि स्फेटयामि। कीदृशं। विरहमिव वियोगसममित्यर्थः। पुनः कीदृशं पयोधरयोः कुचयोः रोधकमाच्छादकं। अन

37

एवापनयामि॥ वियोगेपि कांतापयोधरस्परोधको भवतीतिभावः। यद्वा। पयोधरो मेघो रोधको विरोधीयस्य विरहस्यतं हेराधे मदुरसि कुचकलश
विनिवेशय। अतिदुःखेनावाप्यत इत्यतिदुरापं दुर्लभमित्यर्थः। कीदृशं प्रियस्य मम परिरंभणेनालिंगनेनयोरभसआनंदस्तेन वलितं संबद्धं अतएव
पुलकितमिव संजातरोमांचं इत्युत्प्रेक्षा। अनेन कर्मणा मनसिजतापं कामपीडां शोषयखंडय। सजलकलशेन शीतलतया तापापनोदो युज्यत
एवेतिभावः। दुराप इतिदिघदुःसुषुक छ्राकृच्छ्रार्थेषु खल इति खल्॥ हे भामिनि कामकलाकुशले अधरसुधारसमोष्ठामृतरसमुपनय देहि। अतः
सुधादानेन मां दासं मृतमिव जीवय। अमृतेन मृतजीवनमुचितमेवेतिभावः। कीदृशं। त्वयि त्वद्विषये विनिहितं दत्तं मनो येन तं। त्वदेकचित्तमि
त्यर्थः। विरहानले न वियोगवह्निना दग्धं वपुर्यस्य तं। अविलासं विलासरहितं। दासः शौंडे दानपात्रे भृत्यधीवरयोरपीति विश्वः। उद्दे ज्वलेत पा विरहा
नलयोः साम्यं। हे शशिमुखि चंद्रवदने मणिमय रसनागुणं कांचीदाममुखरय। सशब्दं कारय। कीदृशं। अनुसदृशो गुणः कंगनिनादो यस्य तं।
गीतसदृशनादमित्यर्थः। यद्वा। कंगनिनादं कंवशा ह्यमनुगुणमनुगुणमनुसर। अभ्यसेति यावत्॥ एचोविकल्यपक्षे अनुगुणेति साधुः। य
द्वा अनुगुणस्य योग्यस्य स्वरस्य निनादृश इवानुरणरूपो यत्र। स्वरेकंगः चकोन्नित इतिरत्नकोषः। मम श्रुतियुगले कर्णयुग्मे चिरात्चिरकालेन
योवसादः स्तं शमय शांतं कुरु। अवसादकारणमाह॥ पिकरुतिभिः कोकिलशब्दैर्विकले दुःखिते रसनाशब्देन मंदशद्ववतोः कर्णयोरुपशां
तिं जनयेत्यर्थः। मुखरं करोतीति णिचि मुखरयेति साधुः। हे राधे तवेदं नेत्रं कर्तृ मामवलोकितुं द्रष्टुमधुनेदानीं लज्जितमिवजातत्रपमिवामी
लतिपिधत्ते। कीदृशं मां। अतिविफलरुषा निःफलकोपेन विकलीकृतं दुःखितं अतएव प्रसन्नीभूतेतात्वं नयननिमीलनं मा मा विरक्ता भव।
रतिखेदं रमणदैन्यं विसृज त्यज। विरमेति व्याङ्‌परिभ्योरमः इति परस्मैपदं। श्रीजयदेवकवेरिदं कर्तृ रसिकजनेषु चतुरजनेषु मनोरमो म
नःप्रीतिकारको रतिरसभावेन रमणरसाभिप्रायेण विनोदं हर्षं जनयतु करोतु॥ कीदृशमनुपदं पदेपदे निगदितं उक्तं मधुरिपोः कृष्णस्य मो
दो हर्षो यत्र गीतेतत्तथा॥ प्रत्यूह इत्यादि। तयो राधामाधवयोः सरसितारंभो विलासो पक्रमः प्रियं भावुकः प्रियभवनशीलो बभूव जातः॥

यस्मिन्नरमितारंभे निबिडाश्लेषगाढालिंगने पुलकांकुरेण रोमोद्गमेन प्रत्यूहोंतरायः कृतो निमेषेणाक्षिपक्ष्मचलनेन वक्रोडाकृतेन हर्ष
लाभेन विलासाभिप्रायेण मद्विलोकितं तत्र प्रत्यूहो जातः। अधरसुधापाने ओष्ठामृतपीते। कथा नर्मभिः कथाकेलिभिः कथामुखैर्वा प्रत्यूहः
जातः॥ आनंदाभिगमेन हर्षलाभेन मन्मथकलाम्बुद्धे कामचतुःषष्टिकलान्वितसुरतसंग्रामे प्रत्यूहउद्भूतः। तदनेन द्वयोरतिस्नेहो दर्शितः
। विघ्नोंतरायः प्रत्यूहः इत्यमरः। प्रीयं शीलं यस्येति वा भुवः स्विष्णु रुखुकञो कर्तरि तिरवुक्रञ्च स्विवान्नुमागमः॥ दोर्भ्यामित्यादि॥ कां[..]तो वल्लभः
कामस्य निर्वच[..]नीयां दृप्तिं महातुष्टिं लेभे॥ सकीदृशः। दोर्भ्यां बाहुभ्यां संयमितो बद्धः। पयोधरेण पीडितः पाणिजैर्नखैरुत्कीर्णः ख्याविद्धः। खं
डित [..]नितयावत्। दशनैर्दंतैः क्षताधरपुटं यस्य स तथा॥ श्रोणितटेन कटिप्रदेशेनाहतस्ताडितः। हस्तेन कचे केशे अवनामितः कैतः॥ अधरसुधास्या
ऽ घामृतस्य स्यंदनेन क्षरणेन संमोहितस्तस्मादेवं भूतो पितृप्तिं आप। अहो आश्चर्यं। कामस्य वामा अदक्षिणगमा अदक्षिणागति दृशान्त
रे रतिविषये पि यत्तृप्तिप्राप्तिः तद्विपरीतमेव वामता अतएवाश्चर्यमपि भुजबंधनादिना तृप्तिलाभ इति भावः। अर्थांतरन्यासोयं ज्ञेयः। सोर्थांतरन्या
सो वस्तु निर्दिश्य किंचन। तत्साधनसमर्थस्य वचनइति दंडी॥ मारांकमित्यादि॥ राधया कांतया वल्लभया जयार्थं संभ्रमात् त्वरातो यत्कि
चिदुपरि प्रारंभि प्रा[..]रब्धा साहसप्रायं साहसबहुलं यथा भवत्येवं। कुत्र रतिकेलिः कामक्रीडा तया संकुलो यो रणः संग्रामस्तस्यारंभे उपक्रमे ३८
कीदृशे। मारस्य कामस्यांकं चिह्नं यत्र तस्मिन्नुद्बुद्धपक्षे। मारो मारणांतस्यांको यत्रेति योज्यं। तदेवाह॥ जघनस्थली नितंबो जघनमेव स्थली उन्नत
त्वादिना साचलनवस्पंद्येत्यर्थः। दोर्वल्लि बीजूलता शिथिलिता शैथिल्यं प्राप्ता वक्षउरस्थलं उत्कंपितं। अक्षि निमीलितं मुद्रितं। अन्यथा कुतः स्त्री
णां पौरुषरसः पौरुषेण रसो नुरागः सिध्यति। पुरुषेण हि समरेव [..]ःकंपादिकमुत्पाद्यते। स्त्रिया तु साहसमंतरेण न तादृशं पौरुषमाप्यत इति भावः
मारस्तु मारणे कामइति विश्वः। जयायेति तादर्थ्ये चातुर्थी॥ तस्या इत्यादि॥ एभिः कामशरैः पत्युः स्वामिनो मनश्चित्तं कीलितं विद्धं यत्तदद्भुतमाश्च
र्यमभूत्। कैः कामशरैस्तस्या राधायाः पाटलः श्वेतरक्तः पाणिजो नखस्तेनांकितं चिह्नितं उरो वक्षः। दशनेन यनेनिद्राकषायिते निद्रालोहिते। अ

गीतटी०
१

धरशोणिमा ओष्ठलौहित्यं निर्धौतः प्रक्षालितः। मूर्द्धजाः केशा विलुलिता इतस्ततो निक्षिप्ताः अत एव स्रस्तस्रजो गतमाल्याः। कांचीदाम मेखलागुणो दरमीषत् श्ल
थं शिथिलं चलं यस्य तत्तथा। इति प्रकारेण राधायाः पत्युर्दृशोः प्रातःकाले निखातैर्नखक्षतजागरणचुंबनकेशाकर्षणनीवीमोचनानि पंचशरत्वेन रू ग
पितानि नयननिखातशरैर्मनः कीलनमद्भुतमेवेति भावः। श्वेतरक्तस्तु पाटलइत्यमरः। कषायो रसभेदः स्याद्विर्यासो लोहितेन्य वृदिति विश्वः। शोणः को
कनदच्छविरित्यमरः॥ शोणितशब्दादिमन्निचूप्रत्ययः। ईषदर्थेर्धदरे षाव्ययमित्यमरः॥ अग्रे देशे पृथं चलमिति च। कीलितमिति कीलप्रतिष्टंभे। प्रातःका
धा लेराधायाः सुरतविमर्दनावेन चेष्टानुभावेन माधवमनः कीलितमभूदिति भावः। त्वामित्यादि। हरिर्नारायणो वो युष्मान् अवतु रक्षतु इति शेषः। तज्ज
नानूकविराशिषयति। कीदृशो हरिः। राधायाः स्तनकोरकोपरि स्तनौ कुचौ कोमलतादिना गुणेन कोरकाविव तयोरुपरि वलती संबद्धे लोचने यस्य स तत
था॥ वामांचले हृदयवामभाग लक्ष्मीचलं विक्षिप्य दूरीकृत्या कीदृश्याः इत्थमनेन प्रकारेण पूर्वकथाभिरत्र्यं येन मनसः कथादच्चाचि ता याइत्यर्थः [illegible] त्यामित्या
दि॥ हे सुंदरि त्वामप्राप्य मृडानीपतिः शिवः क्षीरोदतीरोदरे सागरतीरमध्ये कालकूटं विषमपि वदति इति शंके॥ उत्प्रेक्षते। अत एव मृदोद्गारहु वलः
त्वां कीदृशीं। मयि मदियये सर्वपरीमदेकपतिकामित्यर्थः। मृडानी गौरी तस्याः पतिः। अनेन गौरीपतित्वेपि तव लाभाद्विषमपि बदिते गौर्या अपि त्वं स
गुणोतिभावः॥ यात्रोलइति॥ इयं राधा तदपि हेतोर्धुनोति लज्जते॥ कीदृशी॥ आत्मरूपं निजस्वरूपं पश्यंती। पुनः कीदृशी। विलुलिता इतस्ततः प्रा
प्ता या स्रक् माल्या तां धरतीति विलुलितस्रग्धरा॥ [illegible] कृत्वा। स्तनजघनयोः पद्माभोगे पाणिना हस्तेन स घस्तव स्नेण वा छादयति रोधा
य। नदपि कुतः केशपाशः। प्रशस्तकेशो व्याख्यो लभ्यं चलोभूतः अलवैरर्णकुंतलैस्खलितं स्थानाञ्चलितं। यद्वा तरलितं हसितं यथास्यात्तथा कपो
लौ धर्मंडलेन चंचलीभूतां अधरश्रीरोष्ठलक्ष्मीः। सपष्टप्रव्यक्ता दष्टा दंतखंडिता। हारयष्टिर्मुक्ताकलापः कुचकलशस्य चास्मनघटदीस्याहा
रिता दूरीकृता कांचीक्षुद्रघंटिका कांचिदाशां दिशं गता चलिता। यस्मादिति सर्वत्र योज्यं। तस्मादित्यभिधानाच्च। यत्तदोर्नित्याभिसंबंधात् स्वाधरे
त्यभिसैधानात रक्षंदोपिसहचितं। अत्रचिनोतिर्लज्जनार्थः। ईषदित्यादि॥ कुरंगीदृशो हरिणनयनाया आननं मुखं धन्यो भाग्यवान् जनो धयति
पिबति कीदृश्याः हर्षस्योत्कर्ष आधिक्यं तेन विमुक्ता परित्यक्ता अत एव निःसहा कर्याक्षमा तनुः शरीरं यस्याः। आननं कीदृशं। ईषन्मीलिते

39 नेत्रं मनाङ्मुकुलितनयने मुग्धं मंदं हसितं हास्यं यत्र तत्तथा। पुनः कादृशं। सीत्कारस्य काम्यविलासविशेषस्य धारापरंपरा तद्वशात्तरम्यत
तालोव्यक्तो अकुलातया केलिः क्रीडा तया काकुः शोकादिध्वनिस्तेन विकसंतौ दीप्यमानायेदंतादृशनास्ते यो अभ्रुभिः किरणैः धौतः प्रक्षा
लितोऽधरो यत्र तत्तथा। हेतुमाह। श्वासेत्यादि। श्वासेन निःश्वासपवनेन उत्तं... किंचिच्चलं ... चितौ यौ पयोधरौ तयोः उपरि ऊर्ध्वभागस्य परिधि
गादे श्लेषात्तन कलशमापीड्य आलिंग्य धरोधरं पिबतीति भावः। काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः। भिन्नकंठध्वनिर्धीरैः काकुरि
त्यभिधीयत इति विश्वः। अथेत्यादि। अथानंतरं कांतं प्रियं राधा निजगाद। कीदृशं। रतेन सुरतेन क्लांतं परिश्रांतमपि। किमर्थं जगादेत्यत आह। मंडन
वांछया प्रियकर्तृकालंकरणवांछयेत्यर्थः। राधा कीदृशी। निर्गत आबाधो लंकरणं यस्याः। आबाधो लंकृतिर्बाधा पीडा बाधनमुच्यत इति विश्वः। यद्वा। नि
र्गता आसमंताद्भावेन बाधा कामपीडा यस्याः सा तथा। पुनः कीदृशी। स्वाधीनभर्तृका। सुरतेन अधीनः आयत्तो भर्ता प्रियो यस्याः सा तथा। क्षणं कराहते नै
व क्षणं चरणपातिनां कंदुकेनेव कांतेन क्रीडेत्स्वाधीनभर्तृकेत्यतिमरतः। तदेव गीतेनाह। कुरु यदुनंदनेत्यादि। गीतस्यास्य रामकरी रागो रूपकतालः
रागलक्षणं तु। स्वर्णप्रभाभास्वरभूषणा च नीलं निचोलं वपुषा वहंती। कांते पदोपांतमधिश्रितेपि मानोन्नता रामकरी प्रणीता। गीतार्थस्तु। हे यदुनं
दन सा राधा निजगाद। यदुनंदने कुंजे विहरति सति। कीदृशे हृदयानंदनो चित्तहर्षके। किं जगादेत्यत आह। हे यदुनंदन कुरु मम अत्र पयोधरे स्वेन करे
ण हस्तेन मृगमदस्य कस्तूरिकायाः पत्रकं पत्रावलीं कुरु। करेण कीदृशेन। चंदनवच्छिशिरतरेणातिशीतलेन। कीदृशे पयोधरे। मनोभवस्य कंदर्पस्य मं ३९
गलीयकलशः पूर्णकुंभस्तस्य सहोदरे तुल्ये। अत्र मंगलकलशत्वेन रससवर्णताध्वनिता। यद्वा। मंगलं हिरण्यं हिरण्मयं तस्य कलशः। मंगलो भूमिपुत्रे स्या
न्मंगलं हेममहाटकमिति विश्वः। केचित्तु चंदनशिशिरतरेणेत्यादि चंदनेन शिशिरतरेणेति वदंति। मृगनाभिर्मृगमदो गंधशेखरमित्यपीति हारावली।
अलिकुलेत्यादि। हे प्रिय कुरु लोचने नेत्रे अर्थान्ममत्वदधरचुंबनेन लंबितमधः स्रस्तं च तत्कज्जलं चेति विशेषणसमासः। तत्कज्जलमुज्ज्वलय पुनर्देहि। तद्दीपय
कचित्तु लंबितमिति पाठस्तत्र त्वदधरचुंबनेन लंबितं यत्कज्जलं तदुज्ज्वलय दीपय। कीदृशं कज्जलं। अलिकुलस्य भ्रमरसमूहस्य गंजनमभिभवं। गंजयतीति
गंजनं। भ्रमरसमूहाभिभावकमित्यर्थः। लोचने कीदृशे। रतिनायकस्य कामस्य सायकमोचने इव बाणपतने इव। यद्वा। रतिनायकसायकस्य मोचनं क्षेपो मु

[illegible]

गमन९

यस्मात्तत्तथा। मन्मथनकरा ह्रस्वत्वं चिकामासाद्य कामोवाणान् मुंचतीतिभावः। केचित्तु अलिकुलमंजनखंजनमितिपाठस्तत्र अलिकु
लेगंजयतीतिगंजनस्तच्च तत्खंजनकः खंजरीटश्चेतिसमासः। ततः कर्मलेन महद्रूपकं। केचित्तु अलिकुलगंजनमितिपाठः। तत्र हेअ
य अलिकुलगंजनमंजनं लोचने नेत्रे उज्ज्वलयसज्जीकुरु। अंज्यते तेनेति अंजनं। अंजनिइतिख्यातं। लंवितकज्जलेचोज्ज्वलये
त्यत्र चकारोध्याहार्यः। खंजरीटस्तु खंजनइतिहारावली। तच्च ह्रोव्ययः। ।नयनेत्यादि॥ ॥हेसुवेष हेसुचिरवेष। कुरु नयनकु
रंगस्य चस्तुमृगस्यतरंगादिकाशउत्फाल्लगमनं तस्य निराशौ निषेधस्तं करोतीति तच्छेदं श्रुतिमंडलं कर्णमंडलं चेति तत्र कुंडले निवेशय आरोप
य। कीदृशे श्रुतिमंडले। मनसिजस्य कामस्य पाशविलासं धरतइति तस्मिन्। पाशः पशुर्विरोधी भवत्येवेतिभावः॥ धरतइति धरो ह्यत्र धारणोपचाराद्यत्र॥
॥ ॥भ्रमरेत्यादि॥ ॥मम वदने मुखे अलकं परिकर्मय मंडय॥ परिकर्मप्रसाधनं तत्करोतीति णिचि। परिकर्मयेतिसाधुः॥ कीदृशे मुखे। जितकमलं
येन तादृशे॥ विमले शुद्धे। अलकं कीदृशं। नर्मंजनकं क्रीडाकारकं॥ कीदृशमलकं॥ मम सम्मुखे तु परिभ्रमरचयं भृंगहृदं सुचिरमति बहुकालंव्या
प्य रचयंतं कारयंतं। स्वजातीयबुध्या भ्रमरास्तत्र पतंतीतिभावः। निर्मीनो चिरकाललाभाद्गत्यायेवेति॥ तदुक्तौ। यद्वा। उपरिललाटे सम्मुखं भ्रमरचयं
रचयन्नेहे कुलततमलकं परिकर्मप्रसाधय॥ शेषं पूर्ववदेव॥ ।मृगमदेत्यादि॥ ॥हे कमलानन पद्ममुख अलिकरजनीकरे ललाटचंद्रे तिलकं कु
रु॥ कीदृशं तिलकं॥ मृगमदस्य कस्तूरिकायाः रसेन वलितं संबद्धं॥ गंडतिलकमित्यर्थः॥ ललितं मनोज्ञं। यतः कस्तूरीतिलकमतस्व श्यामतया वि
हितकलंकस्यां कस्याः कला षोडशभागो यत्र एतेन द्वितीया चंद्रामिषायंतिलकं कुर्वित्याशयः॥ किंभूते विश्रमिताः श्रांताः श्रमशीकराः प्रस्यामजल
विंदवो यत्र तस्मिन् शीलश्रमजलकंशीकरेण चंद्रापि लांछनच्छविर्दृश्यतइतिभावः॥ अलिकमस्तकस्य रजनीकरे मिथ्याचंद्रेतिलकं कुरु॥ अलिकशब्दो केचित्तु
ह्रस्वमध्योप्यस्तीतिवदंति तन्न। अलिकशब्दस्य मिथ्यावाचिनो मध्यह्रस्वस्यादर्शनात्। कविप्रयोगमंतरेण कल्पनेऽतिप्रसंगात्। ललाटमलिकं गो
धिरित्यमरः॥ ॥घनेत्यादि॥ ॥हे मानद मानखंडक। यद्वा चित्तोन्नतिदायक चिकुरे केशे कुसुमानि कुरु। कीदृशे चिकुरे रुचिरे मनोहरे। मनसिजस्य
कामस्य ध्वजचामरतुल्ये। कीदृशे। रतिगलिते। सुरते विक्षिप्ते ललिते मनोहरे। शिखंडि शिखंडकडामरे। शिखंडी मयूरस्तस्याशिखंडः पुच्छस्ततः स्वार्थे कन्।

तस्य डामरः आभोगो यत्र॥ मानं द्यतीति मानदोऽदः ददातीति वा॥ क्वचित्तु शिखंडिशिखंडकडामरे इति पाठः॥ तत्रा शिखंडि नं विखंडयते त्यर्थे कृ प्रत्ययः॥ स चा
सौ डामरो बालकश्चेति॥ डामरो बालके स्त्री ल्यइति विश्वः॥ ॥सरसेत्यादि॥ हे शुभाशय सुंदरे मनोहरे जघने मणियुक्त रशनाभरणानि मणि
मय सुद्रघंटिकाव स्त्रालंकरणानि वासय परिधापय॥ की दृशे सरसघने। रसेन सह वर्त्तत इति सरसः स चासौ घनो निबिडश्चेति तत्॥ पुनः की दृशो।
शंबरस्यासुर विशेषस्यादारणो नाशकः॥ कामसंएव वारणो हस्ती तस्य कंदरे गह्वरे हस्ती हि गिरिकंदरेषु तिष्ठति रमते वा॥ अयमपि कामस्तत्रैव
संगतो वसतीति रूपकं श्रीजयदेवेत्यादि॥ श्रीजयदेववचसि हृदयसदयं विरं कुरु। कीदृशे जयदे। जयं ददातीति जयदः इत्यातो नुपसर्गात्कः
पुनः कीदृशे॥ हरिचरणयोः स्मरणामृतेन कृतं कलुषज्वरस्य पापतापस्य सज्वरखंडनं दुःखखंडनं येन पापज्वरनाशक इत्यर्थः॥ अतएव
मंडने अलंकरणभूते विविधनागरोपननागरपदकदंबसंयोजनाद्दचनमलंकरणमितिभावः ॥रचयेत्यादि॥ हे माधव त्वं यो मम चि
त्रे नाना प्रकारिकां वर्णिकां करेण रचयस्व करेणेति पदमादरातिशयद्योतनार्थं। कपोलयोर्गंडयोः पत्रं पत्रावलीं रचय। जघने कांचीं घटय॥
स्रजा पुष्पमालया कबरीभारं केशपाशनिचयं अंचय पूजय। पाणौ हस्ते वलयवलयश्रेणीं कटकमालां कलय आरोपय। तथा। तेनैव प्रकारेण मम
पादे चरणे नूपुरौ रचय इत्यनेन प्रकारेण प्रियया गदितः उक्तः। अतएव पीत आमोद वान्पीतांबरो हरिः तथा तादृशमकरोत् कृतवान्॥ गीतोक्तमथ ४०
नाद्यलंकरणमिह न द्विरुक्तिमावहति पूर्वोक्तस्यैव संकलय्य कथनात्॥ अन्यथोपसंहारादीनामपि पुनरुक्तिप्रसंग इति दिक्॥ अंचेत्यंच
गतिक्षेपणयोर्लोट्॥ ममेति सर्वत्राकांक्षावशाद्देवेति पर्यंकीकृतेत्यादि॥ ॥हरिः कृष्णो वः पातु युष्मान् रक्षतु॥ कीदृशः॥ वपुर्वै क्रियो
देहविक्रियां विश्रृंगारयन्नपि। कस्या हेतुभूतया। पर्यंकीकृतस्य खट्वीकृतस्य नागनायकस्य फणाश्रेणीफणासहस्रे तन्मणीनां गणेन समूहे
संक्रांतः संबद्धो यः प्रतिबिंबः प्रतिकृतिस्तस्य संवलनया। अनु नयेन कायव्यूहमिवाचरन् बहुशरीरवत्त्वमिव कुर्वन्॥ पादांभोरुहधारि
वारिधिसुतां हरिपादपद्मधारणशीलां लक्ष्मीं अक्ष्णां शतैर्द्दिदृक्षुर्द्रष्टुमिच्छुः॥ अतएवोपचिता कृतः समृद्धकामभावः॥ पर्यंकोपि चपालंक इ
ति शब्दभेदः। पर्यंकः पालंक इतीरपातः। फटायां तु फणा द्वयोरित्यमरः इदानीं निजग्रंथप्रयोजनमाह॥ यन्नाध्वन्यादि॥ ॥

गी॰ टि॰ ज॰
५१

यद्गांधर्वकलासु गीतकलासु केशालंप्रावीण्यमस्ति। यदेतद्वं विष्णुसंबंधि अनुध्यानमनुरक्तंयच्चिंतनं यच्छृंगारविवेकतत्वं संभोगादिभिन्नं तत्वज्ञानं
अन्यदपि यत्काव्येषु कवितासु लीलायुतं शृंगारादिरसविभावनमस्ति तत्सर्वं जयदेव पंडितकवेः श्रीगीतगोविंदात्तथा तत्सुधियः पंडिताः सानं
दाः आनंदयुक्ताः संतः परिशोधयंतु। परिसर्वतोभावेन शुद्धं कुर्वंतु। कीदृशस्य कृष्णे हरौ एकतानोनन्यवृत्तिरात्मा यस्य हरिपरायणस्येत्य
र्थः। जयदेवनामा पंडितः कविश्चेति पूर्वनिपातदूषणं नास्ति। विशेषणसमासे विशेषणस्य पूर्वनिपात इति वचनात्। कविरेव हि विशेष्यस्तत्र
कविरित्याकांक्षायां जयदेव जयदेवः कीदृग्यस्य स तथा। पुनः कीदृक्। पंडितो बुद्धिमान् विशेषणविशेष्यं प्रतिकामचारएव। यद्यपि संख्या
वान् पंडितः कविरित्यमरेण पंडितकविशब्दौ पर्यायेणैव कथितौ। तथाप्यर्थभेदएवास्त्यनयोः। तथाहि पंडितो न्यायाद्यध्यापकः कविः का
व्यकरः। कविः काव्यकरे श्रूरावित्यमरे लोव नानार्थवर्गे उक्तः। अमरे तु कियद्भेद मनादृत्य पर्यायपाठः। दानव दैत्यवत्। नहि दैत्यो दानवो
भवतीति तथाप्यसुरत्वेन पर्यायपाठः। पंडितकविशब्दयोरपि विद्वत्तया पर्यायपाठः॥ एकतानोनन्यवृत्तिरेकः कोपि जनेलथेति धरणिः। श्री
गीतगोविंद इत्ति। आद्यादिभ्य इति पंचम्यर्थे तसिः॥ श्रीशब्दमुत्कर्षार्थद्योतकं। गीतो गोविंदः कृष्णो यत्र तस्मिन्निति। ग्रंथ इति शेषः। श्रीभो
जेत्यादि। रामदेवीसुतश्च सो श्रीजयदेवकविश्चेति तस्य श्रीगीतगोविंदकवित्वं पराशरादिप्रियास्तेषां वर्गो गोष्ठी तस्य कंठे गलदेशे अ ५१
स्तु। कीदृशस्य। श्रीभोजदेवप्रभवस्य। भोजदेवादुत्पत्तिर्यस्य। एतेन कविनानि जन्मातृपितृप्रतिपादनेन मंगलमाचरितं। तंनिजग्रंथे
आशीरपि दत्तेति। प्रीतः प्रमोदवान् प्रीतांवरः कृष्णो यत्र स तथा। कतीह काव्यधारिधोवसंति नोज्वलारसाः। मदीयबुद्धिरल्पिका न वेदता
न्विशेषतः॥ रे जेनजातुकुटिलाज --------- --
हे सज्जनाः पर गुणेषु भवंतएव संतोषवंत इति सर्वजनप्रतीतिः॥ तन्मेपरिश्रममशेषमनुविलोक्य टीकामिमां सुकृति नो भृशमाद्रियध्वं॥
इति श्रीजगद्धरविरचितायां गीतगोविंदटीकायां सप्तदीपिकायां द्वादशः सर्गः॥ ॥श्रीकृष्णायभक्तपारिजातायनमः॥ ॥श्री॥

" Sandipika

(2) Complete [illegible]

Tika on Geeta [illegible]

by Jagaddhar Bhatta